GOVERNMENT ORIENTAL SERIES

Class A, No. 6

PREPARED UNDER THE SUPERVISION OF
THE PUBLICATION DEPARTMENT OF
THE BHANDARKAR ORIENTAL
RESEARCH INSTITUTE,
POONA



Bhandarkar Oriental Research Institute

1938

Government Oriental Series--Class A, No. 6

BHĀRADVĀJAŚIKṢĀ

With Nāgeśvara's Commentary

Edited By

V. R. Ramachandra Dikshitar, M. A.

AND

P. S. Sundaram Ayyar, B. A., L. T.

Bhandarkar Oriental Research Institute

1938

Copies can be had direct from the

Bhandarkar Oriental Research Institute, Poona 4 (India)

Price : Re. 1 Annas 8 per copy, exclusive of postage.

Printed and published by Dr. V. S. Sukthankar M. A., Ph. D

at the Bhandarkar Institute Press, Bhandarkar Oriental

Research Institute, Poona No. 4 (India)

राजकीया प्राच्यग्रन्थश्रेणिः—अनुक्रमाङ्कः [illegible]

भारद्वाजशिक्षा

नागेश्वरकृतव्याख्यया सहिता ।

एम्. ए. इत्युपपदधारिणा वि. आर्. रामचंद्र दीक्षितेन
बी. ए., एल्. टी. इत्युपपदधारिणा च पी. ए . सुंदर आर्येण
संपादिता

पुण्यपत्तनस्थ—
प्राच्यविद्यासंशोधनमन्दिराधिकृतैः
भाण्डारकरप्राच्यविद्यामन्दिरमुद्रणालये मुद्रायित्वा प्राकाश्यं नीता
१८६० शकवत्सराः १९३८ खिस्ताब्दाः
मूल्यं २।)

The *Bhāradvājaśikṣā* with Nāgeśvara's commentary is offered in a complete form now for the first time for the benefit of Vedic scholars and others interested in such studies. A part of this work with commentary has been published in Roman script with notes in Latin. [1] What do the Śikṣā treatises deal with ? Śikṣā is generally translated as Phonetics. To this class of literature belong the Prātiśākhyas. The Śikṣā and the Prātiśākhya form one of the six Vedāṅgas. The subject-matter of these is different though there is much in common between them. [2] The Prātiśākhya is 'a collection of phonetic rules peculiar to one of the different branches of the four Vedas' while the Śikṣā may be said to be a treatise on the phonetic peculiarties of each Veda. [3] The Śikṣās are usually attributed to ancient ṛṣis though some of them are very late compositions. The Prātiśākhyas seem to follow the Śikṣās in general, though some Śikṣās, like the *Vyāsa Śikṣā,* seem to follow the Prātiśākhyas. [4]

Śikṣās are compositions dealing with Letters, Accents, Quantity, Origin, Delivery, and Euphonic Law. [5] Max Müller, renders *Sthāna* as Organs of Pronunciation.

---

[1] Ed. by Emil Sieg, Berlin, (1892). अगी पूर्वं + + + is the last śloka where Sieg stops, though he is aware of other ślokas following.

[2] See Burnell: *Aindra School of Grammarians*: P. 47.

[3] See Max Müller: *A History of Ancient Sanskrit Literature* p. 119 (1860).

[4] The *Vyāsa S'ikṣā* has been edited by Mahopādhyāya Paṇḍita V. Vēṅkaṭarāma Sharman, Madras, 1929. There is a *Grantha* edition with the commentary *Veda-taijasa* by Karupattūr Vēṅkaṭarāma Śāstri.

Concerning the relation between the Prātiśākhyas and the Śikṣās, see F. Kielhorn's articles in the *Indian Antiquary*, Vol. V, pp. 141–144 and pp. 193–200.

[5] वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा । तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति । शिक्षां व्याख्यास्यामः । वर्णः स्वरः । मात्रा बलम् । साम संतानः । इत्युक्तः शिक्षाध्यायः इति ॥ वर्णोऽकारादिः ॥ + + + स्वरः उदात्तादिः ॥ + + + मात्रा ह्रस्वादिः + + + बलं स्थानप्रयत्नौ ॥ + + + सामशब्देन साम्यमुक्तम् ॥ + + + संतानः संहिता ॥ Ṛgvedasaṁhitā with the commentary of Sāyaṇācārya ed. by Max Müller Vol. I p. 34 (1849): See also the 7th Book of the Taittirīya-Āraṇyaka.

In the *Bhāradvājaśikṣā* which undoubtedly belongs to the category of the Śikṣās, we do not meet with these characteristics that are common to the Śikṣā treatises in general. This shows that the use of the term Śikṣā has been extended to compositions which aimed at "keeping the Vedic texts free from incorrect readings." (See *Ind. Ant.* Vol. V. p. 199). This Śikṣā is named a *Saṁhitika Śikṣā* as noted in the commentary of the *Vyāsa Śikṣā* which is a *Jaṭā Śikṣā* as is believed by the Vedic Adhyāpakas of the South. Its importance lies in the fact that it is the only authoritative ancient work which enables us to fix the proper reading of the text of the *Taittirīya* [1] which comprises the Saṁhitā, the Brāhmaṇa including the Kāṭhaka Brāhmaṇa, Āraṇyaka and Ekāgni-kāṇḍa of the *Āpastamba school.* In the preface to the printed edition of the *Taittirīya Prātiśākhya* (Bibliotheca Saṁskrita, Mysore), the *Bhāradvājaśikṣā* is mentioned as one of the nine Śikṣās which relate to the *Taittirīya.* [2]

The present work cannot however be said to deal with all the words of the *Taittirīya Veda.* It lays down empirical rules to distinguish and to empoly in their proper places words of similar sound or form. It teaches, for example, where to read वृजन and where वृजिन, where सुष्टुत and where सुष्टुति etc. (See *Ind. Ant. Ibid* p. 195). Treating then of empirical rules, this Śikṣā is of very little interest to linguistics.[3]

What is really difficult is the fixing of the chronological limits of this treatise. We know it as a matter of fact that the *Bhāradvājaśikṣā* closely follows the present redaction of the *Taittirīya Veda* and its classification into *kāṇḍas, praśnas,* and *anuvākas.* It can be only provisionally assumed that the composition of the Śikṣā was some time after this Veda assumed its present form.

---

[1] Another work of this category is the *Siddhānta Śikṣā* attributed to one Śrīnivāsa Dīkṣita. It is a later composition as it enumerates the nine Śikṣās, *Taittirīya Prātiśākhya,* the *Tribhāṣyaratna* and other works. It belongs to the *Taittirīya Veda.*

[2] See Intro. to the Mysore ed. of the *Prātiśākhya.*

[3] See S. Varma, *Critical Studies in the Phonetic Observations of Indian Grammarians.* p. 38. R. A. S. London, 1929. A development of this department of literature on Vedic accent is best traced in a valuable work, *Saptasvara Sindhu* by Ayyā-Śāstrin (with a commentary) which is in Ms. form and deserves to be read along with this kind of literature.

There is a tradition that this Śikṣā is contemporaneous with the *Vyāsa Śikṣā*. There is no certainty about the contemporaneity of the *Bhāradvājaśikṣā* and the *Vyāsa Śikṣā*. Of course both are used by our Ghanapāṭhins. There is no gainsaying the fact that the *Bhāradvājaśikṣā* is mentioned in the *Vedataijasa*, the commentary on the *Vyāsa Śikṣā*.

In discussing the date of the *Vyāsa Śikṣā* H. Lüders is of opinion that the compilation cannot be later than the middle of the 13th century from a study of the materials available. But this could not be taken as in any way conclusive. And we are not concerned at present with the *Vyāsa Śikṣā*.[1] To us the *Bhāradvājaśikṣā* seems, comparatively speaking, old. According to the author of the *Siddhānta śikṣā*, the *Bhāradvājaśikṣā* takes the first rank among the list of Śikṣās.[2]

The present edition is based on a manuscript discovered in the private library of one Mr. Venkāṭarāma Śāstri of Cuddalore, South India. This manuscript was found along with an equally important treatise on the Yajur Veda Lakṣaṇa, entitled *Lakṣaṇamala*. The Ms. is in *grantha* script of forty-eight palmyra leaves 15 × 2¼ and is fairly correct. The name of the commentator according to the colophon is Nāgeśvara, son of Vṛddhagiri.[3] It is difficult to trace the family and date of this commentator. It is likely that the commentator was an ancestor of the family of Jaṭāvallabhas in Paranūr Village in Tirukkovalūr Taluq, South Arcot District. It may be remarked in passing that the Venkaṭarāma Śāstri, in whose private custody this work was found, is a member of the Paranūr Jaṭāvallabha Śāstri family. This manuscript is designated as Ka (क) in the book.

Three other manuscripts, lent to us through the courtesy of Dr. C. Kunhan Raja, M. A., D. Phil., (Oxon), Madras University, and of the Curator for the Publication of Sanskrit Manuscripts Trivandrum, have been utilised in this edition. The Trivandrum Ms. No. 625 contains text and commentary written in Devanāgarī script on thick light blue paper pp. 92. This contains many

---

1 See *Die Vyāsa S'ikṣā*, pp. 106–7, Kiel, (1895).

2 *Die Vyāsa S'ikṣā*, p. 3.

3 But in the edition by Sieg, Jaṭāvallabha Śāstrin is mentioned as commentator.

scriptorial errors. It is difficult to differentiate between the text and the commentary in this manuscript. But this Ms. contains more illustrations than the previous one, though the citations are not identified. This Ms. is desiganted as Kha (ख) in the book.

The other two are designated ga (ग) and gha (घ), and both of them are from the Adyar Library. The ga Manuscript is numbered XXV (h) 6 in the Adyar Catalogue. It contains only the text and has ten palm leaves in *grantha* script. The condition of the Ms. is perfect. Each page conains six lines of forty-two letters. The manuscript shows that it has been corrected and can roughly be 250 years old. The manuscript gha is XX (m) 30 of the Adyar Library. It is an incomplete copy and contains only fifty *kārikās* or verses from the beginning. This manuscript must have been copied recently. Roughly it may be about sixty years old.

Brahmaśrī Kalyāṇasundara Śāstrin of Āndānallur kindly allowed the use of his correct palm-leaf copy for which our thanks are due to him.

As the contents of the work are arranged in alphabetical order, we have not thought it necessary to prepare either contents or index separately.

Madras
29th August 1938

V. R. Ramachandar Dikshitar
P. S. Sundaram Ayyar

ओम्

॥ भारद्वाजशिक्षा ॥

सव्याख्या ।

गणेशं प्रणिपत्याहं संदेहानां निवृत्तये ।
शीक्षामनुप्रवक्ष्यामि वेदानां मूलकारणम् ॥ १ ॥

श्रीगणाधिपतिमानम्य वेदानां ग्रन्थत्रयसंहितानामादिकारणं वेदभाष्यानुसारिणीं शीक्षां वेदस्थसंदेहनिवारणाय प्रवक्ष्यामि इति भरद्वाज[1]मुनिनोक्तम् ॥

— अ —

(मू) वृजने ज उदात्तश्चेदकारेण सहोच्यते ।

एतदारभ्य अकारादिस्वरसहितानि पदानि क्रमेण कथ्यन्ते— वृजने जः वृजनशब्दे जकारः उदात्तः चेत् स जकारः अकारसहितो भवति । यथा "वृजनं दोहसे" (I. 4. 9) । "वृजनं जीरदानुम्" (ब्रा. II. 8. 4) । "सुवृजनासु" (II. 6. 12) । "वृजनस्य गोपाम्" (ब्रा. II. 4. 3) । जकारः उदात्तः—इति किम्? "वृजिनमनृतं दुश्चरितम्" (ब्रा. III. 3. 7) । "वृजिनादनृतात्" (ब्रा. III. 3. 7) । "व्रजनं कृष्णम्" (IV. 4. 3) । "वृजिना च मर्तान्" (V. 5. 4) ॥

(मू) [2]स्तुतं पदं तु वाक्यान्ते प्रचयं परिकीर्तितम् ॥२॥

वाक्यान्ते विद्यमानं 'स्तुतं' पदं प्रचयः चेत्, 'स्तुतम्' इत्यत्र 'तम्' इति प्रचयः चेदित्यर्थः; तकारः अकारसहितो भवति । यथा — "विप्रा वर्धन्ति

---

१. 'मुनिना प्रणीतम्' ख. २. 'स्तुतं धृतं घृतेनोर्ध्वं हव्यपूर्वोऽन्त आहुतम्' ग. स्तुतं धृतं नयान्योर्ध्वमकारान्तं प्रकीर्तितम् । घृतेनोर्ध्वं हव्यपूर्वमाहुतं च तथा भवेत् ॥ 'रादत्' घ.

सुष्टुतम् " (I. 4. 46) । तं प्रचयमिति किम्? " अग्ने जनामि सुष्टुतिम् " (I. 3. 14) । 'वाक्यान्ते' इति किम्? " अभि नः सुष्टुतिं नय " (ब्रा. II. 4. 6) । " स्तुतं शस्त्रं प्रतिगरं ग्रहम् " (VII. 3. 11) ॥

(मू) आ पञ्चमाद्धव्यपूर्वो घृतेनोर्ध्वश्च आहुतम् ।
वा[1]क्यान्तोऽपि तथा प्रोक्तो यःपूर्वस्तु न विद्यते ॥ ३ ॥

आ पञ्चमात् हव्यपूर्वः, 'घृतेन' इत्येवंपरश्च वाक्यान्तोऽपि आहुतम् इति शब्दः तथा प्रोक्तः अकारेण सहोच्यत इत्यर्थः । अकार इत्यनुवर्तते । यथा— " हव्यमाहुतमनमीवाः " (IV. 2. 4) । " जुषस्व हव्यमाहुतं प्रजाम् " (III. 1. 11) । घृतेनोर्ध्वो यथा—" प्र दिव आहुतं घृतेन " (ब्रा. I. 2. 1) । वाक्यान्तो यथा— " त्वे ते देवा हविरदन्त्याहुतम् " (ब्रा. II. 7. 12) । " उरुज्रयसं घृतयोनिमाहुतम् " (ब्रा. I. 2. 1) । यःपूर्वस्त्वेकारसहितो न भवति । " अग्नीषोमा य आहुतिम् " (ब्रा. II. 8. 7) । अत्र वाक्यान्तत्वेऽप्यकाराभावः । " हव्यदातिम् । य आहुतिं परिवेदा नमोभिः " (ब्रा. III. 6. 10) । अत्र हव्यपूर्वत्वेऽप्यकाराभावः । 'आ पञ्चमाद्धव्यपूर्वः' इति किम्? " तास्ते गच्छन्त्वाहुतिं घृतस्य " (III. 5. 5) इत्यत्र अकाराभावार्थम् । कुतः? तत्र " येन हव्यं वहसि " इति व्यवधानेन हव्यपूर्वत्वस्य विद्यमानत्वात् । अत्र किम्? " एवाहुतिमायतनवतीं करोति " (V. 7. 3) ॥

— स्वरभक्तिः —

(मू) रादत् परशुरन्तोच्चे त्विङ्ग्यैः पर्शुश्च भक्तिता ।

परशुशब्दे अन्तोदात्ते सति रात् रेफात् अत् अकारो भवतीत्यर्थः । यथा— " परशुर्न स्वस्तिः " (III. 2. 4) । 'अन्तोच्चे' इति किम्? " परशुर्वेदिः " (III. 2. 4) । इङ्ग्यस्थपर्शुशब्दे तु अन्तोदात्तेऽपि तस्य स्वरभक्तिता भवत्येव । यथा— " अश्वपरशुमादत्ते " (ब्रा. III. 2. 2) । " अश्वपर्श्वा बर्हिरच्छैति " (ब्रा. III. 2. 2) । मञ्चाः क्रोशन्तीतिवत् लक्षणया इङ्ग्यस्थ इति[10] लभ्यते ॥

---

१. इदमर्धं नास्ति ग. २. 'क्यान्तेऽपि' ख. ३. 'वेश्चेदका' ख. ४. 'क्यान्तेऽप्य' ख. ५ 'म + कृतः ।' ख. ६ 'वहसीति व्यवसा' ख. ७ 'ग्यप' ख. 'ग्यंप' गं. घ. ८ 'फात्परोऽका' ख. ९ 'णा वा' ख. १० 'ति कथ्यते' ख.

(मू) पर्षच्चेहातिपर्षाऽपि स्वरभक्तेस्तु नित्यता ॥ ४ ॥

पर्षदित्यत्र च अतिपर्षा इत्यत्रापि स्वरभक्तेस्तु नित्यता भवति । यथा — "तन्नः पर्‌षदति द्विषः" (ब्रा. III. 7. 8) । "नावयाऽति पर्‌षा स्वस्तये" (आ. VI. 11) । एषु स्वरभक्तिः । अत्र किम्? "इत्याह तस्मात्परुषि परुषि रसः" (V. 5. 6) । अत्र न स्वरभक्तिः । 'स्वरोत्तरपपूर्वे' इत्यस्यापवादोऽयम् ॥

(मू) पापं-विलोम-पूर्वे चाकार्षं कार्षीत्तदादिषु ।
स्वरभक्तिं विजानीयान्नान्यवर्णोऽत्र संभवेत् ॥ ५ ॥

'पापम्', 'विलोम', एवंपूर्वे सति 'अकार्षम्' इत्यत्र स्वरभक्तिः भवति । अर्थात् अत्रैव स्वरभक्तिरुक्ता । 'नान्यवर्णः' इति । उकारः ऊकारो वा न स्यादित्यर्थः । यथा—"यदह्ना पापमकार्‌षम्" (आ. X. 31) । "विलोमाकार्‌षमात्मनः" (ब्रा. III. 7. 5) । 'कार्‌षीत्' इत्यत्रापि स्वरभक्तिर्भवति । यथा—"कामोऽकार्‌षीन्मन्युरकार्‌षीत्" (आ. X. 61. 62) । आदिशब्दस्य प्रयोजनम् "अग्निर्देवता ब्रह्म इत्यार्‌षम्" (आ. X. 33) । "वर्‌षुकः पर्जन्यः" (V. 4. 1) । एवंपूर्व इति किम्? "दधिक्राव्णो अकारिषम्" (I. 5. 11) । अत्र प्रत्युदाहरणप्रसङ्गात् स्वरभक्तिरुक्ता । इतः परं प्रकृतमनुसृत्याह —

— आ —

(मू) अग्ने तान्नपते त्रींश्च त्रिष्टुभा चैवमाद् भवेत् ।

"अग्ने तव" (V. 2. 6), "अन्नपते" (V. 2. 2), "त्रींस्तृचान्" (II. 5. 10) इत्येतेष्वेनुवाकेषु 'भा' इत्यत्र आकारवान् । यथा —अग्ने तवेत्यत्र—"त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्यः शंयुम्" (V. 2. 6) । अन्नपतेऽन्नस्य—"त्रिष्टुभा राजन्यस्य त्रैष्टुभो हि राजन्योऽप्सु" (V. 2.2) । त्रींस्तृचान्—"त्रिष्टुभैवास्मा इन्द्रियम्" (II. 5. 10) । एष्वाकारः । अत्र किम्? "त्रिष्टुग्भी राजन्यस्य त्रैष्टुभो हि राजन्यो यम्" (V. 1. 4) ॥

---

१ पर्शच्च पर्षिपर्षापि २ 'भक्तिस्तु' ख. ग. घ. ३ 'स्वरपूर्वोऽपपूर्व' ख. ४ 'च कार्षं' ख. 'चाकार्षं कार्षिरादिषु' ग. घ. ५ 'षुं त्रिष्टुभा इत्यत्र आकारो भवेत्' ख. 'इत्येतयोरनुवाकयोः भा' क. ६ 'प्सु', एतयोरिति किम्? त्रि' क. ७ 'यम्', त्रींस्तृचान्' इत्यत्रापि आकारवान्, यथा—त्रिष्टुभैवास्मै" क.

— इ — (इय)

(मू) क्षिप्रा भर्त्र्य-यित्र्य-रात्र्य[1]-मन्त्र्य-पित्र्यापि काठके ॥ ६ ॥

भर्त्र्य, यित्र्य, रात्र्य, मन्त्र्य, पित्र्य एते शब्दाः काठके[2] क्षिप्राः रेफयकार-संहितैकाक्षरवन्त इत्यर्थः। काठकप्रश्नेषु[3] यथा—"विश्वस्य भर्त्र्यो विश्वस्य जनयित्र्यः" (ब्रा. III. 11. 1)। "रात्र्या समच" (ब्रा. III. 10. 4)। "भारद्वाजेत्यामन्त्र्य" (ब्रा. III. 10. 11)। "येषां दत्तं पित्र्यमायनवत्" (आ. II. 6)॥

> "भद्रं च सह संज्ञानं लोकस्तुभ्यमिति क्रमात्।
> एते काठकसंज्ञाः स्युः पञ्च प्रश्ना न चेतरे॥"

इत्यारण्यशिक्षा। एतेषां काठकप्रश्नेषु। अत्रेति[4] किम्? "उद्धृत्यैवाधायाभिमन्त्रियः" (ब्रा. I. 1. 8)। "रात्रियाऽहरहोरात्रे" (V. 4. 9)॥

(मू) समाने तु पदे ह्रस्वाः[5] सहल्रा विरलाश्च ये।

समानपदे अखण्डपदे[6], सहल्रा व्यञ्जनसहितरेफलकाराः ये यकारे परे सति; ते शब्दा ह्रस्वविरलाः। रेफयकारयोः संयोगाभाव इत्यर्थः। यथा "यस्यैतानि क्रियन्ते" (III. 3. 9)। "देवेष्वग्रियम्" (ब्रा. II. 5. 1)। "नमः शीभ्रियाय च" (IV. 5. 5)। "यद्घायत्रियः स्त्रियस्तेन" (II. 5. 8)। "गर्भँ समुद्रियम्" (IV. 1. 4; V. 1. 5)। "महिपाथः पूर्व्यँ सध्रियक्" (ब्रा. II. 5. 8)। "सं प्रियाः" (IV. 2. 4)। "वा अन्नं भ्रियते" (V. 1. 9)। "एवं वा एष म्रियते" (V. 7. 5)। "श्रियमेवावरुन्धे" (ब्रा. III. 9. 7)। "उदु स्त्रियाः सचते सूर्यः" (ब्रा. III. 1. 3)। "ह्रियेतेति" (II. 2. 4)। "प्रह्रियमाणाय" (VI. 3. 5)। 'समानपदे' इति किम्? "त्र्यम्बकं यजामहे" (I. 8. 6)। "धर्त्र्यसि" (IV. 3. 7)। "त्र्युद्धिं करोति" (V. 1. 6)। हल्पूर्व इति किम्? "दँ हन्तां दुर्याः" (I. 1. 4)। "पुरोनुवाक्ये कुर्यात्" (II. 2. 9)॥

---

१ 'रात्र्याम' ख. 'क्षिप्रा भर्त्र्यो जनयित्र्यो रात्र्याम' ग. २ 'ताः ए' ख. ३ 'ठके य' क. ४ 'काठक इति' ख. ५ 'स्वाः हल्पूर्वे वि' ख. घ. ६ 'दे हल्पूर्वैरित्यत्र रेफ इकारात् ये यकारपरे सति तादृक्च्छब्दा ह्रस्वाः। ह्रस्वविरला इत्यस्य यकारस्य च संयो' ख.

— इ —

(मू) जुष्टो वाचः प्रजाग्निचि[1] मानोमित्र उदस्त च ॥ ७ ॥
अग्निर्वाव च देवावै केशवापविधायकः ।
रक्षांसीत्यनुवाकेषु ह्यप्येतीकारवान् भवेत् ॥ ८ ॥

"जुष्टो वाचः", "प्रजापतिरग्निमचिनुत स क्षुरपविः", "मा नो मित्रः", " उदस्ताप्सीत् ", " अग्निर्वाव संवत्सरः ", " देवा वै यद्यज्ञेऽकुर्वत । तेऽसुरा ऊर्ध्वम् ", " रक्षाँसि "– एतेष्वनुवाकेषु 'अप्येति' शब्दः इकारवान् । यथा– " पुनरप्येति देवान् " (III. 1. 10) । " यन्मृतः पुनरप्येति जीवान् " (ब्रा. III. 7. 10) । " जीवन्नेव देवानप्येति वैश्वानर्यर्चा " (V. 6. 6) । " प्रियमप्येति पाथः एष च्छागः " (IV. 6. 8) । अग्निर्वावेत्यत्र यथा– " ऋतुर्भूत्वा संवत्सरमप्येति " (ब्रा. I. 4. 10) । "देवता एवाप्येति । नास्य रुद्रः" (ब्रा. I. 5. 6) । " ब्रह्माप्येति । य एवं वेद " (आ. II. 2) । एतेष्विति किम् ? " जीवन्देवानामप्येतु पाथः " (III. 1. 4) । " अथा देवानामप्येतु पाथः " (III. 1. 11) ॥

(मू) छन्दा या ते-न[2] बर्हिश्च इद्ध्या अग्ने बृहन्परे ।

'छन्दा', 'या ते', 'न बर्हिः', 'अग्ने बृहन्तम्' एवं परः[3] इद्ध्यैशब्दः इकारपूर्वः । यथा– " अग्निर्वायुमती भवति समिद्ध्यै " (V. 3. 7) । " छन्दाँस्युप " (V. 3. 8) । "वायति समिद्ध्यै या ते अग्ने" (VI. 2. 2) । " ब्रह्मवर्चसस्य समिद्ध्यै । न बर्हिरनु प्रहरेत् " (ब्रा. II. 1. 4) । " द्युमन्तँ समिधीमहीत्याह समिद्ध्यै, अग्ने बृहन्तमध्वर इत्याह वृद्ध्यै" (ब्रा. III. 3. 6) । एवंपर इति किम् ? " यदश्वमेधः समृद्ध्यै " (ब्रा. III. 8. 1) ।

(मू) यज्ञस्य पूर्व इष्ट्यै च त्विकारादिः[4] प्रकीर्तितः ॥ ९ ॥

यज्ञस्य एवंपूर्वः इष्ट्यै इति इकारादिः स्यात् । यथा—" यज्ञस्य समिष्ट्यै

१ 'चिन्मानोभ्यप्येत्युदस्त चेत् । ' ग. घ. अनन्तरमर्धद्वयं नास्ति ग. २ 'र्हिश्चाग्ने बृहेध्यै तथैव च ' ग. 'र्हिश्येदिध्याग्ने बृहतः परे ' घ. ३ 'रः समिध्यै इति मकार इकारसहितः स्यात् ' ख. ४ 'च इका ' ख. ग. घ.

प्राणापानौ " (VI. 3. 9) । एवंपूर्व इति किम्? "सुवर्गस्य लोकस्य समष्ट्यै" (II. 2. 5; VII. 5. 8) ॥

(मू) अकारिषं च णः पूर्वो रीरिषो रीरिषन्नपि ।

[1]तारिषच्चारिषं चेत् स्यात् स्वरभक्तिर्न विद्यते ॥ १० ॥

णः पूर्वे सति अकारिषमित्यत्र रेफेकारौ स्तः । स्वरभक्तिर्न स्यात् । 'रीरिषः' 'रीरिषत्', 'तारिषत्' 'चारिषम्' एषु[2] च यथा, "दधिक्राव्णो अकारिषम्" (I. 5. 11) । "मा नः प्रजाँ रीरिषो मोत वीरान्" (आ. III. 15) । "रीरिषन्मोत वीरान्" (ब्रा. III. 1. 1) । "आयूँषि तारिषत्" (I. 5. 11) । "व्रतमचारिषम्" (I. 7. 6) । एतेषु[3] स्वरभक्तिः न स्यात् । 'णः पूर्वः' इति किम्? "पापमकार्‌षम्" (आ. X. 31) ॥

(मू) उपसर्गेषु पूर्वेषु त्वियुरित्यत्र विद्यते ।[4]

उपसर्गेषु पूर्वेषु इयुरित्यत्रेकारो भवति । " उपेयुः " (VII. 2. 2) । " अभिसमियुः "(II. 2. 7) । अत्र किम्? " ईयुष्टे ये " (I. 4. 33) ॥

— ई —

(मू) " जुष्टःप्रश्नकाण्डाच्छिद्रारण्यके मानुषी सईत् " ॥ ११ ॥

जुष्टःप्रश्ने यथा— " अतिथी मानुषीणाम् " (ब्रा. II. 4. 7) । " अग्निर्विशां मानुषीणाम् " (ब्रा. II. 4. 8) । अच्छिद्रे यथा —" अन्तर्दूतश्चरति मानुषीषु " (ब्रा. III. 7. 6) । आरण्यके यथा–" विश्वासां मानुषीणाम्" (आ. IV. 7) । एते ईकारवन्तः । एष्विति किम्? "विश्वेषामातिथिर्मानुषाणाम्" (ब्रा. II. 7. 12) । " श्रेष्ठो देवानामुत मानुषाणाम् " (ब्रा. III. 1. 2) ॥

(मू) [5]विनिष्पर्यसुरःपूर्वक्रीयेत्यत्र न ते परे ।

---

१ ' रिषाचा ' ख. ग. घ. २ ' एतेष्वपीत् स्यात् । स्पष्टार्थं स्वरभक्तिर्न विद्यत इत्युक्तम् । य ' ख. ३ ' अत्र न स्वरभक्तिः । ' ख. ४ इदमर्धं नास्ति ग. ५ ' इदानीं मकारस्वरभक्तिरहितपदान्युच्यन्ते–वि ' ख. ' निष्पर्यसुरो विक्रीया तेत्री ध्री रुद्री शतात्परम् । होत्री नष्त्री स्वस्त्री स्तोत्री पोत्री नेष्ट्री च दीर्घगाः ॥ अवीयातीया व्लीयन्त सून्नीयमतवीय च । वरीयसी च ' ग. दीर्घगाः । अतवीयान् द्वितीयश्चार्तीयेताश्चीयते हसी । वरीयसी द्वीयस्सून्नीयं पीयूषोव्लीयन्त ॥ पीयतित्वस्तृतीयश्चा वृकास्ते ऊर्ध्वगा ईयुः । स्वरोत्तर ' घ.

ईकार इति सांनिध्यात् लभ्यते। 'वि', 'निः', 'परि', 'असुरः', एवंपूर्वः 'क्रीय' इत्येष शब्दः दीर्घविरलः। न ते परे सति ते इत्येवंपरत्वाभावे। यथा--" विक्रीय पुनरात्मन् " (VI. 1. 7)। " पितृभ्य एव तद्यज्ञं निष्क्रीय यजमानः " (ब्रा. I. 3. 10)। " तं परिक्रीयावरुन्धे " (ब्रा. I. 3. 6)। " असुरः क्रीयमाणः " (IV. 4. 9)। एवंपूर्व इति किम्? " गृह्णाति क्रियमाणमेव तत् " (VI. 4. 2)। 'न ते' इति किम्? " एषा पशोर्विक्रियते " (V. 2. 10)॥

(मू) चातूरथस्यपूर्वान्यौ होत्री नप्त्री च दीर्घगौ॥ १२॥
पोत्री नेष्ट्री स्वस्री स्तोत्री शतरुद्री न णांपरः।
वरीयसी च पीयूषो दवीयोऽथ ह्सीय च॥ १३॥
चीयते च द्वितीयश्च[1] तृतीयादौ तथैव च।

एते शब्दाः दीर्घविरलाः। शतात्परः चेत्तथा। " आग्नीध्रीयो होत्रीयो मार्जालीयः " (VI. 3. 1)। अग्निप्रतिपादकः शतरुद्रीयशब्दः। " अन्ये शतरुद्रीयम् " (V. 5. 9)। " शतरुद्रीयं जुहोति " (V. 4. 3)। न णांपर इति किम्? "सुमत्क्षराणां शतरुद्रियाणाम्" (ब्रा. III. 6. 11)। शतात्पर इति किम्? "यथा तोकाय रुद्रियम्" (III. 4. 11)। "होत्रीयो मार्जालीयः" (VI. 3. 1)। " अपोनप्त्रीयं चरुम् " (II. 3. 12)। विशेषणेन किम्? " सूरोरथस्य नप्त्रियः " (ब्रा. II. 4. 5)। चातुः रथस्येत्येतौ शब्दौ पूर्वौ दीर्घौ न। स्वस्रीयोऽसुराणाम्" (II. 5. 1)। 'सहस्रँ स्तोत्रीयाः" (VII. 1. 5)। " अपचितिः पोत्रीयामयजत्। नेष्ट्रीयामयजत्त्विषिः आग्नीध्राद्विदुषी " (ब्रा. III. 12. 9)। " तवसमतवीयान् " (II. 2. 12)। " मनश्चार्तीयेताम् " (II. 5. 11)। " दिशः समव्लीयन्त " (V. 3. 2)। " सून्नीयमिव " (VI. 2. 4)। " एषा वै परोवरीयसी " (VI. 2 3.)। " प्रतिधुक् पीयूषः " (III. 3. 9)। " दवीयो अप सेध " (IV. 6. 6)। " अथ ह्सीयाँसम् " (VI. 6. 4)। " चीयते " (V. 5. 2)। " द्वितीयो गह्यः " (V. 5. 9)। इत्यादिषु दीर्घविरला एव॥

---

१ 'तीयाश्च' ग.

(मू) पीयति त्वस्तृतीयश्चाव्रकास्ते ऊर्ध्वगामीयुः ॥ १४ ॥

पीयति त्वः, तृतीयः, अव्रकाः, ते, एते परतः स्थिताश्चेदीयुरित्यत्र ईकारः। "पीयति त्वोऽनु त्वः" (IV. 2. 3)। "तृतीयः किशिलः" (V. 5. 9)। "य ईयुरवृकाः" (II. 6. 12)। "ईयुष्टे ये" (I. 4. 33)। एषु परत इति किम्? "उपेयुरनाप्ताम् + + उपेयुरुपदासुका" (VII. 4. 5)। "उपेयान्न तृतीयम्" (V. 6. 8)।

— उ —

(मू) स्वरोत्तरपपूर्वे तु शषहोर्ध्वे[2] तु मध्यगः।
रेफादुकार एव स्यात् स्वरभक्तिर्न विद्यते ॥ १५ ॥

स्वर उत्तरो यस्मादसौ स्वरोत्तरः। स्वरोत्तरपकारपूर्वे सति स्वरोदये पकारे पूर्वे सति रेफात परः उकार एव स्यात् शषहेषु परेषु सत्सु। यथा— "प्ररोहन्ती परुषः परुषः परि" (IV. 2. 9)। "पुरुषशीर्षमुप दधाति" (V. 6. 6; V. 5, 3)। "विराजो अधि पूरुषः" (आ. III. 12)। आप पूर्षम्बर" इति अत्र भिन्नपदत्वात् स्वरभक्तिः। "अभिशोचति पौरुषेयेण" (IV. 7. 15)। "तप इति तपोनित्यः पौरुशिष्टिः" (आ. VII. 9)। "वन्वन्नवातः पुरुहूत इन्द्रः" (ब्रा. II. 8. 5)। एषु न स्वरभक्तिः। शषहोर्ध्वे त्वखण्डपदे विज्ञेयम् ॥

(मू) रादुत्वमरुषश्चेदरुहद्रुह चारुहम्।

अरुष, अरुहत्, रुह, अरुहम्, एतेषु रात् रेफात्पर ऊर्ध्वे उकारः स्यात्। यथा— "अग्निर्वा अरुषः" (ब्रा. III. 9. 4)। "अरुषं मियेध्य" (IV. 1. 3)। "आवाचो मध्यमरुहत्" (IV. 7. 13)। "आहं दीक्षा मरुहम्" (ब्रा. III. 7. 7)। "अथो स्वारुहम्" (VI. 2. 10)। "स्वारुहा यस्य" (ब्रा. II. 4. 8)। एते उकारवन्तः। एष्विति किम्? "कोऽर्हति" (II. 1. 5)। "अर्हन् बिभर्षि" (आ. IV. 5) ॥

---

१. अस्यार्धस्य स्थाने 'प्रचीमनुर्नमत्यै स्यात् सन्ते क्रूरमिदं तथा'। इति दृश्यते ग,
२. 'र्ध्वेषु म' ग.

(मू) तिक्रुष्ट चक्रुषश्चक्रुः क्रुङ्ङ्-मु-क्ष-द्ध-रोत्तरे ॥ १६ ॥

'तिक्रुष्ट', 'चक्रुषः', 'चक्रुः' एतेष्वुकारवन्तः। ङ्ङ्, मु, क्ष, द्ध, र, एवंपरः क्रु इत्युकारवान्। यथा—"अतिक्रुष्टाय मागधम्" (ब्रा. III. 4. 1)। "चक्रुषः पशवः" (VI. 4. 8)। "स्वपत्यानि चक्रुः" (ब्रा. II. 5. 8, II. 8. 1)। "क्रुङ्ङाङ्गिरसः" (ब्रा. II. 6. 2)। "क्रुमुकमवदधाति" (V. 1. 9)। "अक्रुक्षदिति मन्यते" (ब्रा. II. 5. 5)। "क्रुद्धः परोवप" (I. 5. 4)। "क्रूरमिव वै" (V. 1. 5)। अत्र किम्? "कृण्वानासो अमृतत्वाय" (ब्रा. II. 5. 8)॥

(मू) प-ह-णा-म-त ऊर्ध्वे च त्वभि-मित्र-कपूर्वके।
द्रुषदं वै द्रु ध्रुवाऽध्रुङ् नानाद्दत्य द्रुतिश्रुतिः ॥ १७ ॥

'प', 'ह', 'णा', 'म', 'त' एवं परे सति 'अभि', 'मित्र', 'क' एवं वा पूर्वे सति द्रु इत्युकारवान्। द्रुषदादयश्च। ध्रुगनाद्दत्यवर्जम्। उकारवान्॥ यथा, "द्रुपदादिव मुञ्चतु" (ब्रा. II. 4. 4)। "द्रुहः पाशात्" (ब्रा. II. 5. 6)। "प्रसितिं द्रूणानः" (I. 2. 14)। मपरत्वोदाहरणं चिन्तनीयम्। "सोमो अतिद्रुतः" (I. 8. 21)। "तं मनसाऽनुद्रुत्य" (ब्रा. II. 2. 1)। "उद्द्रुताय स्वाहा" (VII. 1. 13)। "कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि" (आ. II. 18)। "मित्रध्रुगिति" (ब्रा. I. 7. 1)। "कद्रूश्च वै" (VI. 1. 6)। "नृषदं त्वा द्रुषदम्" (I. 7. 12)। "वनस्पतयो वै द्रु" (ब्रा. I. 3. 10)। चकारग्रहणात् "विप्रुड्भ्यो हिते" (आ. I. 23)। "घृतप्रुषस्त्वा" (ब्रा. I. 2. 1)। "भ्रुमिं धमन्तः" (ब्रा. II. 5. 5)। "गोष्वश्वेषु शुभ्रुषु" (ब्रा. II. 4. 4)। "निम्रुक्तिमरूपेण" (V. 7. 19)। अत्र किम्? "रुशद्दृशे" (IV. 3.13)। "उद्दृष्ट उत्तरम्" (ब्रा. I. 8. 10)। "यानि दृषदः" (ब्रा. III. 2. 6)। "दृषच्चोपला च" (I. 6. 8)॥

---

१ 'ति। अतिक्रुष्टादिशब्दः उकारवान्, ङ्ङ्' क. २ 'हणापमत' ग. ३ 'द्रुद्रुवा द्रुङ्' ग. 'दृषदं वैद्रु चद्रु, स्यात् ध्रुवा ध्रुङ्न द्रुतिश्रुतिः' घ. ४ 'द्रुषद°, वैद्रु, ध्रुवा, अध्रुक, एते चोकारवन्तः' स.

(मू) दृंशेऽनादृत्य दृषदः उद्दृष्ट उद्धृतोद्धृतः ।

दृतिश्रुतिः—दृंशे, अनादृत्य, दृषदः, उद्दृष्टः, उद्धृतः, धृतिः, एते ऋकारवन्तः। (न) दृतिप्रतिषेधवचनात् । यथा—"अनादृत्य तत्" (ब्रा. I. 6. 8) । "दृतिँ सुकर्ष" (III. 1. 11) । "प्रजां दृँह" (I. 1. 7) । "नमः क्षत्तृभ्यः" (IV. 5. 4) । "मातृवोः शुचिः" (ब्रा. II. 4. 3) । "असंमृष्टोऽसि (I. 3. 3) । "भद्रं कर्णेभिः शृणुयाम देवाः" (आ. I. 1)—एषु ऋकारः । "यद्ध्रुव उत्तमः" (VI. 5. 2) । अकारान्तगृहीतत्वात् "ध्रुवं ध्रुवेण" (III. 2. 8) । "ध्रुवां वै" (I. 7. 5) । "पृथिवी मातरध्रुक्" (ब्रा. II. 8. 6) । अनयोः उकारः । अकारपूर्व इति किम्? "प्राणधृगसि" (VII. 5. 19) । "यस्याग्निमनुद्धृतम्" (ब्रा. I. 4. 4) । "उद्धृत्यैवाघायाभिमन्त्रियः" (ब्रा. I. 1. 8) । "उद्धृतपरिपूताभिः" (आ. I. 32) । "अहोरात्राभ्यां धृतः" (आ. V. 7) । "त्रिः पृच्छति शृतँ हवी३ः शमितः" (VI. 3. 10) । "यत्पृषदाज्यम्" (VI. 3. 10) । एषु ऋकारः ॥

(मू) च वि मे नम आ देवः स्तुहीह हवनेत्यासिस् ॥ १८ ॥
वाजं वो वै[1] सित स्वर्षि तपो मे हृदये न च ।

च, वि, मे, नमः, आ, देवः, स्तुहि, इह, हवन, इति, असिस्, वाजम्, वः, वै, एवं पूर्वः; आसि निमित्ते तु सकारपरः च श्रुतशब्दः उकारवान् । यथा—"च श्रुतसेनाय च" (IV. 5. 6) । "महि विश्रुत्येतानि" (VII. 1. 5) । "श्रावश्च मे श्रुतिश्च मे" (IV. 7. 1) । "नमः श्रुताय च" (IV. 5. 6) । "आश्रुतं प्रत्याश्रुतम्" (VII. 3. 11) । "आश्रुततरं वदति" (II. 5. 11) । "देवः श्रुतौ देवेषु" (I. 2. 13) । "स्तुहि श्रुतं गर्तसदम्" (IV. 5. 10) । "ममेदिह श्रुतँ हवम् (I. 4. 5) । "त इह श्रुवं त्वधिब्रुवन्तु" (II. 6. 12) । इति केचित् । "ऋतुभिर्हवनश्रुतः" (II. 4. 14) । "इति श्रुतरावृत्" (II. 4. 7) । "आसि श्रुतसदसि" (III. 2. 10) । असिस् इत्यत्र सकारेण किम्? "शृतोऽसि शृतं कृतः"

---

१ 'वाज॰ बोधस्तउस्वाहार्षिन्तपो' ग. २ 'वै त्ततस्व' घ.

(ब्रा. III. 7. 9) । " दुरोनवाजं श्रुत्या अपावृधि + + प्रेदुहरिवः श्रुतस्य " (II. 2. 12) । " सुश्रवा वै श्रुतोऽसि " (ब्रा. I. 2. 1)। असिव्यवेतोऽत्र । श्रुतेति किम्? " आशृणामि ते " (VII. 3. 11) । स्वा, ऋषिम्, तपः, मे, हृदयेन, एवं परः 'श्रुत' शब्द उकारवान् । यथा— " श्रुताय स्वाहा " (VII. 1. 19) । " श्रुतर्षिमुग्रमभिमातिषाहम् " (ब्रा. II. 5. 6) । " श्रुतं तपः " (आ. X. 10) । " श्रुतं मे गोपाय " (आ. VII. 4) । " यः श्रुतेन हृदयेन" (ब्रा. III. 7. 6) ॥

(मू) गण् माच्योर्ध्वं श्रुतः श्रुष्टी श्रुधी[1] श्रुत् श्मश्रु शुश्रुवान् ।१९।

'गण्', 'माच्य' एवंपरः श्रुतशब्द उकारवान् । यथा— " इन्द्रो नाम श्रुतो गणे" (ब्रा. III. 7. 9) । " कर्णयोः श्रुतं माच्योढ्वम् " (आ. X. 9) । श्रुष्टी, श्रुधी, श्रुत्, श्मश्रु, शुश्रुवान्, एते शब्दा उकारवन्तः । यथा–"श्रुष्टीतोअस्य" (ब्रा. II. 5. 3) । " श्रुधी हवमद्या च मृडय " (II. 1. 11) । "श्रुत् कर्णं सप्रथस्तमम् " (IV. 2. 7) । " प्रतिश्रुत्कायै " (V. 5. 14) । " अश्रुभिः पृष्वाम् " (V. 7. 20) । " धूर्षा ह्यावनश्रू " (I. 2. 8) । " यच्छ्मश्रुणः " (II. 1. 1) । " शुश्रुवान् ग्रामणीः " (II. 5. 4) । एवं पूर्व इति किम्? " अशृतासः शृतासश्च " (आ. I. 14) । " शृत उत्स्नाति " (ब्रा. III. 7. 5) । " वेदिर्बर्हिः शृतँ हविः " (ब्रा. III. 7. 6) । " शृतेन प्रातःसवने " (ब्रा. 1. 4. 7) । "तच्छृतस्यैव पूर्वस्य " (II. 5. 3) । इत्यादिषु ऋकारः[3] ॥

(मू) द्वित्वं चाप्यृतवो यज्ञो[4] वेतः पूर्वं श्रितः सइत् ।

'ऋतवः', 'यज्ञः', 'वेतः', एवंपूर्वः श्रितशब्दः सइत् इकारवान् । यथा—" क मासा ऋतवः श्रिताः " (आ. I. 8) । " यत्रैव यज्ञः

---

१ 'च्योढवश्रु' क. 'च्योर्ध्वं श्रुत्कश्रुष्टिश्रुधिश्मश्रुणश्शुश्रूर्ध्वं उत् ।' ग. २ 'श्रुधिश्मच शुपूर्वं उत । अनश्रू अश्रूभिश्चैतावुवन्तो परिकीर्त्तितो । जुहुत्यप्याहि' घ. ३ इतोऽनन्तरम्, " अनश्रू अश्रुभिश्चैतावुवन्तावारि कीर्त्तितः ।" अनश्रू, अश्रुभिः, उवन्तौ उकारवन्तौ शब्दौ । यथा—" धूर्षाह्यावनश्रू " (I. 2. 8.) । " अश्रुभिः पुष्वान् " (V. 7. 20) ।" इत्यधिकं दृश्यते : ख । परं त्विदं पूर्वपद्ये 'श्रुत' इत्यनेन सिद्धमेव । ४ 'यज्ञः सर्वतः पूर्वतः श्रितः ।' ग.

श्रितः" (II. 6. 9)। "यज्ञोऽसि सर्वतः श्रितः" (ब्रा. III. 7. 6)। अपि च यत्र द्वित्वं तत्रापि 'श्रित' शब्दे इकार एव। यथा—"अग्निर्मे वाचि श्श्रितः" (ब्रा. III. 10. 8)। "अग्निरसि पृथिव्याँ श्श्रितः" (ब्रा. III. 2. 1) "तपोऽसि लोके श्श्रितम्" (ब्रा. III. 1. 11)। "पृथिव्याः ककुभि श्श्रितम्" (ब्रा. III. 3. 2)। "अभितो दिक्षु श्श्रिताः" (IV. 5. 1)। "चन्द्रमसि श्श्रितम्" (म. II. 13)। इत्यादि ॥

(मू) परिन्य॑यो[1] वचोर्ध्वे च स्रुति शब्दश्च सस्रुषः ॥ २० ॥
स्रुक् प॑दे[2] स्रुष्वुकारः स्या॑त्[3]ससृवां स न विद्यते।

'परि', 'नी' 'अयः' एवंपूर्वे सति स्रुत्शब्दः उकारवान्। वकारचकारपरे सति स्रु इत्युकारवान्। अन्योऽपि यथोक्तमुकारवान्। यथा— "परिस्रुता पयसा" (ब्रा. II. 6. 4)। "अञ्जसायनी स्रुती" (VII. 3. 7; VII. 4. 2)। "दीक्षितत्वाय स्रुचा" (VI. 1. 2)। "स्रुवं च स्रुचश्च" (ब्रा. III. 2. 9)। "स्रुवस्य बुध्नेन" (ब्रा. III. 7. 2)। "स्रुचमास्यस्व" (II. 5. 9)। स्रुतिशब्दे यथाशब्दग्रहणात्। "नमः स्रुत्याय च" (IV. 5. 7)। "अश्वान् सरिष्यतः सस्रुषश्च" (ब्रा. I. 3. 6)। "तस्य चित्तिः स्रुगासीत्" (ब्रा. II. 2. 4)। "चित्तिः स्रुक्" (आ. III. 1)। स्रुक्पदमिति किम्? "सृकँ सँशाय" (I. 6. 12)। "सृकावन्तः" (IV. 5. 11)। "भागधेयेनोपसृतः" (II. 1. 4)। "विमाथं कुर्वते वाजसृतः" (ब्रा. I. 3. 8)। ससृवांसमित्यत्र वकारपरत्वेऽप्युकारो नास्ति। यथा—"वाजँ ससृवाँसः" (I. 7. 8)। इत्यादिषु उकारो न स्यात्। किं तु ऋकार इति विज्ञेयः ॥

(मू) षान्तः प्रुट् प्रुक्ति चोर्ध्वश्च वाग्भ्रू शुभ्रु च शत्रु च ॥ २१ ॥

स्पष्टोऽर्थः। यथा — "विप्रुड्भ्यो हि ते" (आ. I. 23)। "घृतप्रुषस्त्वा" (ब्रा. I. 2. 1)। "उदप्रुतो नव यः" (III. 4. 11)। इति च तत्संबन्धात्। "सलिलः प्रप्लुतः" (IV. 4. 9) इत्यत्र उपपदे लकारस्य संदेहाभाव

---

1 'न्यधो वं' ग्र. 2 'दं' क. ख. 3 'स्यान्न सस्रुवांस चैव तु' ग. 4 'यः। परिन्ययोर्वचोर्ध्वे इति पाठं स्रुतिग्रहणं व्यर्थम् ॥' ख.

एव । षान्त इति किम्? "यत्पृषदाज्यम्" (VI. 3. 10)। क्ति च एवंपरो म्रु इतिशब्द उकारवान्। यथा — "निम्रुक्तिमरूपेण" (V. 7. 19)। "निम्रुचश्च" (I. 5. 10)। वाग्ब्रू, शुभ्रू, शत्रु अत्र चोकारः। यथा — "इति ब्रूयात्" (I. 5. 8)। "तावब्रूताम्" (II. 6. 7; VI. 4. 8; VI. 4. 10)। "तेऽब्रुवन्" (ब्रा. I. 6. 7, III. 2. 3)। 'वाक्' इति किम्? "बृहस्पतिः" (I. 2. 2, VI. 4. 10)। "गोष्वश्वेषु शुभ्रुषु" (ब्रा. II. 4. 4)। "शत्रू यतो हन्ता" (I. 6. 5)। एतेषु उकारः॥

(मू) भ्रुमिं भ्रुवि[1]ग्रुमुष्टिश्च क्षामन्रुरुच वव्रु रुत्।

भ्रुमिम्, भ्रुवि, ग्रुमुष्टिः, क्षामन्रुरुच, वव्रु, रुत्, इत्यत्र रेफात्पर उकारः। यथा— "भ्रुमिं धमन्तः" (ब्रा. II. 5, 5)। 'यवानबर्हिर्भ्रुवि केसराणि" (ब्रा. II. 6. 4)। वैग्रुमुष्टिः" (V. 4. 5)। "क्षामन्रुरुचे" (IV. 6. 1)। "गोमन्तमुशिजो विवव्रुः। दृशानो रुक्मः" (IV. 2. 2)। इत्यादिषु उकारः। अत्र किम्? "नमः क्षत्तृभ्यः" (IV. 5. 4)। "मातृवोः शुचिः" (ब्रा. II. 4. 3)। "असंमृष्टोऽसि" (I. 3. 3)। "न संभृत्याः" (ब्रा. I. 3. 1)। "आश्रृणामि ते" (VII. 3. 11)। एषु ऋकारः।

(मू) शतमित्त्यान्[2] च मामस्मान् पूर्वं[3] नादुत्वमुच्यते॥ २२॥

'शतमित्', 'त्यान्', 'माम्', 'अस्मान्', एतत्पूर्वं नकारात् पर उकारः[4]। यथा —"शतमिन्नु शरदः" (म. II. 4)। "त्यान्नु क्षत्रियान्" (II. 1. 11)। "मान्नु यजस्व" (ब्रा. III. 12. 2)। "अस्मान्नु यजस्व" (ब्रा. III. 12. 2)। एवंपूर्वादिति किम्? "अस्मिन् यज्ञे" (I. 7. 1)॥

(मू) जुह्वत्यप्याहि जुह्वेऽन्त्यस्वारो[5] गृह्णोपभोत्तरे।

उकारवान् जुह्वशब्दः संधानं परतो न चेत्॥ २३॥

अन्त्यस्वारः अन्त्यस्वरितः गृह्णात्युत्तरः उपभोत्तरश्च जुह्वशब्दः जुह्वाशब्दश्च उकारवान्। यथा —"भुवनानि जुह्वत्" (IV. 6. 2)। "समग्रास्तो जुह्वो

---

१ 'विभ्रमु' ग. २ 'स्यां च' ख. 'त्यां च मामस्तात्' ग. ३ 'र्वान्नादु' ख. ग. ४ भवतीति शेषः। ५ 'स्वरो' ख.

जातवेदः ” (ब्रा. II. 5. 2)। “ तपूँष्यग्ने जुह्वा पतङ्गान् ” (I. 2. 14)। “ आजुह्वानः ” (III. 7. 7, IV. 6 3)। “ वाजप्रसवीयं जुह्वति ” (V. 4. 9)। आहिपूर्वे जुह्व इत्युकारवान्। “ दुर्मद आहि जुह्वे ” (ब्रा. II. 5. 4)। ‘ अप्य ’ शब्दात्परः जुह्व इत्युकारवान्। यथा — “ तप्यमाना अजुह्वतीः ” (ब्रा. 1. 4. 9)। “ चतुर्जुह्वां गृह्णाति ” (ब्रा. III. 3. 5)। “ जुह्वामुपभृतम् ” (ब्रा. III. 3. 9) । अत्र किम्? “ जिह्वा संधानम् ” (आ. VII. 3)। अयमन्त्यस्वारितवान्, नाप्युकारवान्। न च ‘ संधानं ’ परत्वात्। “ स्वदया सुजिह्व ” (ब्रा. III. 6. 3)। “ सोऽजिह्वो असश्चत ” (आ. I. 11)। “ जिह्वा पवित्रम् ” (ब्रा. II. 6. 4)। “ त्वां जिह्वाँ शुचयः ” (ब्रा. II. 7. 12)। “ अग्नेर्जिह्वाऽसि ” (I. 1. 10)। इत्यादिषु इकारः ॥

(मू.) देवानां त्वे क्रतुं चासौ यजमानेषु [2]षान्तदुत्।

“ देवानाम् ” (VII. 5. 8)। “ त्वे क्रतुम् ” (III. 5. 10)। “ असौ ” (VII. 3. 10)। एष्वनुवाकेषु ‘ यजमानेषु ’ इत्यत्र ष उकारवान्। देवानां वा अन्तमित्यत्र यथा –“ यजमानेषु दधति सर्वा ऐन्द्रियो भवन्ति ” (VII. 5. 8)। त्वेक्रतुमित्यत्र यथा —“ यजमानेषु दधति प्रायणीये ” (III. 5. 10)। असौ वाऽऽदित्योऽस्मिन्नित्यत्र यथा – “ यजमानेषु दधति यत्पराचीनानि ” (VII. 3. 10)। [3]अत्र किम्? “ प्राणानेव यजमाने दधति तस्मै त्वा ” (III. 5. 9.) इत्यादि ॥

— ऊ —

(मू.) भूतेभ्यः प्रोक्षति तस्माद्विभू[4]र्देवायतः परे ॥ २४ ॥

‘ प्रोक्षति ’ इति पूर्वनिमित्तम्। ‘ तस्मात् ’ इति पदच्छेदः। उकार इत्यध्याहार्यः। तस्मात्सांहितो निमित्तः। प्रोक्षति, तस्मात्, विभूः, देवा, यतः एतादृशनिमित्तपरः ‘भूतेभ्यः’ उकारवान्। यथा— “ विश्वेभ्यस्त्वा भूतेभ्य इति प्रोक्षति ” (ब्रा. III. 8. 7)। “ भूतेभ्य इत्याह तस्मादश्वमेधयाजिनम् ”

---

१ “ पश्रुतं ” । अन्त्यस्वारोऽपि संस्थानं परतश्चेदुकारो न । किंत्विकार एव । “ जिह्वासस्थानम् ” ख. २ ‘ षान्तरुक् ’ ख. ‘ न्त उत् ’ घ. ३ ‘ एष्विति किम् ’ ख. ४ ‘ भुर्दे ’ फ.

(ब्रा. III. 8. 7) । " विश्वेभ्यस्त्वा भूतेभ्यः (VII. 1. 11) विभूर्मात्रा " (VII. 1. 12) । " विश्वेभ्यस्त्वा भूतेभ्यो देवाः " (VII. 1. 12) । " विश्वेभ्यस्त्वा भूतेभ्यो यतः प्रजाः " (III. 5. 8) । एवंपरं इति किम् ? । "विश्वेभ्यस्त्वा देवेभ्यः (I. 4. 10) त्रिंशत्त्रयश्च" (I. 4. 11) । "विश्वेभ्यस्त्वा देवेभ्य इति पूतभृतम् " (III. 2. 1) । इत्यादि ॥

— ऋ —

(मू) वृष्टयहृत ऋकारः स्याद् [1]विवा यस्य ह ऋध्यते ।

यथा— ' वृष्टिसनीः ' (V. 3. 10) इत्यनुवाके ' अह्वत ' शब्दः ऋकारवान् । यथा— " अह्वत एवास्याग्निः " (V. 3. 10) । अत्र किम् ? " अहुतमसि हविर्धानम् " (I. 1. 4) । " अहुताः स्वर्गे " (आ. II. 6) । " अहुतो यज्ञः " (I. 1. 12) । " विवा एतस्य यज्ञ ऋध्यते यस्य हविः " (III. 4. 1) इत्यत्र 'ऋध्यते' । हविरिति किम् ? " विवा एतस्य यज्ञश्छिद्यते यस्य पृषदाज्यम्" (III. 2. 6) ॥

इतः परं ऌकारसहितपदान्युच्यन्ते—

— ऌ —

(मू) अक्षरान्त[2]ऌकारो यः स्वरो ज्ञेयो विचक्षणैः ॥ २५ ॥
उदाहृतः कॢप्तशब्दे न पदाद्यन्तयोः स्वरः ।

अक्षरान्तम् ऌकारो भवति । यथा— " जुहोत्यकॢप्तस्य कॢप्त्यै " (V. 4. 8) । अत्र ऌकारः [3]स्वारः । पदादौ पदान्ते च ऌ इति स्वरो नास्ति । 'न पदाद्यन्तयोः' इति किम् ? " यदुल्लतो लक्ष्मिया " (II. 1. 5) । " वहिस्ते अस्तु बाल् " (III. 3. 10) इति ॥

---

१ ' विवै हविर्यज्ञस्य ऋध्यते । ' क. 'विवै हविऋ ऋध्यते ' ग. 'वैस्य हविर्यज्ञस्यऋ ' घ.
२ ' न्तं ऌ ' ख. ३ ' स्वरः ' ख.

— ए —

(मू) [1]बद्धेने सा भवे मैच येन्त एकादशत्रयम् ॥ २६ ॥

'वद्धेम्' (VI. 2. 9), 'सोत्तरवेदिः' (VI. 2. 8) एष्वनुवाकेषु एकारः एकारान्वितशब्द इत्यर्थः । यथा —"सुवर्गमेवैने लोकं गमयति" (VI. 2 9) । बद्धमिति किम्? "एवैनं लोकं गमयति" (VI. 6. 1) । "अभिभवेमेति ते जुहवुः" (VI. 2. 8) । सोत्तरवेदिरिति किम्? "अभिभवामेति सोऽब्रवीत् । वरं वृणै" (VI. 3 10) । "एकादशकपालानेव प्रातः सवने कुर्यात् । एकादशकपालान्माध्यंदिने सवने । एकादशकपालाँस्तृतीयसवने" (ब्रा. I. 5. 11) । अन्त एकादशत्रयं इति किम्? "अष्टाकपालान्प्रातःसवने" (ब्रा. I. 5. 11) ॥

(मू) ग्नीपूर्वतो जुषेतां च प्रथमोऽञ्जन्तिसत्ययोः ।

'अञ्जन्ति' (ब्रा. III. 6. 1), 'सत्य' (III. 5. 1) प्रश्नयोः जुषेतामिति षकारः ग्नीपूर्वः एकारसहितः भवति । जुषेतामिति प्रथमवर्णः तकारः । "होतायक्षदिन्द्राग्नी पुरोडाशस्य जुषेताँ हविः" (ब्रा. III. 6. 8) । एषु षकारः एकारान्वितः । 'ग्नीपूर्व' इति किम्? "अग्निम् । पुरोडाशस्य जुषताँ हविः । होतर्यज" (ब्रा. III. 6. 8) । "गीर्भिर्विप्रः" (ब्रा. III. 6. 9) । प्रथमान्त[3] इति किम्? । "वृत्रहणा जुषेथाम्" (I. 1. 14, ब्रा. II. 4. 8) । "जुषेथां यज्ञं द्रविणम्" (III. 2. 11) । "हर्यतं वृषणा जुषेथाम्" (II. 3. 14) । "वीतं पिबतं जुषेथाम्" (ब्रा. III. 7. 8) ।

एषु एकारयकाराविति चकारार्थः ॥

— ऐ —

(मू) येकेशिनः स[5]ऐकारो [6]न्यैच्छामित्यत्र वर्णितः ॥ २७ ॥

---

१ 'बद्धमेते' क. 'बद्धेने सा भवे मैच' ग. घ. २ बद्धमवस्यतीत्यत्र एने इत्येकारः, सोत्तरवेदिरित्यत्र भवेमेत्यत्र एकारः च भवतीत्यर्थः । ये वै चत्वार इत्यत्र अन्ते एकादशत्रयं भवतीति शेषः । ३ 'अञ्जन्ति सत्ययोरिति किम्?' ख. ४ 'च शब्दार्थः । (ए? ऐ)कारसहितानि पदान्युच्यन्ते' ख. ५ 'संऐ' ख. ६ 'रोप्यै' ख. 'र ऐच्छ' ग. घ.

'ये काशिनः' अस्मिन्ननुवाके ऐच्छब्देऽनैकारः । यथा —"तेभ्यो निधानं बहुधा व्यैच्छन्" (ब्रा. II. 7. 17) । अत्र किम्? "इमा एव ता उषसो याः प्रथमा व्यौच्छन्" (ब्रा. II. 5. 6) ॥

(मू) प्रैयमेधा आसन् नैयग्रोध-प्रैयंगवं तथा ।

यथा —"त्रयो वै प्रैयमेधा आसन्" (ब्रा. II. 1. 9) । आसन्निति किम्? "प्रियमेधा ऋषयः" (ब्रा. II. 5. 8, आ. X. 13) "नैयग्रोध औदुम्बरः" (III. 4. 8) । "नैयग्रोधेन जन्यः" (ब्रा. I. 7. 8) । "प्रैयंगवं चरुम्" (II. 2. 11) ॥

(मू) दोहैं यज्ञं च वैयाघ्रे दैयांपात्यैत्वगा इमे ॥ २८ ॥

यथा —"दोहैं यज्ञम्" (ब्रा. III. 7. 6) । "व्याघ्रो वैयाघ्रेऽधि" (ब्रा. II. 7. 15) । "प्लक्षो दैयांपातिः" (ब्रा. III. 10. 9) । "प्लक्षं दैयांपातिं पृच्छ" (ब्रा. III. 10. 9) । एषु ऐकारः । पातीति किम्? "तेनोदय्यासुरान्" (ब्रा. II. 2. 7) । अत्र किम्? "रय्यै पोपाय" (IV. 4. 5) । "अनपजय्यमभ्यजयन्" (I. 7. 5, V. 2. 1) । इत्यादिषु[1] अकारपूर्वयकारस्य द्वित्वम् ।

(मू) ब्रह्मवर्प्रेन्द्रियं चेन्द्रि पशून्वीर्यमनुपरः ।
मुखतो ज्योतिरूर्जाय एवास्मै चैवमैद भवेत् ॥ २९ ॥

एषु[3] अस्मैशब्दः ऐकारान्वितः स्यात् । अत्र निमित्तानि —'ब्रह्मवर्प्र', 'इन्द्रियं च', 'इन्द्रियं पशून्', 'इन्द्रियं वीर्यमनु' । ऐकारस्य परनिमित्तानि । मुखतआदिपूर्वश्च । यथा— "संवत्सर एवास्मै ब्रह्मवर्चसं प्रयच्छति" (II. 1. 2) । प्रेति किम्? "एवास्मिन् ब्रह्मवर्चसं दधाति" (I. 5. 8) । "तेजश्चैवास्मा इन्द्रियं च समीची" (V. 1. 4) । "एवास्मा इन्द्रियं पशून्" (II. 2. 7) । "स एवास्मा इन्द्रियं वीर्यमनु प्रयच्छति" (II. 2. 1) । "मुखत एवास्मा अन्नाद्यं

---

१ 'षु पूर्वयकारस्य द्वित्वम् ।' ख. २ 'ह्मवर्चेन्द्रि' ग. 'ह्मवर्चसंप्रेन्द्रि' घ. ३ 'ब्रह्मवप्र, इन्द्रियं च, इन्द्रियं पशून्, इन्द्रियं वीर्यमनु, एवंपरः; मुखतः, ज्योतिः; ऊर्जाय, एवंपूर्वो वा एवास्मै इति ऐकारवानित्यर्थः ।

दधाति " (V. 6. 3) । " ज्योतिश्चैवास्मै राष्ट्रं च समीची दधाति " (ब्रा. III. 9. 4) । " ज्योतिरेवास्मा उपरिष्टाद्दधाति " (ब्रा. III. 3. 7, V. 1. 8) । " ऊर्जं वास्मा ऊर्जम् " (II. 1. 1) । एषु ' अस्मै ' इत्यैकारवान् । अत्र किम्? " तेज एवास्मिन्ब्रह्मवर्चसं दधाति " (I. 5 8) । " एवास्मिन्निन्द्रियं दधाति " (II. 1. 6) । " ता एवास्मिन्निन्द्रियं वीर्यं दधति " (II. 3. 7) । " जगत्यैवास्मिन्पशून्दधाति " (II. 2. 5) ॥

(मू) त्रीन्, ब्रह्म व्यग्नि, चेन्द्राग्नी, मेदसैश्च पुरोहविः ।

' त्रीँस्तृचान् ' (II. 5. 10), ' ब्रह्म ' (VI. 1. 9, ब्रा. II. 1. 5), ' इन्द्राग्नी ' (V. 3. 2), ' मेदसा ' (VI. 3 11), ' पुरोहविः ' (VI. 2. 6) । एषु अनुवाकेषु एवास्मै इति ऐकारः[३] ॥ " त्रिष्टुभैवास्मा इन्द्रियं परिगृह्णाति " (II. 5. 10) । " रूपेणैवास्मै पशूनवरुन्धे " (ब्रा. II. 1. 5) । " रूपेणैवास्मै पशूनवरुन्ध्ये । पशुमानेव भवत्यपाम् " (VI. 1. 9) । " रूपेणैवास्मै पशूनवरुन्धे । पशुमानेव भवति । प्रजापतिर्यज्ञमसृजत " (VI. 3. 11) । " रूपेणैवास्मै पशूनवरुन्धे । पशुमानेव भवति । निर्ऋतिगृहीते " (VI. 2. 6) ॥

— औ —

(मू) एनौ विवा इन्द्रस्यायुरादावन्तेऽग्नयेऽन्नवत् ॥ ३० ॥

' विवा एतौ ' (V. 2. 4), ' इन्द्रस्य वज्रोऽसि वार्त्रघ्नः ' (V. 7, 3), ' आयुर्दा अग्ने ' (III. 3. 8), आदौ ' अग्नयेऽन्नवते ' (II. 2. 4) — अन्ते एष्वनुवाकेषु एनौ इत्यौकारः स्यात् । यथा— " प्रिययैवैनौ तनुवा सँशास्ति " (V. 2. 4) । " एवैनौ समर्धयत्यथो एताम् " (V. 7. 3) । " जुहुयादाहुत्यैवैनौ शमयति " (III. 3. 8) । आयुर्दा इति किम्? " यत् प्रदाव्यः स एवैनं स्वदयति " (III. 3. 8) । अग्नयेऽन्नवत इत्यत्र यथा — " निर्वपति भागधेयेनैवैनौ शमयति "

---

१ ' ह्माप्यग्निचेन्द्राग्नी मेदसै च पु ' ग. २ ' ह्मवादिनो वदन्ति विचिन्त्यः । ब्रह्मवादिनो वदन्ति । अग्निहोत्रप्रायणाः । इन्द्रा ख. ३ ' रः भवतीत्यर्थः ' ख. ४ ' रादौ पष्ठेऽग्नये ' घ.

(II. 2. 4) । एवैनावित्यत्र औकारः । एषामादाविति किम्? " एवैनं निर्ऋति-पाशात् " (V. 2. 4) । " प्रियायामेवैनां तनुवाम् " (V. 7. 3) । " एवैनँ स्वदयत्यह्वाम् " (III. 3. 8) । अत्रान्त इति किम्? "एवैनामन्नवन्तं करोति " (II. 2. 4) ॥

(मू) स्फ्येन यां परि घर्मापनुत्त्यै तेषां पराणुत्त्यै ।

' स्फ्येन वेदिम् ' (VI. 6. 4), ' यां वा अध्वर्युः ' (III. 5. 9), ' पर्यग्नि करोति ' (VI. 3. 8), ' घर्मयाते ' (आ. V. 9), एषु अनुवाकेषु । " भ्रातृ-व्यापनुत्त्ये " (VI. 6. 4, III. 5. 9, VI. 3. 8, आ. V. 9.) ॥ " तेषा-मसुराणाम् " (VI. 2. 3) इत्यत्र "भ्रातृव्यपराणुत्त्यै" (VI. 2. 3)। अन्यत्र " भ्रातृव्याभिभूत्यै " (II. 6. 1) ॥

— क (प) —

इत उत्तरं ककारादिप्रथमान् वक्ष्यामः ।

(मू) अन्तःस्थाभ्यः पवर्गाच्च स्वरेभ्यः पूर्वतः[2] स्थितौ ॥ ३१ ॥
त्रिष्टुक्शब्दस्तथाऽनुष्टुक् ककारान्ताविती रितौ ।

स्वरपवर्गान्तःस्थासु परतः त्रिष्टुप् अनुष्टुप् इत्येतौ त्रिष्टुक् अनुष्टुक् इति ककारान्तौ स्तः । यथा– " त्रिष्टुगोज एव वीर्यम् " (VII. 1. 4)। " त्रिष्टुग्भवति " (ब्रा. III. 3. 9) । " त्रिष्टुग्राका जगती " (III. 4. 9)। " अनुष्टुगानुष्टुभः " (VII. 4. 4) । " अनुष्टुगनुष्टुप् " (II. 5. 10) । " अनुष्टुक्प्रथमा भवति " (ब्रा. I. 8. 8) । " अनुष्टुग्वाचैवैनाः " (VI. 4. 2) ॥ एवंपर इति किम्? " त्रिष्टुब्जगती " (V. 2. 11) " अनुष्टुप्छन्दसाम् " (II. 5. 10) ॥

(मू) अन्यत्र तु पकारान्तावेताविति[3] विनिश्चितौ ॥ ३२ ॥

---

१ ' ते दिवि शुगित्यत्र यथा —अपहर इत्याह भ्रातृव्यापनुत्त्यै । घर्मेनत् । एष्विति किम्? घर्म यजमानाय भ्रातृव्याभिभूत्यै । तेषामसुराणाम् । अस्मिन्ननुवाके पराणुत्त्यै स्यात् । तेषामसुराणामिति यथा—भ्रातृव्यपराणुत्त्यै नान्यामाहुतिम् ॥ इतः परं ' ख. २ ' पूर्व आस्थि ' ग. ३ ' ति च नि ' ख.

पूर्वोक्तादन्यत्र त्रिष्टुप् अनुष्टुप् इत्येतौ पकारान्तौ स्तः । यथा— " इन्द्रियं त्रिष्टुप्तेजसा " (V. 1. 3) । " अनुष्टुप्छारदी " (IV. 3. 2) । " अनुष्टुप्-सर्वामेव वाचम् " (VII. 4. 4) ॥

(मू) प्राणानामिति च ग्रैष्मी पदयोः परभूतयोः ।
पूर्वस्य तु विधेस्तत्र वैपरीत्यमिति स्थितिः ॥ ३३ ॥

यथा— " अनुष्टुप् प्राणानाम् " (V. 3. 8) । अस्य पकारे परे सति ककारे प्राप्ते पकार उक्तः । ग्रैष्मी । अत्र यथा– " त्रिष्टुग्ग्रैष्मी " (IV. 3. 2) । अस्य कवर्गे परे सति पकारे प्राप्ते ककार उक्तः ॥

(मू) चक्षे सू श्रद्धऊर्ध्वे क उत्करोऽन्तोच्च एव कः ।

सू, श्रद्धे, एवंपरः चक्षे इत्यत्र ककारः । अन्तोदात्त उत्करशब्दश्च ककार-सहितः । यथा– " वरुणस्याभिचक्षे । सूर्योरूपम् " (ब्रा. II. 8. 7) । "अस्मै सूर्याचन्द्रमसाभिचक्षे । श्रद्धे कमिन्द्र " (ब्रा. II. 8. 9) । अनयोः ककारः । एवंपर इति किम्? " विश्वान्यन्यो भुवनाभिचष्टे । ऋतूनन्यो विदधत् " (ब्रा. II. 7. 12; ब्रा. II. 8. 9) । उत्करशब्दो यथा— " उत्करो वाव तस्य प्रतिष्ठा " (ब्रा. III. 3. 2) । " तमुत्करे " (ब्रा. III. 3. 11) । " मरव उत्करः " (आ. V. 1.) । अत्रापि ककारः । अन्तोच्च इति किम्? यथा— " अयजमानादुत्तरः " (II. 6. 5, VI. 2. 10) ॥

— कृ – गृ —

(मू) विष्टुतं कृष्टशब्दश्च पच्योर्ध्वः षात् परस्तु टः ॥ ३४ ॥

विष्टुतम्, कृष्टशब्दः, अनयोः षात् षकारात्परः टकारः । यथा — " प्रस्तुतं विष्टुतँ " (ब्रा. III. 10. 4) । " गृणन्ति देवकृष्टयः " (II. 6. 11) । " कृष्टे भवति कृष्टे हि " (V. 2. 5) । कृष्टेत्यत्र पच्यशब्दः परोऽपि षात्परः टकारः । यथा– " कृष्टपच्यं च मे " (IV. 7. 5) । " अकृष्टा ये च कृष्टजाः "

---

१. ' वरेत्र ' ख. ग. घ. २. ' स्थलो ' ग. ३ ' श्रगा ' ख. ' र्ध्वे ख. उत्करान्तो ' घ. ४ ' टकार ' ख. ५ ' र्ध्वे पुरुषोऽपिदः अकृष्टा कृष्टयः कृष्टीः कृष्टजा कृष्टजास्तथा ॥ '

(आ. I. 27) । " मित्रः कृष्टीः " (III. 4. 11) । " यत् कृष्टं चाकृष्टं च " (V. 2. 5) । " अतिकृष्टाय " (ब्रा. III. 4. 1) इति च । एषु षकारात्परः टकारः । तत्संबन्धात् शब्दग्रहणं बहूपादानार्थम् । अत्र किम् ? " अभ स्म ते व्रजनं कृष्णमस्ति " (IV. 4. 3) । " द्वे कृष्णे " (V. 3. 1.) । अत्र णकारसहितः ॥

(मू) त्वष्ट्रे[1] वस्वग्नये प्रातर्मत्या अष्टाकपालमत् ।

त्वष्ट्रे, वसु, अग्नये, प्रातः, मत्यै, एवंपूर्वः अष्टाकपालमिति षकारात्परः टकारः । यथा -- " त्वष्ट्रे चित्रायै पुरोडाशमष्टाकपालम् " (ब्रा. III. 1. 4) । " वसुभ्यः श्रविष्ठाभ्यः पुरोडाशमष्टाकपालम् " (ब्रा. III. 1. 5) । " अग्नये पथिकृते पुरोडाशमष्टाकपालम् " (II. 2. 2) । " प्रातःसवनस्याकाले + + यदष्टाकपालो भवति " (II 2. 9) । " कामो नमत्यग्नये यविष्ठाय पुरोडाशमष्टाकपालम् " (II 2. 3) । अनुमत्यै पुरोडाशमष्टाकपालम् " (I. 8. 1, ब्रा. I. 6. 1) । एषु षकारात् टकारः । एवंपूर्व इति किम् ? " दक्षिणा + + अग्नीषोमीयमेकादशकपालम् " (I. 8. 1, ब्रा. I. 6. 1) इत्यादि ॥

(मू) वैश्वानरश्च जुष्टोऽम्बे[2] शं नोऽग्निर्नश्च तारिषत् ॥ ३५ ॥

" वैश्वानरः " (I. 5. 11); " जुष्टः " (ब्रा. II. 4. 1); " अम्बे " (II. 4. 19); " शं नः " (आ. IV. 42); " अग्निर्नः " (ब्रा. III. 1. 1); एषु अनुवाकेषु 'तारिषत्', इति तकारान्तः । यथा[3]— " आयूँषि तारिषत् । आदधिक्राः " (I. 5. 11) । " तारिषत् । त्वमग्ने अयासि " (ब्रा. II. 4. 1) । " तारिषत् । आपो हि ष्ठा " (VII. 4. 19) । " तारिषत् । इन्द्रस्य गृहोऽसि " (आ. IV. 42) । एषु तकारान्तः ॥ अत्र किम् ? यथा ––

---

१ त्वष्ट्रे वस्व ' ग. 'ष्ट्रेव ' क. 'ष्ट्र वस्वग्नयेप्रातर्मन्यग्न्यष्टा ' ग. 'त्वष्टाव ' घ. २. 'म्बे घोषोऽग्निर्नारिषत्तथा ' ख. घ. 'म्बे घोषोऽग्निर्नश्च तारिषत् ' ग. ३. 'था वैश्वानरो न उत्येत्यत्र–प ण आयूँषि तारिषत् । आदधिक्राः । जुष्टो दमूना इत्यत्र यथा–प्रण आयूँषि तारिषत् । आपो हि ष्ठ । शन्नो वातः पवतामिति यथा–प्र ण आयूँषि तारिषत् । इन्द्रस्य गृहोऽसि । अग्निर्नः पातु कृत्तिका इत्यत्र यथा–रीरिषन्मोत वीरान् । हेती रुद्रस्य । एष्वनुवाकेष्विति किम् ? प्र ण आयूँषि तारिषः । अनुमन्यताम् । रीरिषो मोत वीरान् । इदमूनु ।' ख.

" क्रत्वे दक्षाय नो हिनु । प्र ण आयूँषि तारिषः " (ब्रा. III. 3. 1) । अत्र षकाराकारविसर्जनीयाः ।

(मू) परापात्वेभ्यएवैंनत् ब्रह्माद्येकाप एव तः[1] ।

परा, एवंपूर्वः पातुकेति तकारः स्यात् । यथा– "परापातुका स्यात् । नीतासु । परापातुकाः स्युः क्रीते " (VI. 1. 3) । एवंपूर्व इति किम् ? " गर्भाः प्रपादुकाः स्युरथो यथा " (V. 6. 9) । अत्र दकारः । " ब्रह्मवादिनो वदन्त्यद्भिः " (II. 6. 5), " एकविंशत्या माषैः " (V. 1. 8) । " आपो देवीः " (ब्रा. III. 3. 6) । एष्वनुवाकेषु ' एनत् ' इति तकारान्तः । ब्रह्मवादिनो वदन्त्यद्भिरित्यत्र यथा— " उक्षत्तेभ्य एवैनल्लोकेभ्यः " (II. 6. 5) । एकविंशत्या माषैरित्यत्र यथा– " एभ्य एवैनल्लोकेभ्यो वृङ्क्ते " (V. 1. 8) । आपो देवीरित्यत्र यथा– " एनल्लोकेभ्यः प्रोक्षति । अथ ततः सह स्रुचा " (ब्रा. III. 3. 6) । अत्रापि एनत् तकारान्तः । आदौ[3] इति किम् ? । " एभ्य एवैनल्ँ लोकेभ्योऽनक्ति" (II. 6. 5) अत्र सानुनासिकः ॥

(मू) विदुषो हविषा चैनत् वेदत्पशुर्ऋतव्यतः ॥ ३६ ॥

" यस्यैवं विदुषोऽग्निहोत्रं जुह्वति । य उ चैनदेवं वेद " (ब्रा. II. 1. 8), " य एतेन हविषा यजते । य उ चैनदेवं वेद " (ब्रा. III. 1. 4, 5, 6 III. 12. 2) । एतयोः विदुषः, हविषा, एवंपूर्वः, एनदित्यत्र तकारः स्यात् । यथा— " विदुषोऽग्निहोत्रं जुह्वति य उ चैनदेवं वेद " । " हविषा यजते य उ चैनदेवं वेद " । एवंपूर्व इति किम् ? " य एतेन यजते । य उ चैनदेवं वेद । " (ब्रा. II. 7. 5, 6) । " पशुर्वा एषः " (V. 2. 10) , " ऋतव्या उपदधाति " (V. 4. 2) । एतयोः अनुवाकयोः वेददिति तकारः । " एवं वेददिति प्राणभृत उपदधाति " (V. 2. 10) । " एवं वेददिति संवत्सरो वै " (V. 4. 2) । अनयोरिति किम् ? " य उ चैनमेवं वेद । भूतेष्टकाः " (V. 6. 3) । " य उ चैनामेवं वेद सृष्टीः । य उ चैना एवं वेदातिच्छन्दसम् " (V. 3. 6) ॥

---

१. (मू) ' ब्रह्मवादिनोऽद्भिः, प्रथममे, कविंशत्यापोदेवीरं, भ्यएवैंनत् ' । इति पाठान्तरम् । क. २. ' एवैनत् ' ख, ३ ' एष्विति किम् ? ' ख. ४. ' इति तकारः ' ख. ५ ' षा य उ चैनत् पशुऋतव्य वेदादित् ' ग. ' षा चैनत् प ' घ.

— स्तृ – स्पृ – स्मृ —

(मू) थमेनात्मानं स्पृणुत स्पृणोति स्पृत सांहितः ।
प्राणानां स्पृत्यै द्वावेव लोकस्पृते ब्रह्मस्पृतम् ॥ ३७॥

'थमेन', 'आत्मानम्', एवंपूर्वः स्पृणुतशब्दः पकारसहितः । स्पृणोतीति कण्ठोक्तश्च पकारसहितः । संहितायां विद्यमानः स्पृत इति शब्दश्च तथा । यथा—" प्राणमेव प्रथमेनास्पृणुत " (VI. 5. 5) । " प्रथमेन स्पृणुतेऽपानम् " (VI. 5. 5) । " य एवं विद्वानेते आत्मानँ स्पृणुते " (आ. VIII. 2) । " अग्निमेव तत्स्पृणोति " (V. 6. 9) । एषु सकारात्परः पकारः । अत्र किम् ? " ताभ्यामेव भ्रातृव्यँ स्तृणुते " (I. 6. 11) । इत्यादिषु सकारात् परः तकारः । " प्राणानाँ स्तृत्यै " (V. 2. 8) । " द्वावेव देयौ । लोकस्पृते लोकम् " (VII. 5. 24) । " ब्रह्मस्पृतं त्रिवृत्स्तोमः " (IV. 3. 9) । सकारात् परः केवलपकारः अत्रापि । संहितायामिति किम्? यथा— " शुभया स्मृत्या संयुनक्तु " (आ. X. 12) " प्रैषकृत्प्रथमः स्मृतः " (आ. I. 3.) । अत्र मकारसहितः[3] सकारः ॥

— घा – खा —

(मू) सघा चतुर्थो नोदेऽसि सघ्यासं लान्यमेघ च ।

' असि ' ' नोदे ' एवंपरः 'सघा' शब्दः कवर्गीयः चतुर्थवर्णः इति विज्ञेयः । सघ्यासमित्यत्र च । यथा— " सघाऽसि जगती छन्दाः " (III. 2. 1) । " सघा नो देवः सविता सवाय " (ब्रा- II. 8. 6) । " बाहुभ्यां सघ्यासम् " (III. 2. 5) । अत्र किम् ? " सखा सख्या " (III. 5. 11) । अत्र भिन्नपदत्वात् द्वितीयवर्णः । लकारान्यवर्णयुक्तः मेघशब्दः चतुर्थवर्णः । यथा— " मेघ्यो विद्युता " (V. 2. 11) । " मेघायिष्यते स्वाहा " (VII. 5. 11) । लान्य इति किम् ? " मेखला भवति " (VI. 1. 3) । अत्र द्वितीयवर्णः ॥

---

१. ' बृहस्पृतम् ' ख. ' द्वावेव लोकत्रिवृतः परतश्चेत् स्पृतं विदुः । घ. २ ' केवलः सांहित इति किम् ? ' ख. ३. ' मकारान्वितः स ' ख. ४. ' चतुर्थोऽसि सघानोदे स ' ख. ग. घ.

(मू) रघांऽनघाभ्य आघाऽघ प्रघातश्चैव मोघ च॑ ॥ ३८ ॥

'रघा', 'अनघाभ्यः', आघा, अघ, प्रघातः, मोघ एषु चतुर्थवर्णः । यथा— "इयं वाव सरघा" (ब्रा. III. 10. 10)। "परिस्रुता पयसा सारघं मधु" (ब्रा. II. 6. 4)। "अथो रघीयाँसः" (VII. 4. 9)। "द्राघीयाँसौ भवतः" (V. 2. 5)। "स्वाहाऽनघाभ्यः स्वाहा" (ब्रा. III. 1. 4)। "आघा ये अग्निमिन्धते" (ब्रा. II. 4. 5)। "अघस्य त्वा धारया" (आ. IV. 39)। "प्रघातः। आदित्यानाम्" (VI. 1. 1)। "मोघमन्नं विन्दते" (ब्रा. III. 8. 8)। भ्य इति किम्? "ये नखाः" (आ. I. 23)। अत्र किम्? "नखानिर्भिन्नम्" (I. 8. 9)। दीर्घ इति किम्? "मे आख ईयति" (VI. 4. 11)। "मृगाखरे यदि न" (VII. 5. 21)। "आखुस्ते रुद्र" (I. 8. 6)। "निखातं मनुष्याणाम्" (VI. 3. 4)। "खाता हि देवानाम्" (ब्रा. I. 6. 8)। इत्यादि द्वितीयवर्णः ॥

(मू) क्रियाशब्दश्च यत्रैव तदन्यो घन जङ्घ च।

यत्र स्थले 'खनति' इत्यादि क्रियापदं वर्तते तदन्यस्थले 'घन' शब्दः जङ्घशब्दश्च चतुर्थवर्णः । यथा— "त्रिघनः स्वस्तिः" (III. 2. 4)। "अग्निर्वृत्राणि जङ्घनत्" (IV. 3. 13, ब्रा. III. 5. 6)। "जवं जङ्घाभिरगदम्" (V. 7. 13)। अकारान्तगृहीतत्वात् 'जघ्नती' त्यादौ न संदेहः । 'तदन्यः' इति किम्? "निखनतस्तमेवोद्वपाति" (VI. 2. 11)। "मा वो रिषत् खनिता। यस्मै चाहं खनामि वः" (IV. 2. 6)। इत्यादिषु द्वितीयवर्ण इति विज्ञेयः ॥

(मू) पुनस्तुवी प्रतूर्तिश्च त्वावतश्च बृहत्क्वधि ॥ ३९ ॥
स्यन्दता ये वलं विघ्न च नो वसु सुरेतसम् ।
पूर्वो मघैः पितृशब्दः परो वा मघवश्रुतिः ॥ ४० ॥

पुनः, तुवी, प्रतूर्तिः, त्वावतः, बृहत्क्वधि, स्यन्दता, ये, वलम्ः विघ्न, चनः,

---

१ 'रघामघा' क. 'नघाभ्य एवाघ प्र' ग. घ. २. 'चेत्' ख. ग. ३ 'श्च भुवः रु' ख. ४. 'तामवलं' ग. ५. 'मघापि' ग.

[म]घासु, सुरेतसम् एवंपूर्वः 'मघ' इत्यत्र चतुर्थवर्णः । यथा— " स भुवत्पुनर्मघः " (II. 2. 12)। " सहस्रेषु तुवीमघ " (ब्रा. II. 4. 4) । " सुप्रतूर्तिर्मघोनी " (I. 6. 3)। " त्वावतो मघोनः " (II. 2. 12)। " बृहत्कृधि मघोनाम् " (ब्रा. II. 7. 5) । " अपास्मत्स्यन्दतामघम् " (आ. VI. 11)। "पितरो [य]े मघासु" । " स बिभेद वलं मघम् " (ब्रा. II. 6. 13)। " उ च नः [प्र]विद्म मघासु यज्ञम् " (ब्रा. III. 1. 1)। " रक्षा च नो मघोनः " (ब्रा. II. 6. 9)। " आशुक्रमासुराद्वसु मघमिन्द्राय " (ब्रा. II. 6. 13)। " पुरुरूपं सुरेतसं मघोनिम् " (ब्रा. II. 6. 7)। पितृशब्दपूर्वो वा तत्परो मघशब्दः चतुर्थवर्णः । यथा— " पितृभ्यः स्वाहा मघाभ्यः " (ब्रा. III. 1. 4)। " मघा नक्षत्रं पितरो देवता " (IV. 4. 20)। पितृशब्दपूर्वत्वं तत्परत्वमपि [प]रम्परयेति ध्येयम् । यत्र मघव इति श्रुतिः तत्रापि चतुर्थवर्णः । यथा— " मघवद्भ्यस्तनुष्व " (IV. 5. 10)। " मघवा सूरिरस्तु " (IV. 6. 2)। एषु किम् ? " नमोऽग्नये मखघ्ने " (III. 2. 4)। इत्यादिषु द्वितीयवर्णः ॥

— ग – घ —

(मू) त्रीणि[2] प्राणादि विश्वान्यो जिघाँसन् यो जघन्थ च ।

" त्रीणि वाव " (III. 2. 2)। " प्राणो वा एषः " (VI. 5. 8)। " विश्वकर्मा दिशाम् " (V. 5. 5)। एष्वनुवाकेषु गकारः तृतीयवर्णः । यथा— " यज्ञमन्ववाजिगाँसन् " (III. 2. 2)। " सुवर्गं लोकमजिगाँसन् " (V. 5. 5)। " लोकमजिगाँसन्ते सुवर्गम् " (VI. 5. 8) । एतदन्य-

१ 'ता", मघवशब्दः घकारः । श्रुदग्रहणादित्यत्र यत्र श्रवणं तत्र तत्र यथा—" मघवद्भ्यः स्तनुष्व " ' ख.

२ 'त्रीणि विश्वप्राणदन्यो जिघांसन् यो अर्वे जिघन् ।
घातुकं नरमेधेषु स्त्रीषघं जघ घर्म च ॥
ऋकाररेफयुक्तश्च मूर्सशब्दन्तु वर्जयेत् ।
जघद्राघोवघातश्च (घ? स) विषैकाक्षरं पदम् ॥
अखाता खलतीत्यादि फवर्गे च द्वितीयगः ।
विजित्य सुश्रियपरो व्यनृझत्यावर्यतुर्यकः ॥
शुण्ठोष्मयुक्तढठरक(न्धै)भ्योऽन्यो द उच्यते । यदक्रन्द ' ग.

स्थलीयः जिघांसन्निति शब्दः चतुर्थवर्णः । यथा— " त्वष्टारमजिघाँसन्त्सपत्नीः " (VI. 5. 8) । " रक्षाँस्यजिघाँसन्ते सोमेन " (VI. 3. 2) । इत्यादिषु चतुर्थवर्णः ॥ ' यो अर्वन्तम् ' (VII. 4. 15) इत्यत्र जघन्थेत्यत्र चतुर्थवर्णः । यथा— " स्वेना हि वृत्रं शवसा जघन्थ " (VII. 4. 15) । अत्र चतुर्थवर्णः विज्ञेयः । अत्र किम् ? " विश्वा तमुत्सं यत आजगन्थ " (IV. 2. 2) । अत्र तृतीयवर्णः गकारः ॥

(मू) टवर्गेऽपि चतुर्थत्वं वोढवेत्यादिरुच्यते ॥ ४१ ॥

यथा—" अग्ने हव्याय वोढवे " (III. 5. 11) । "नमो रुद्राय मीढुषे" (ब्रा. III. 7. 8) । " मीढुष्टम शिवतम " (IV. 5. 1) । इत्यादौ चतुर्थवर्ण इति विज्ञेयम् । अन्यत्र द्वितीयवर्णः । यथा— " अग्निर्देवानां जठरम् " (ब्रा. II. 7. 12) । " शुण्ठास्त्रयो वैष्णवाः " (V. 6. 16) इत्यादि ॥

— थ – ध —

(मू) यदक्रन्दश्च दीध्यानो भिर्वस्तेधस्तु चर्तुधा[1] ।

" देवद्रीचा मनसा दीध्यानः (IV. 6. 7) । अत्र किम् ? " विश्वा आशा दीद्याना विभाहि " (IV. 6. 5) । " त्वं विशो अनयो दीद्यानः " (ब्रा. III. 6. 10) । " भानुना दीद्यानम् " (IV. 1. 3) । इत्यादिषु तृतीयवर्णः दकारः । भिः, वस्ते, एवं पूर्वे ऋतुधेत्यत्र चतुर्थवर्णः । यथा— " इन्द्रो मरुद्भिर्ऋतुधा कृणोतु " (II. 1. 11) । " ऋतवस्त ऋतुधा परुः " (V. 2. 12) । अत्र[2] किम् ? " या ते गात्राणाम् ऋतुथा कृणोमि " (IV. 6. 9) । " ऋतुथेन्द्रो वनस्पतिः " (ब्रा. II. 6. 12) । इत्यादिषु द्वितीयवर्णः थकारः ॥

— द – ध —

(मू) ब्रह्मन्पश्चान्त्यमेधाश्च तनूवर्चपयोर्ध्वगः[3] ॥ ४२ ॥

---

१ ' स्त घुस्तु च ' ग. २ 'एवम्पूर्व इति किम् ? ' स. ३ ' र्ध्वधाः ' ख. 'तनूर्ध्वौ द्वापरौ चहि ' ग ' तनूर्ध्वौ द्वौ परौच हि ' घ.

" ब्रह्मन्प्रचरिष्यामः" (आ. IV. 5) इत्यत्रान्त्याः पञ्च मेधाशब्दाः चतुर्थवर्णाः । तनूः, वर्चः, पयः एवंपरः धा इति चतुर्थवर्णः । यथा— " तेजो मेधा वर्चो मेधाः + + । यशो मेधास्तपो मेधाः । मनो मेधाः " (आ. IV. 5) । इत्यादि ॥ " आयुर्धास्तनूधाः पयोधाः " (आ. IV. 7) । अत्र 'अन्त्य' इति किम्? " ब्रह्म मे दाः क्षत्रं मे दाः " (आ. IV. 5) । एवंपर इति किम्? " वर्चोदा वरिवोदा द्रविणोदाः " (आ. IV. 7) ॥

— देहि —

(मू) उपायज्ञो येतं[1] ईशा, जी, सी, सू, दक्षि, मेपरः ।
परि, स्यनः, पुनं[2], देहिवेघ्नूर्ध्वे च चतुर्थकः ॥ ४३ ॥

" उप प्रयन्तः " (I. 5. 5) । " अयज्ञो वै " (I. 5. 7) । " ये ते पन्थानः (VII. 5. 24) । एष्वनुवाकेषु 'देहि' इत्यत्र तृतीयवर्णः । यथा— " आयुर्मे देहि वर्चोदाः " (I. 5. 5) । वर्चोदा अग्नेऽसि वर्चो मे देहीत्याह " (I. 5. 7) । " लोकमस्मै यजमानाय देहि " (VII. 5. 24) । ईशा, जी, सी, सू, दक्षि, मे, एवंपरः देहि इत्यत्र तृतीयवर्णः दकारः । " देहीशानो विसृज " (II. 4. 8) । " ततो नो देहि जीवसे " (ब्रा. II. 4 1) । " ततो नो देहि सीबले " (ब्रा. II. 5. 6) । " तस्य नो देहि सूर्य " (ब्रा. III. 7. 6) । " देहि दक्षिणाम् " (ब्रा. II. 7. 17) । " देहि मे ददामि ते " (I. 8. 4) । परि, स्य, नः, पुनः, एवंपूर्वो 'देहि' इत्यत्र तृतीयवर्णः । यथा— " ताभ्यां राजन्परि देह्येनम् " (आ. VI. 3) । " अन्नपतेऽन्नस्य नो देहि " (IV. 2. 3, V. 2. 2, ब्रा. III. 11. 4) । स्य न इति किम्? " रयिं नो धेहि सुभगे सुवीरम् " (III. 5. 1) । " अथ मे पुनर्देहीति " (II. 1 2) । एतदन्यदेहीत्यत्र चतुर्थवर्णः धकारः । यथा— " अस्मै यजमानाय धेहि ईड्यश्चासि वन्द्यश्च " (V. 1. 11) । वेघ्नूर्ध्वे सति परिपूर्व-

---

[1] ' यतेन्वीशजी ' ख. ' यज्ञस्य येते स्वी जी ' ग. ' यज्ञस्य येते स्वी जी सीरसूद ' घ.
[2] ' पुनःपूर्वो देहि चाथ तृतीयकः ' ख. ' धगः । अन्नस्य नः पर्यधोऽन्यो देहि चेन्मयि यत्र धः (? थः) ॥ यस्य ' ग. ' (न ? र) स्य नः परिपूर्वोऽन्यो देहि चेन्मयि यत्र धः । यस्य ' घ.

त्वेन तृतीयत्वप्राप्तौ सत्यामपि चतुर्थवर्णः । यथा—" अभिस्तृणीहि परिधेहि वेदिम् (ब्रा. III. 7. 5) ॥

— ददातु — दधातु —

यस्य स्वाहा परः चेद्वा कर्मण्यं श्रवणो वरम् ।
नयास्माकं यमो मे नो धाता वेदो मनस्ततः ॥ ४४ ॥
इन्द्रः पूर्वो ददात्वन्यः सुकृताद्युत्तरे च धः ।

यस्य, स्वाहा, एवं परः वा कर्मण्यम्, श्रवणः, वरम्, नय, अस्माकम्, यमः, मे, नः, धाता, वेदः, मनः, ततः, इन्द्रः, एवंपूर्वश्च ददातु इति तृतीयवर्णः । एतदन्यः पूर्वोक्तनिमित्तरहितः 'दधात्वि'ति चतुर्थवर्णः । यथा— " इन्द्रस्य प्राणोऽसि तस्य ते ददातु यस्य प्राणोऽसि " (II. 3. 10) । " यजमानाय ददातु स्वाहा " (ब्रा. II. 5. 7) । एतौ परनिमित्तौ । शेषाः पूर्वनिमित्ताः । " पुनर्न इन्द्रो मघवा ददातु " (ब्रा. II. 5. 3) । " सोमो वीरं कर्मण्यं ददातु " (ब्रा. II. 8. 3) । " कामेश्वरो वैश्रवणो ददातु " (आ. I. 31) । " स न इन्द्रः कामवरं ददातु " (आ. III. 11) । " अच्छिद्यमानया ददातु वीरम् " (III. 3. 11) । " अस्माकं ददातु श्वेतो रश्मिः " (आ. III. 11) । " यमो ददात्ववसानमस्मै " (आ. I. 27, आ. VI. 6) । " स मे ददातु प्रजां पशून् " (आ. III. 7) । " सा नो ददातु श्रवणम् " (III. 3. 11) । " धाता ददातु नो रयिमीशानः " (II. 4. 5) । " वेदो ददातु वाजिनम् " (I. 6. 4) । " पुनर्नः पितरो मनो ददातु " (I. 8. 5) । " ततो ददातु दाशुषे वसूनि " (ब्रा. II. 8. 5) । " मेधां म इन्द्रो ददातु " (आ, X. 42.) । अत्राप्यव्यवधानेन पूर्वत्वं विज्ञेयम् । अन्यथा, " अग्निर्नो देवः सुविते दधातु " (ब्रा. III. I. 1) । इत्यत्र तृतीयत्वापत्तिः । एतत् चतुर्थवर्णः । यथा— " रायस्पोषं चिकितुषे दधातु " (III. 3. 11) इत्यादि ।

'च थः' ख. 'कृतस्योत्तरे च धः' ग. २ 'तु" इत्यादि । एवम्परपूर्वश्चेति किम् ? " रायस्पोषं चिकितुषे दधातु " । " सा नो दधातु सुकृतस्य लोके " इत्यत्र नः पूर्वत्वेन तृतीयवर्णदकारप्राप्तेऽपि सुकृतपरत्वात्तन्निषिध्यते । निषेध इति विज्ञेयम् । किन्तु धकार एव । यथा— " सा नो दधातु सुकृतस्य लोके चत्वारि " । ख.

' सुकृताद्युत्तरे च धः " इति—सुकृतादि परत्वे सति ' धः ' पूर्वत्वेन तृतीयत्वे प्राप्तेऽपि चतुर्थवर्णः इत्यर्थः । यथा— " सा नो दधातु सुकृतस्य लोके " (ब्रा. I. 8. 8) इत्यादि धकारः चतुर्थो वर्णः ।

— ददाति - दत्ते —

(मू) तेनायुरेषां रूपाणां त्रयास्त्रिंशत्तथैव च ॥ ४५ ॥
श-म-सं[1]-प्र-च-नोर्ध्वश्च कामेनान्नात्परोऽपि च ।
चतुर्थ्यन्तपरोऽपि[2] स्यादाभ्यो येऽध्वर्यवेऽपि च ॥ ४६ ॥
अग्नीधे ब्रह्मणे होत्रे चैनत् बर्हिषि दक्षिणाम् ।
तार्प्यं हिरण्यं वै धेनुमात्मना यश्चपूर्वकः ॥ ४७ ॥
ददातीति तृतीयत्वं[3] तदन्यत्र च संपिबत् ।

तेनायुः, एषाम्, रूपाणाम्, त्रयास्त्रिंशत्, श, म, स, प्र, च, न, एवंपरः; कामेन, अन्नात्, एवंपरश्च; चतुर्थ्यन्तः अस्मै, आभ्याम्, एभ्यः, तस्मै, ताभ्याम्, तेभ्यः इत्यादि चतुर्थ्येकवचनं द्विवचनं, बहुवचनं वा, अध्वर्यवे, अग्नीधे, ब्रह्मणे, होत्रे, इत्यादि एतत्परोऽपि च, एनत्, बर्हिषि, दक्षिणाम्, तार्प्यम्, हिरण्यम्, वै, धेनुम्, आत्मना, यः, एवंपूर्वश्च ददातीति शब्दः तृतीयवर्णसहितः इत्यर्थः । यथा— " वासो ददाति । तेनायुः प्रतिरते " (ब्रा. III. 12. 5) । " अव्यवच्छिन्नानि ददाति । एषां लोकानाम् " (VII. 1. 5) । " उपबर्हणं ददाति । रूपाणामवरुध्यै " (ब्रा. I. 1. 6) । " वार्त्रघ्नीं ददाति । त्रयस्त्रिंशत् " (VII. 1. 6) । " अनोयुक्ते च शते च ददाति । शतायुः (ब्रा. III. 9 14) । " शतं ददाति । शतायुः " (ब्रा. III. 12. 5) । " हिरण्यपात्रं मधोः पूर्णं ददाति । मधव्यः " (ब्रा. I. 3. 3) " मिथुनौ गावौ ददाति । मिथुनस्य " (ब्रा. I. 1. 6) । " आन्विष्टकं दक्षिणा ददाति । सर्वाणि वयाँसि " (ब्रा. III. 12. 5) । " यो मा ददाति । स इदेव माऽऽवाः" (ब्रा. II. 8. 8) । " सहस्रं ददाति सहस्रसंमितः" (ब्रा. III. 12. 6)।

---

१ ' मनप्र ' ग. २ ' चतुर्थीवस्तुपूर्वश्च ददात्यम्यश्च संपिबत् ' ग. घ. इतोऽनन्तरं 'यामानो' इत्यादि घ. ३ 'यत्वं तदन्यत्र चतुर्थकम्' ग.

" यत्ततो ददाति सा दक्षिणा " (ब्रा. II. 1. 5)। " ततो यत्किंच ददाति सा दक्षिणा " (आ. II. 13)। " वायव एवैनान् परिददाति प्र वा एनान् " (ब्रा. III. 2. 1)। " देवांश्च याभिर्यजते ददाति च " (ब्रा. II. 4. 6)। " पुनर्वा ददाति नवेति । ग्रावाणो वै " (VII. 3. 2)। " दुग्ध्वा ददाति । नह्यदुष्टा " (ब्रा. I. 4. 3)। " कामेन ददाति कामेन " (ब्रा. II. 2. 5)। " सर्वाण्येतानि ददाति । अन्नात्प्राणा भवन्ति " (आ. X. 79.)। चतुर्थ्यन्तपरो भवति । यथा— " अन्योऽन्यस्मै ददाति " (VII. 2. 8)। " आ द्वादशभ्यो ददाति " (ब्रा. I. 1. 6)। " स प्रजापतये ददाति " (ब्रा. II. 2. 5)। " अध्वर्यवे ददाति " (I. 8. 18)। " अग्नीधे ददाति " (VI. 6. 1, ब्रा. I. 1. 6)। " ब्रह्मणे ददाति " (VI. 6. 1)। " होत्रे ददाति " (VI. 6. 1)। इत्यादि । " प्रजातमेवैनद्ददात्येतया " (II. 4. 11) " यो बर्हिषि ददाति । पुरा " (I. 5. 1)। " यज्ञे दक्षिणां ददाति " (I. 7. 1)। " दक्षिणां ददाति तीर्थ एव दक्षिणां ददाति " (II. 6. 8)। " तार्प्यं ददाति पशूनेवावरुन्धे " (II. 4. 11)। " हिरण्यं ददाति । ज्योतिर्वै हिरण्यम् " (V. 7. 5, VI. 6. 1)। " यः खलु वै ददाति । सोऽर्यमा " (II. 3. 4)। " धेनुं ददाति । आशिषः " (II. 4. 11)। " आत्मना ददात्यन्यस्मै " (II. 5. 4)। " आददाना विमथ्नाना यो ददाति " (III. 5. 4)। " तमाहुर्यो ददाति " (ब्रा. I. 1. 2)। अत्र तृतीयवर्णः । अन्यत्र चतुर्थवर्णः । " परिधीन्परिदधाति " (IV. 3. 9)। " पुरस्तात्परिदधाति " (II. 6. 6)। इत्यादि चतुर्थवर्णः । सं पिबदिति— पिबत् शब्दः संपूर्वश्चेत् बकारसहितः । यथा— " देवैः संपिबते यमः " (आ. VI. 5)। संपूर्व इति किम् ? " पितरो नु प्रपिपते " (II. 5. 8)। " रक्षाँस्यभूत्पिपते " (ब्रा. III. 2. 9) " वाचो गाः पिपाति तत् " (आ. I. 10)। अत्र पकारः प्रथमवर्णः ॥

(मू) या, मानोऽग्निं रुचन्तीं[1] शुना, मन्नाद्यं[2], रभि स्वयम् ॥ ४८ ॥

---

१ ' चन्धानीं शुनामद्य तमःस्वयम् ' ख. ' चन्तीं शुना ' ग. ' द्यम्मतःस्व ' घ.

२ ' द्यंचभिस्वयम् ।

ग्रावाणं शरनां पर्शुं मरचिं बर्हिरित्यपि ।

स्फ्यं शिक्यं ह्यनदेनानि (ध ! थ) पित्र्याणि यमानपि ॥

'थं सू द्धि, ची, न्द्रियं, दत्ते धेयमात्मन्न धो [मतु] ।

या, मानः अभ्रिम्, रुचम्, नीम्, शूनाम्, अन्नाद्यम्, र, भि, स्वयम्, यम्, सूत्, हि, ची, इन्द्रियम्, एवं व्यवधानेन वा पूर्वः 'दत्ते' इत्यत्र तृतीयवर्णः, एतदन्यः चतुर्वर्णः इत्यर्थः । यथा— " पुरोऽनुवाक्यया दत्ते । प्रयच्छति " (II. 6. 2) । " यजमान आदत्ते यदोषधीभिः (III. 3. 8) । " शफोपयमानादत्ते " (आ- V. 7) । " चतुर्भिरभ्रिमादत्ते " (V. 1. 1) । " आदित्यो रुचमादत्ते " (V. 3. 10) । " अश्वाभिधानीमादत्ते " (V. 1. 2) । " पशूनामादत्ते " (II. 6. 8) । " अन्नाद्यमादत्ते—इदमहम् । (III. 4. 8) । " शुक्रमादत्ते—अनुहाय " (III. 2. 2) । " यद्वा अनीशानो भारमादत्ते " (VI. 2. 5) । " राष्ट्रमादत्ते भवत्यात्मना " (III. 4. 6) । " जागतमसि धवित्राण्यादत्ते (आ. V. 4) । अत्र रपूर्वत्वं व्यवधानेनेति द्रष्टव्यम् । " छन्दोभिरेवैनान्यादत्ते " (आ. V. 4) । " पितृभिरनुमत आदत्ते । विवा एनम् " (आ. V. 7) । अत्र यद्यपि पूर्वोक्तनिमित्तेनैव उपपत्तौ भिग्रहणस्य वैयर्थ्यशङ्का स्यात्; तथापि र इत्येवं पूर्वत्वाभावाद्द्वैकृतत्वाच्च न तृतीयत्वमिति न वैयर्थ्यशङ्का इति द्रष्टव्यम् । " स्वयमादत्ते काममेव " (II. 6. 8) । " वैश्वानर्यां शिक्यमादत्ते " (V. 2. 4) । " इति स्फ्यमादत्ते प्रसूत्यै " (II. 6. 4) । " ताभ्यामैवेने प्रसूत आदत्ते " (ब्रा. III. 3. 7) । " इषे त्वेति बर्हिरादत्ते" (VI. 3. 6) । " सूर्यो मरीचिमादत्ते " (आ. I. 2) । " तेज इन्द्रियमादत्ते" (ब्रा. II. 7. 18) । एषु ' दत्त ' इति दकारः । धेयमात्मन्नित्येवंपूर्वः चेन्न भवति दकारः यथा—" ऋध्नोति स पुनराधेयमाधत्ते " (V. 4. 10) । " अन्नाद्यमात्मन्धत्ते " (I. 6. 11) । " इन्द्रियमेवात्मन्धत्ते " (I. 6. 7) इत्यादि चतुर्थवर्णः ॥

— धकारः —

(मू) ब्रूह्यवसः, तुरीपं, थं जहि ओहैः, विक्षु, सप्रथाः ॥ ४५ ॥

प्रसूत इन्द्रियश्वेतान् ईयुत् धत्तेपिप्लुवतः ।
पिबा पिबतु सम्पूर्वः पिबते पिबतस्तथा ॥
पिबन्तु पिबतु प्रोक्तं पिबती च तृतीयकः ।

ब्रूह्यवसः ' ग. ३ ' [रयुग्धि] चीन्द्रियं दत्ते तूर्योऽन्यच्छन्दसूयतः ' ख. घ.

शोचिरमुत्र भूयात्[1] भूः श्रृण्वै रश्मिरनागसः ।
देवं भूयिष्ठभाजश्च सहध्यै पूर्वतस्त्वथ[2] ॥ ४६ ॥

ब्रूहि, अवसः, तुरीपम्, थं जहि, ओहैः, विक्षु, सप्रथाः, शोचिः, अमुत्र भूयात्, भूः, श्रृण्वै, रश्मिः, अनागसः, देवम्, भूयिष्ठभाजः । सहध्यै । एवंपूर्वः अधेत्यत्र[3] चतुर्थवर्णः । तद्यथा– " ब्रूह्यधा च नः " (IV. 5. 10) । " अग्ने पितुर्यथावसः । अधाते सुम्नमीमहे " (II. 6. 11) । " तन्नस्तुरीपमध पोषयित्नु " (III. 1. 11) । " अपैतः शपथं जहि । अधानो अग्न आवह " (ब्रा. III. 10. 8) । थम् इति किम् ? " अमुं जह्यथ त्वा होष्यामीति " (VI. 4. 5)। " ऋध्यामा त ओहैः अधाह्यग्ने " (IV. 4. 4) । " सुवृजनासु विक्षु । अधा यथानः " (II. 6. 12) । " या उ सप्रथाः । अधाते विष्णो " (ब्रा. II. 4. 3) । " शोचिरध स्म ते व्रजनं कृष्णमस्ति " (IV. 4. 3) । " अमुत्र भूयादध यद्यमस्य " (आ. X. 48, IV. 1. 7) । " भूरध ज्मन्न ते " (VII. 4. 15) । "अयँ श्रृण्वे अध जयन्नुतघ्नन्" (ब्रा. II. 8. 3) । "विसप्त-रश्मिरधमत्तमाँसि " (ब्रा. II. 8. 2) । " अनागसो अधमित्संक्षयेम " (ब्रा. III. 7. 13) । " धिषणा घाति देवम् । अधावायुम् " (ब्रा. II. 8. 1) । " भूयिष्ठभाजो अध ते स्याम " (आ. IV. 5.) । " सहसे सहध्यै । अधाहो तान्यसीदो यजीयान् " (ब्रा. III. 6. 10) । एवंपूर्व इति किम् ? " सहस्र-मुत वो रुहः । अथा शतक्रत्वः " (IV. 2. 6) । " अथेमा विश्वाः पृतना जयासि " (ब्रा. II. 8. 3) । " अथ यत्संवाति " (ब्रा. III. 11. 7) । इत्यादि द्वितीयवर्णः ॥

(मू) वमदाबसशत्राश्च[4] सस्वरा गोकुरो अयः ।
स्वरपूर्वा अमीत्वाद्या अकाराद्याश्च तत्रधः[5] ॥ ४७ ॥

वश्च, मश्च, दश्च, वमदाः । बश्च सश्च, शश्च, त्रश्च बसशत्राः, एते

१ ' भूया भू श्रृ ' ख. २ ' तस्त्वधः ' ख. ' तस्त्वधः अथोपरिपदे त्रिशेषो वर्णनो यदि वम ' ग. ३ ' अधेत्यत्र ' ख. ४ ' श्च स्वरोत्तरास्तु रानिरो । रुगोपूर्वाइमे वर्णा पदाद्या यदि तत्र धः ॥ ' ख. घ. ' त्राश्च सस्वरा बोकुरो अधः ' ग. इतोऽनन्तरं ' रधाम ' इत्यादि घ. ५ ' तत्र धः । अधो निष्ठ्या निघोषेवयुक्तः पादादिगेषु च रधाम ' ग.

वर्णाः सस्वराः स्वरपरा इत्यर्थः[1]। एवंपूर्वः गो, कु, रो एवंपूर्वश्च। अमी वर्णाः पदादयो यदि स्वरपूर्वा अपि धकारः चतुर्थवर्णः। यथा— "अग्नेवधाय च" (IV. 5. 8)। "विधाय लोकान्" (आ. I. 24)। "विधुं दद्राणम्" (आ. IV. 20)। "वृधा त्वित्याह" (VI. 1. 2)। "देव स्वधावः (III. 1. 11)। "सोममनु ष्वधं मदाय" (I. 4. 19)। "द्वेधा वा अग्निम्" (V. 7. 6)। ननु अत्र वकारस्य पदादित्वाभावात्कथं चतुर्थवर्णः? पदावयवत्वादिति ब्रूमः। "मधुश्च माधवश्च" (I. 4. 11)। "माध्यान्दिने सवने" (ब्रा. I. 5. 11)। "मेध्यं कृत्वा" (V. 1. 8)। "मेधा देवी" (आ. X. 41)। "एवास्मान्मृधः" (II. 2. 7)। "मेधावी" (ब्रा. III. 7. 6)। "दधि हि पूर्वम्" (II. 5. 3)। "इन्द्रियं वै दधि" (ब्रा. II. 1. 5)। "दधन्मो अहं रिषम् (आ. VI. 7)। शुचीदयन्दीधितिम्" (II. 6. 12)। "अपि दध्यात्" (VI. 3. 5)। "विदथा कविः" (III. 2. 11) तु न स्यात्। अत्र दकारस्य पदादित्वाभावात्। "बधिर आक्रन्दयितरपान" (ब्रा. III. 10. 8)। "अबधिरो भवति" (आ. V. 2) इत्यत्र प्राप्त्यभावेऽपि चतुर्थवर्णः। "अप्यकारादि" (तै. प्रा. I. 52) इति ग्रन्थान्तरे उक्तम्। तस्मात् "तेन व्यबाधन्त। + + सद्दङ्तं तेन विबाधते" (II. 4. 1)। "स बाधस्ते" (II. 2. 12)। "बद्धमवस्यति" (VI. 2. 9)। "बुधन्वत्याग्नेयस्य" (ब्रा. I. 3. 1)। "बोधा सबोधीति" (V. 2. 2)। "निर्बाधैर्वै देवाः" (V. 1. 10)। "निर्बाधी भवति (V. 1. 10) इति तत्संबन्धात्। "सधस्थेऽग्निं पुरीष्यम्" (IV. 1. 3)। "हवमानाय साध" (IV. 2. 4)। "प्रसाधयतो विन्दते प्रजाम्" (II. 2. 1)। "साध्या वै" (VII. 2. 1)। "अपसेध शत्रून्" (IV.6. 6)। "सोमं शोधयेति" (VI. 1. 9)। "त्रेधा बर्हिः संनद्धं भवति" (ब्रा. I. 6. 3)। "यत्त्रैधातवीयम्" (II. 4. 11)। इत्यादि। अत्र स्वरपरा इति किम्? "अमित्रस्य व्यथया मन्युमिन्द्र" (ब्रा. II. 8. 3)।

---

[1] 'र्थः। रा, निरो, रु, गो, एते च स्वरपराः। एते द्वादशवर्णाः अच्पूर्वाः। केवलस्वराः अव्यञ्जनस्वरपूर्वो वा अ आ इ ई उ ऊ ऋ ॠ ए ऐ ओ औ अमी चतुर्विंशतिवर्णाः। पदादयश्चैतत्। एवम्पूर्वः धकारश्चतुर्थवर्णः।' ख.

“ श्नथद्वृत्रम् ” (IV. 2. 11)। “ विमध्यमं श्नथाय[1] ” (I. 5. 11)। इत्यादि द्वितीयवर्णः[2]। “ गोधाय संविधन ” (ब्रा. II. 8. 5)। “ गोधूमाश्च मे ” (IV. 7. 4)। उरुकृदुरु णस्कृधि ” (II. 6. 11)। “ प्ररोधनं पूर्वः “ (VII. 5. 1)। “ क्रोधाय निसरम्[3] (ब्रा. III 4. 10)। अथ पूर्वस्योदाहरणम्। यथा– “ अध ईषं यजमानस्य ” (VI. 3. 3)। “ चर्मे-वावाधुस्तमो अप्स्वन्तः (ब्रा. II. 4. 5)। “ अधःस्विदासीत् ” (ब्रा. II. 8. 9)। “ अश्वस्याधस्पदमुपास्यति ” (ब्रा. III. 8. 4)। “ हृदयं चाप्यधोमुखम् ” (आ. X. 13)। “ द्विर्मा धा इति ” (II. 4. 12) । “ ऋतं सत्येऽधाम्। सत्यमृतेऽधाम् ” (VII. 1. 18)। “ पूषा माधात्सुकृतस्य ” (IV. 2. 8)। “पयसा मा न आधक्” (ब्रा. II. 4. 3)। “सुहवो न एधि ” (II. 5. 12)। छन्दाँसि च समैधन्त ” (ब्रा. I. 4. 10)। “ तदधयत्तस्मात् ” (VI. 1. 6)। “ मा नः परमधरम् ” (आ. IV. 20)। “ अधातामश्विना मधु ” (ब्रा.

---

१ ‘ थाय ’ “ शिश्नथो विष्वगग्ने ”। इत्यादि ख. २ “ आश्विनं च राधः। “ हविष्मन्निधनं पूर्वम् ”। “ निधिपतिर्नो अग्निः ”। “ प्ररो ” ख. ३ “ सरम् ”। “ उरुकृदुरुणस्कृधि ”। “ गोधाय संविधनसैरतद्रुक् ”। “ गोधूमाश्च मे ”। “ गौधूमं चषालम् ”। इति च तत्सम्बन्धात् ततः केवलस्वरपूर्वाण्युदाहरणानि। अधशब्दस्य विशेष-विधानाच्छेषेषु पदेषु द्वितीयवर्णः। थकारः। तदन्यः अकारपूर्व इत्यर्थः। सविशेषः विशेष-सहितो यदि। चतुर्थवर्ण इति यावत्। यथा–– “ वृश्चेदध ईषं यजमानस्य ”। “ अध-स्विदासीत् ”। “ हृदयं चाप्यधोमुखम् ”। “ द्विर्मोधा इति ”। “ ऋतं सत्येधाम् ”। “ पयसा मान आधत ”। “ पूषामाधात् ”। “ पूषा धत्र ”। “ अधातामश्विना मधु ”। “ ऊर्जयमाने अधाताम् ”। “ पर्यधत्ता अग्ने देव ”। “ इन्द्रेण समधध्वम् ”। “ अस्मद-वाधमम् ”। “ न्यधाय्यस्मे तस्मा इन्द्रम् ’। “ तदधयत् तस्माद्ध ”। “ प्रागपागुदगधरात् ” ‘ अश्वस्याधस्पदम् ”। “ स प्रजापतिमुपाधावत् ”। “ तस्मादधस्ताच्छीर्ष्णः ”। “ नक्तं नाध्यासते ”। “ चर्मेवावाधुस्तमः ”। “ प्रत्यधुक्ष...तमक्रन् ”। “ समिधो यजति ”। “ उर्ध्वे समिधो ”। “ ऋभिः पुत्र ईधे ”। “ त्वत् चर्मोऽधोऽधिषवणे ”। “ सूर्या ऊधः ”। “ ऋधगया...धत् ”। “ एधते गृहः ”। “ सुहवो न एधि ’। “ एधिषु ”। “ समैधन्त ” “ यश्चतुर्थो यदादिस्थो द्वितीयस्थश्च घोषयुक् ” इति वचनाच्च। एवम्पूर्व इति किम्? “ कथमिदं स्यादिति ”। “ वाजस्य सङ्गथे ”। “ उद्गीथ एव ”। “ तथा वा अहम् ”। “ नाथितो जोहवीमि ”। “ नीथे नीथे मघवानम् ”। “ पथस्पथः परिपतिम् ”। “ पाथ एतु ”। “ सोमपीथः ”। “ पृथिवी ते ”। “ प्रथमं मनः ”। “ वाव रथन्तरम् ”। “ रथेन रक्षोहा ”। “ मोष्वस्मै पुरो रथम् ”। “ अवभृथो यानि ”। “ यथा वै याथ

II. 6. 12) । " ऊर्जयमाने अधाताम् " (ब्रा. III. 6. 13) । " पथ्य-धत्था अग्ने " (I. 1. 13) । " यामिन्द्रेण समधद्ध्वम् " (I. 7. 8) । " अवाधमम् " (IV. 2. 1) । " न्यधाय्यस्मे " (II. 2. 12) । " तस्मा-दधस्ताच्छीर्ष्णः " (VII. 2. 11) । " नक्तं नाध्यासते " (V. 6. 4) । " समनुषैः प्रत्यधुक्षन् " (II. 5. 3) । " समिधो यजति " (II. 6. 1) । " पुत्र ईधे " (III. 5. 11) । " ऊर्ध्वे समिधौ " (ब्रा. III. 3. 7) । " त्वक्चर्मे धोऽधिषवणे " (VI. 2. 11) । " ऋधगयादृधगुत (I. 4. 44) । ' अमी त्वाद्या ' इति किम् ? " विदथा कविः (III. 2. 11) । " विदथेषु-कव्या " (IV. 1. 2) । " आनन्दं नन्दथुना " (V. 7. 19) । " प्राण-थेन तस्मै " (IV. 1. 4) । " दिव्यस्येशाथे उत पार्थिवस्य " (ब्रा. II. 5. 6) । इत्यादिषु द्वितीयवर्णः । " याथ उग्रातानः " (IV. 7. 15) । " उद्गीथ एव " (III. 2. 9) । " तथा वा अहं करिष्यामि " (V. 5. 2) । " नीथे नीथे मघवानम् " (I. 4. 46) । " पथस्पथः " (I. 1. 14) । " पाथ एतु " (V. 1. 10) । " सोमपीथः समृद्ध्यै " (II. 1. 5) । " पृथिवी समित् " (आ. IV. 41) । " अवभृथो यानि " (I. 7. 5) । " यथा वै " (I. 6. 6) । "यूथ ऋषभः" (V. 7. 2) । " संदृशे युयोथाः " (ब्रा. II. 8. 6) । " प्रोष्वस्मै पुरोरथम् " (ब्रा. II. 5. 8) । " रथमा-तिष्ठ गोवित् " (IV. 6. 4) । " वाव रथन्तरम् " (III. 1. 7) । " राथ-न्तरी " (II. 5. 7) । " राथन्तरम् " (VII. 2. 8) । इति तत्संबन्धात् ।

उग्रातानः " । " यूथे यूथ ऋषभः " । " सदृशो युयोथाः " । " हृथो अप्रत्यसुरस्य " । ' नकगौ तनभपरयह पूर्वाजुत्तराः ' इति शीक्षान्तरे चतुर्थवर्णनिषेधाद्यास्येति निषेधवचनस्य व्याख्या । कश्च गश्च कगौ, त, न, भ, पर, य, ह एवम्पूर्वा अजुत्तराः । स्वरोत्तराश्चतुर्था न स्युः । किन्तु थकारः द्वितियवर्णः । कथमिदं स्यादिति इत्यादि । हृथो अप्रत्यसुरस्य इत्यन्ता-न्युदाहरणानि । नमदादयो वर्णाः पदादय इति किम् ? " भवथ देवत्रायन्तम् " । " पन्थामव थो धृतेन " । " तं प्रत्नथा पूर्वथा विश्वथेमथा " । " अवृथा इत्यग्निनोभयतः " । " विदथे अन्तरेषाम् " । " वायोः सवितुर्विदथानि " । " मेघाकारं विदथस्य " । " विदथेषु कव्या " । " नन्दथुना कामम् " । " प्राणथेन तस्मै च " । " पुरा गृध्रादररुषः " । " पिबाथः " । " अनाधृष्या यथा सथा " । " वृत्रस्य त्वा श्वासथादीषमाणाः " । " यदावसथेऽन्नं हरन्ति" । " दिव्यस्येशाथे " । " शिश्रथः कृतानि " । " यत आजगन्थ " । " निर्ऋथो यश्च " । इत्यादिषु द्वितियवर्णः । (मू) रधाम' स.

“ प्रथमं मनः ” (IV. 1. 1) । “ नाथितो जोहवीमि ” (IV. 7. 15) । “ हथोअप्रति ” (III. 2. 11) । “ अवृथा इत्यग्निनोभयतः ” (II. 5. 9) ‘ पदादय ’ इति किम् ? “ भवथ देवत्रा यन्तम् ” (I. 3. 10) । “ मन्थामवथो धृतेन ” (आ. II. 6) । “ पूर्वथा विश्वथेमथा ” (I. 4. 9) । “ नकगौतनवप्राभयहः पूर्व अजुत्तराः ” — इति शीक्षान्तरे चतुर्थवर्णनिषेधात् । “ विदथेषु कव्या ” (IV. 1. 2) । “ विदथे अन्तरेषाम् । (II. 1. 11) । “ विदथानि मन्महे ” (IV. 7. 15) । “ मेधाकारं विदथस्य प्रसाधनम् ” (ब्रा. III. 11. 6) । “ नन्दथुना ” (V. 7. 19) । “ मधुमन्तं पिबाथः ” (ब्रा. II. 8. 7) । “ अनाधृष्या यथा सथ ” (IV. 6. 4) । “ वृत्रस्य त्वा श्वसथादीषमाणाः ” (ब्रा. II. 8. 3) । “ यदावसथेऽन्नँ हरन्ति ” (ब्रा. I. 1. 10) । “ दिव्यस्येशाथे ” (ब्रा. II. 5. 6) । “ यत आजगन्थ ” (IV. 2. 2) । “ विकुसुको निर्ऋथो यश्च ” (आ. II. 4) एषु द्वितीयवर्णः । अकाराद्यः च तत्र यः । अकार आद्यो यस्यसः । अकाराद्यः । अधशब्द इत्यर्थः । तत्र “ ब्रूह्यवस ” (IV. 5. 10) इति पूर्वोक्तलक्षणस्थले— इत्यर्थः । अधशब्दस्यापि स्वरपूर्व इत्यनेन सामान्यतः चतुर्थवर्णे प्राप्ते तस्य ‘ ब्रूह्यवस ’ इति विशेषविधानात्सामान्यविशेषयोरिति न्यायेन ‘ ब्रूह्यवस ’ (IV. 5. 10) इति विशेषलक्षणलक्षितस्यैव ‘अध’शब्दस्य चतुर्थवर्णः । अन्यत्र द्वितीयवर्णः इत्यभिप्रायः । उदाहरणं तु उक्तमेवेति द्रष्टव्यम् ॥

— धकारः —

(मू) रधामद्रधसी गाधं क्लधानधः षतोरधम् ।
क्षुधक्षोधुस्पृधोनाधै मागधं विवेधादध ॥ ४८ ॥

रधाम, द्रधसी, गाधम्, क्लृध, अनधः, षतो, रधम्, क्षुध, क्षोधु, स्पृध, नाधै, मागधं, विवध, अदध एषु ग्रहणेषु चतुर्थवर्णः । अयमुपर्यारम्भः । यथा—

---

१. ‘ द्रधसी गाधं [प्राप्रा]धुर्द्विषतोऽधरम् ’ ग. घ. २. ‘ विदधादधत् ’ ग. ‘ क्षुधस्पृधश्रुतिर्नाधैरन्धोविवधादधत् ’ घ. इतोऽनन्तरं ‘ योधो गवीधुकाश्चैव मान्धुकश्च ययोधितु । ननधा ओषधी राधि शिशाधि परिधाषुधि । विदधद्वैमृधव्याधियुधश्रुद्धीवृधादधुः । रुध ’ घ.

“ मा रधाम द्विषते ” (IV. 3. 14) । “देवतास्ता अरीरधाम” (II. 6. 9) । “ द्वे द्रधसी ” (III. 2. 2) । “ अविदाद्धि गाधम् ” (IV. 3. 11) । मकारेण किम् ? “ गाथाहि तद्वृङ्क्ते ” (V. 1. 8) । “ पठरो विक्लधः पिङ्गः ” (आ. I. 2) “ खलते विक्लधस्य ” (ब्रा. III. 9. 15) । “ अनधः सादयति ” (ब्रा. III. 2. 1) । “ मो अहं द्विषतो रधम् ” (ब्रा. III. 7. 6) ‘ षत ’ इति किम् ? । यथा—“ तत्रारथमुपशाग्मम् ” (IV. 6. 6) । अत्र द्वितीयवर्णः । “ अपक्षुधन्नुदतामरातिम् (ब्रा. III. 1.1) । “ क्षुध्यान्निदमजानताम् ” (आ. I. 31) । “ अक्षोधुका भवन्ति ” (VII. 4. 11) । “ क्षोधुकोऽध्वर्युः स्यात् ” (VI. 1. 9) । “ आभिः स्पृधो मिथतीः ” (ब्रा. II. 8. 3) । “ यदस्पृधेताम् ” (III. 2. 11) । इति च; । “ वयो नाधैरग्नये त्वा ” (IV. 3. 4) । अकारान्तगृहीतत्वात् । ऐकारेण किम् ? । “ नाथमिच्छमानाः ” (ब्रा. I. 6. 4) । अतिक्रुष्टाय मागधम् ” (ब्रा. III. 4. 1) । “ स विवधत्वाय ” (VII. 3. 5) । “ ता उपादधत ” (V. 3. 2) । “ तदस्यामदधात् ” (ब्रा. I. 1. 3) । “ तदमुष्यामदधात् ” (ब्रा. I. 1. 3) । इत्याद्यकारान्तगृहीतत्वात् ॥

(मू) वावृध वैमृध व्याध युधश्रुद्वीवृधादधुः ।
रुधश्रुदृणधन्नद्धो नाधमान रराध च ॥ ४९ ॥

वावृध, वैमृध, व्याध, युधश्रुत्, वीवृध, अदधुः, रुधश्रुत्, ऋणधत्, नद्धः, नाधमानः रराध एषु ग्रहणेषु चतुर्थवर्णः । यथा— “ हविषा वावृधानः ” (IV. 3. 13) । “ याँश्च देवा वावृधुः ” (II. 6. 12) । “ स एतं वैमृधम् ” (II. 5. 3) । “ ऊपाव्याधो भवति ” (II. 2. 9) । नम आव्याधिनीभ्यो विविध्यन्तीभ्यः ” (IV. 5. 4) । “ सयुध इन्द्रो गणेन ” (IV. 6. 4) । “ दश यज्ञायुधानि ” (I. 6. 8) । “ ऐलबृदाय व्युधः ” (IV. 5. 11) । इत्यादि ‘श्रुद्’ग्रहणात् । “ अवीवृधतमह्रो ज्यायोऽकृत ” (ब्रा. III. 5. 10) । “ अवीवृधेतां पुरोडाशेन ” (ब्रा. III. 6. 15) ।

१. ‘ श्रुद्विवृ ’ ग. २. ‘ णधं नाधमानो रराध चादधः ’ ग. ‘ चादधात्. ’ घ. ३. ‘ च । वावृधानो [क्ल]धोऽसोधि राधश्रुधिच मागधम् । अधोनिह्नधा ’ घ.

" ते अस्मिन् जवमादधुः " (I. 7. 7) । " तमवरुधन्नाशक्नुवन् " (V. 4. 1) । " ऋणधत्स जीवात् " (IV. 2. 11)। " पृष्ठे निनद्धो जयति " (IV. 6. 6) । " नाधमानो वृषभं चर्षणीनाम् " (आ. III. 15)। " रश्मीँरिति नाधमानाः " (ब्रा. III. 6. 9)। " अप तौ रराध " (III. 2. 8)। 'अदधुरि'ति ग्रहग्रहणं बालबोधनार्थमिति द्रष्टव्यम् ॥

(मू) गवीधुकस्रिध ग्रोधमिदधज्जनधाः षध ।

गवीधुक, स्रिध, ग्रोध, मिदधत्, जनधाः, षध– एषु धकारः । यथा– " गवीधुकाश्चेति " (V. 4. 3)। " निहो अतिस्रिधः " (IV. 1. 7)। " नैयग्रोधेन " (ब्रा. I. 7. 8)। " अहोरात्राणि मिदधत् " (आ. X. 1)। " स्तुतोऽसि जनधाः " (ब्रा. I. 1. 1)। " ओषधयः संवदन्ते " (IV. 2. 6) । " सीषधाति प्र पूषा " (I. 1. 14) । " ओषध्यास्ते मूलम् " (I. 1. 9) ॥

(मू) पदान्ते च धिकारोऽपि राधश्रुदवधिष्मच ॥ ५० ॥

पदान्ते विद्यमानः धिकारः चतुर्थवर्णः । 'राधश्रुत्', 'अवधिष्म' अत्रापि चतुर्थवर्णः । यथा—" तदशकं तन्मे राधि " (आ. IV. 41) । " ब्रह्मणः सँशिशाधि " (V. 7. 2) । पदान्त इति किम्? " अबोध्यग्निः समिधा " (IV. 4. 4) । " इषुधिमते " (IV. 5. 6) भवति । " बहिःपरिधि स्कन्दाति " (II. 6. 6)। इत्यादि ॥ " अश्वियं च राधः (II. 2. 12)। " तमवधिष्म " (ब्रा. II. 2. 8) ॥

(मू) अधोनिष्टया वि घोषवद्युक्तः पदादिगस्त्वपि ।

घोषवर्णेन संयुक्तः धकारः चतुर्थवर्णः यथा— "अधोनिष्टयावितस्त्यान्ते" (आ. X. 13) " सहसे सहध्यै " (ब्रा. III. 6. 10)। " पुरा गृध्रादररुषः " (ब्रा. II. 4. 3) । " इन्द्रमवृणीध्वम् " (I. 1. 5) । "उप-

---

१. 'ज्जनधाष्धा' ग. २. 'पदान्तं तु धिकारान्तं राध' ग. ३. इदमनन्तरमर्धं च नास्ति ग. 'अधोनिष्टया स्रिधस्सीषधान्येकधुरसीधिरे । मिदधद्घोषयुक्तश्च रुध्य चादि ग एष यः । नाकारान्तोवृधा' घ.

ह्वरेषु यदचिध्वम्" (IV. 3. 13) । "यदद्य दग्धं पृथिवीमसक्त" (ब्रा. I. 4. 3) । "परिवृङ्ग्धि हरसा" (IV. 2. 10) । "घोषवद्युक्त" इति किम्? "उक्थं वाचीन्द्राय" (III. 2. 9) । "गोस्थानम्" (I. 1. 9) । "अस्थि वा एतत्" (ब्रा. I. 1. 9) । "अस्थ्नाऽन्याः प्रजाः" (VI. 5. 2) । ननु 'अस्थ्ने'त्यत्र घोषवद्युक्तत्वात् कथं द्वितीयवर्णः इति चेत् तृतीयैकवचनप्रयुक्तान्न विरोधः इति ध्येयम् । 'पदादिगस्त्वपि' पदादिगः चतुर्थवर्णः इत्यर्थः । यथा— "मे धनं च मे" (IV. 7. 2) । "ये युध्यन्ते प्रधनेषु" (आ. VI. 3) । "इन्द्रो निधनं देवाः" (III. 3. 2) । "अनावृतैनान् प्रथमं तु देवाः" (ब्रा. II. 5. 8) । "सँसृष्टधयं रुद्रो घातुकः" (ब्रा. II. 1. 1) । "धारावरा मरुतः" (ब्रा. II. 5. 5) । "यः समिधो नाधाय" (ब्रा. I. 1. 9) । "नेमथितं ह्वन्ते" (I. 6. 12) । "संधुवाना वाताः" (IV. 4. 12) । "हिरण्यकक्षान्सुधुरान्" (आ. VI. 5) । "उद्धूमासो अरुषासः" (IV. 4. 4) । "धृष्टिरसि ब्रह्म" (I. 1. 7) । "वसुधेयस्य वीतां यज" (ब्रा. II. 6. 20) । धेना बृहस्पतेः" (आ. III. 9) । "श्रेयसे वित्तधम्" (ब्रा. III. 4. 9) । "कतिधा व्यकल्पयन्" (आ. III. 12) । एषु चतुर्थवर्णः । 'पदादिरिति' किम्? "तं प्रत्नथा पूर्वथा विश्वथेमथा" (I. 4. 9) । "अन्यथाऽऽह्वुतिः" (V. 4. 9) । "पर्णं पृथिव्याः प्रथनं हरामि" (ब्रा. I. 2. 1) । "जनप्रथनाय स्वाहा" (III. 2. 8) । इत्यादिषु द्वितीयवर्णः ॥

(मू) अश्वाभिधानीमिषुधे त्वबाधन्त विबाध च ॥ ५१ ॥

एषु धकारः । यथा—"अश्वाभिधानीमादत्ते" (V. 1. 2) । "सहस्राक्ष शतेषुधे" (I. 5. 1) । "तानि तेन व्यबाधन्त" (II. 4. 1) । "अग्नये विबाधवते" (II. 4. 1) ।

---

१. 'गवीधुकं विबाधस्यात् कायाधविधिलोध च ।
प[द्वधा]नो निधायेति निर्बाधनिधनेत्यपि ॥
गौधूमविद्धुश्चेदं कण्ठोक्त्यैवं विधीयते ।
आकारान्तो वृथायुश्च ' ग.

(मू) कायाधवश्च निध च निर्बाधाबधिरोपि च ।
असाधयत गौधूमं गावीधुकमिति स्थितिः ॥ ५२ ॥

यथा—“ प्रह्लादो ह वै कायाधवः ” (ब्रा. I. 5. 9 ब्रा. I. 5. 10) । “ अहविष्कृन्निधनम् ” (VII. 1. 4.) । “ तन्निर्बाधानां निर्बाधत्वम् ” (V. 1. 10) । “ अबधिरो भवति ” (ब्रा. I. 1. 3) । “ प्रासाधयतामिन्द्राग्नी वै ” (II. 2. 1) । “ गौधूमं चषालम् ” (ब्रा. I. 3. 7) । “ गावीधुकं चरुम् ” (I. 8. 7) । अन्यत्र द्वितीयवर्णः । यथा—“ इत्किलासथ ” (IV. 2. 6) । “ अमित्रस्य व्यथथा मन्युम् ” (ब्रा. II. 8. 3) । इति द्वितीयवर्णः ॥ बमदादिलक्षणेन चतुर्थवर्णे प्राप्ते इतः परं निषेधयति ।—

(मू) नाकारान्तवृथाद्युचा अथोऽर्थं तीर्थं पार्थं चे[1] ।

आकारान्तवृथाशब्दः । अथो । अर्थम् । —एते शब्दा आद्युदात्ताः चेत् अत्र द्वितीयवर्णः ॥ तीर्थं । पार्थं । अत्रापि तथा—“वृथाऽसृजत् पथिभिः” (II. 3. 14) । “ वृथेव स्यात् ” (ब्रा. III. 2. 8) । “ तान्येके वृथैवापास्यन्ति ” (ब्रा. III. 3. 2) । आकारान्त इति किम् ? “ वृधन्वती अमावास्याम् ” (II. 5, 2) । “ अथो रुचमेवात्मन्धत्ते ” (VII. 2. 1) । “ प्र दिवस्ते अर्थम् ” (ब्रा. III. 6. 11) । “ अथो यथा प्रार्थमौषसम् ” (ब्रा. II. 1. 2) । एते आद्युदात्ता इति किम् ? “ सुतः सोम ऋतावृधा ” (I. 4. 5) । “ अधोऽधः शिरो हरति ” (ब्रा. I. 1. 5) । “ अर्धं नार्धं बर्हिषः ” (II. 2. 10) । इत्यादि चतुर्थवर्णः । बहुवचनादेषामाद्युदात्तता । “ तीर्थमेव समानानाम् ” (VI. 1. 1) । “ स एतानि पार्थान्यपश्यत् ” (ब्रा. I. 7. 7) । “ यत्पार्थानि जुहोति ” (ब्रा. I. 7. 7) । “ पार्थिवस्यैक इद्वशी ” (अ. VI. 5) । एषां घोषयुक्तत्वात्प्राप्तिः ।

(मू) वीथोऽभागोर्थशब्दस्तु रूथ्यो निर्ऋथ एव च ॥ ५३॥

वीथः, अभागवाची अर्थशब्दश्च रूथ्यः, निर्ऋथः— एषु द्वितीयवर्णः । यथा—[2]“ प्रियं वां वीथो घृतस्य ” (I. 8. 22) । “ तानृषयोऽर्थ-

---

१ ‘आका’ ख. २ ‘पार्थं च । आपृथश्चापृथाश्चैवावसथोति च कीर्तितम् । मेथिम्मथिन्न’ ग.

मायन् " (आ. II. 7) । " वर्षाभ्य इत्यर्थः " (आ. I. 37) । " अर्थेत स्थापां पतिः " (I. 8. 11) । "अमुना सह निरर्थं गच्छ " (आ. IV. 10) । एषां घोषयुक्तत्वात्प्राप्तिः । अभाग इति किम् ? " अर्धो हि पितॄणाम् " (ब्रा. I. 6. 8) । " आऽस्यार्धं वव्राज " (ब्रा. II. 3. 10) । " अर्धो वा एष आत्मनः " (ब्रा. III. 3. 3) । " परिगृह्यार्धमुद्धन्यात् " (II. 2. 10) । " अर्धर्च एकाम् " (I. 6. 10) । अत्र चतुर्थवर्णः । नन्वत्राभागवाच्यार्थशब्देनैव कार्यसिद्धेः पूर्वार्धे विद्यमानार्थशब्दो व्यर्थः स्यादिति चेत्; आर्षत्वादिति ब्रूमः । " शिवो भव वरूथ्यः " (I. 5. 6) । " निर्ऋथो यश्च निःस्वनः " (आ. II. 4) ॥

(मू) जगन्थ घन्थ ततन्थं दाधर्थ मो ववर्थ च ।

एषु द्वितीयवर्णः । यथा— " यत आ जगन्थ " (IV. 2. 2) । " स्वेना हि वृत्रं शवसा जघन्थ " (VII. 4. 15) । " उर्वा ततन्थ " (IV. 2. 4) । " दाधर्थ पृथिवीम् " (आ. I. 8) । " वितमो ववर्थ " (ब्रा. II. 8. 3) । मो इति किम् ? यथा— " अपामुपस्थे महिषो ववर्ध " (आ. VI. 3) । अत्र चतुर्थवर्णः । घोषयुक्तत्वात् प्राप्तिः ॥

(मू) मेथीं मथित थायन्ति राथीतरो विमाथ च ॥ ५४ ॥

मेथीम्, मथित, थायन्ति, राथीतरः, विमाथ एषु द्वितीयवर्णः । यथा— " मेथीं निहन्ति " (VI. 2. 9) । मकारेण किम् ? " गृहमेधीयं चरुम् " (ब्रा. I. 6. 6) । " स्वयं मथित आज्ये " (I. 8. 9) । " अग्निं मथित्वा प्रहरति " (VI. 3. 4) । " अथायन्ति त्वामुप " (आ. VI. 5) । " सत्यवचा राथीतरः " (आ. VII. 9) । " विमाथं कुर्वते वाजसृतः " (ब्रा. I. 3. 8) ॥

(मू) वेत्थावृथं चावृथाश्च जहर्थास्थ्ना तथैव च ।

---

१ ' न्थास्थ्ना दाधर्थ वव । अवृथश्चावृथाश्चैव वसथेति च कीर्तितम् । मेथी° ' घ.
२ इतोऽनन्तरम्, (मू) अवृथश्चावृथाश्चेव वसथेति च कीर्तितम् । अवृथः अवृथाः, आसवथ एष द्वितीयवर्णः । " होतारमवृथा इति " । "यदावसथेऽन्नं हरन्ति" । "आवसथे श्रियं यन्त्रम् " इति ख. ३ ' भित्था दत्था वेत्थाश्वत्था इत्थेत्थान्तोच्चकौ शिथि । मेथिष्ठां ' ग. घ.

यथा— " वेत्थ सावित्रां३ न वेत्था इति " (ब्रा. III. 10. 9) । " अवृथमसौ " (म. II. 4) । " अवृथा इत्यग्निना " (II. 5. 9) । अनयोर्बालबोधनार्थत्वात् । " जहर्थ शूर मन्युना " (ब्रा. II. 5. 3) । " अस्थ्नाऽन्याः प्रजाः प्रति तिष्ठन्ति " (VI. 5. 2) । घोषयुक्तत्वात्प्राप्तिः ॥

(मू) अन्तोच्चकाविथेत्थौ च विसर्गान्तौ न चेच्छिथि ॥ ५५ ॥

अन्तोदात्तौ 'इथ' 'इत्थ' एतौ शब्दौ विसर्गान्तौ न भवतश्चेत् द्वितीयसहितौ । यथा— " समिथे बभूथ " (II. 2. 12) । " समिथेषु जज्ञिरे " (I. 7. 8) । " इत्थं वेत्थं वाऽति नावयेत् " (VI. 3. 4) । " इत्था धिया यज्ञवन्तः " (ब्रा. III. 6. 1) । अन्तोच्चकाविति किम् ? " समिधो यजति " (II. 6. 1) । " अग्नीध आदधाति " (II. 6 9) । " समिद्धो अञ्जन् " (V. 1. 11, ब्रा. III. 9. 4) । " वारुण्युखाऽभीद्धा " (V. 1. 7) । अत्र चतुर्थवर्णः । विसर्गान्तौ चेत् अन्तोच्चकावपि न द्वितीयौ । " विहीमिद्धो अल्यदा रोदसी " (I. 3. 14) । 'शिथि' अत्र द्वितीयवर्णः । यथा— " शिथिलं तद्यदृचा " (VI. 5. 10) ॥

(मू) मेथिष्ठा विथुरक्राथ[1] प्रोथाथर्व मिथः कथन् ।

एषु द्वितीयवर्णः । यथा— " मेथिष्ठाः पिन्वमाना इह " (ब्रा. II. 7. 16) । " विथुरेव रेजते " (IV. 3. 13) । " विथुरं न शवः " (ब्रा. II. 8. 6) । " क्राथयेदिव " (ब्रा. II. 3. 9) । " प्रोथते स्वाहा " (VII. 1. 19) । रोपूर्वत्वेन प्राप्तिः । " अथर्वाणः (II. 6. 12) । " मिथतीररिषण्यन् " (ब्रा. II. 8. 3) । " मिथुश्चरन्तमुपयाति " (IV. 7. 15) । अकारान्तगृहीतत्वादित्यभिप्रायः । " मारुतः कथन् " (आ. V. 11) ॥

(मू) ग्रमात्थ्नश्च विदथ्यं[2] च कतियूरूपपूर्वकः ॥ ५६ ॥

ग्रश्च मश्च ग्रमौ । ताभ्यां परः ' थ्न ' इति शब्दः द्वितीयवर्णः । ' विदथ्यम् ' इति शब्दश्च क, ति, यू, रू, प, एवंपूर्वश्च । यथा—" ग्रन्थि ग्रन्थातु " (I. 1. 2) । " अमथ्नादन्यं परि " (II. 3.14) । 'ग्रमा'दिति किम् ?

---

[1] 'विथुराक्रोथ' ग. [2] 'थ्यं थ्यस्यात्कति युरू' ग.

" ज्यानां वृञ्जन्तु गृध्नवः (ब्रा. II. 7. 16) । अत्र चतुर्थवर्णः । " सादन्यं विदथ्यं सभेयम् (ब्रा. II. 8. 3) । " यदुक्थ्यः " (ब्रा. I. 8. 7) । " अविमुक्तोऽन्योऽथातिथ्यम् " (VI. 2. 1) । " अनुसखा सयूथ्यः " (I. 2. 4) । " शिवो भव वरूथ्यः " (I. 5. 6) । " पथ्येव सूराः " (IV. 1. 1) । " पथिकृतः सपर्यत " (आ. VI. 8) । एवंपूर्व इति किम् ? " अमेध्या वै माषाः " (V. 1. 8) । घोषयुक्तत्वात्प्राप्तिः । क इत्यत्र 'अ'कार उच्चारणार्थः । प इत्यत्र 'अ'कारः सर्वस्वरान्तग्राहकः । अत एव " उपोत्थाय " (VII. 5. 15) । इत्यत्र द्वितीयवर्णः ॥

(मू) श्रृं पं ग्रं मं च मां पूर्वः समाने तु चतुर्थ च ।

श्रृं, पं, ग्रं, मं, मां, एवंपूर्वे द्वितीयवर्णः । समानपदे विद्यमानचतुर्थशब्दोऽपि तथा । यथा— " व्यानाय त्वेत्यनुश्रृन्थति " (VI. 1. 9) । " पन्थामनूवृग्भ्माम् " (V. 7. 23) । " यं प्रथमं ग्रन्थिं ग्रथ्नीयात् " (VI. 2. 9) । " मन्थमेतत्ते तत " (I. 8. 4) । " एवैनं मन्थति जाताय " (VI. 3. 5) । " मान्थालाः कुलि परिमा पतन्ति " (ब्रा. II. 5. 8) । एवंपूर्व इति किम् ? " त्रिवन्धुरो मनसा " (ब्रा. II. 8. 7) । " त्रिवरूथस्त्रिवन्धुरः " (ब्रा. II. 6. 10) । इत्यादि चतुर्थवर्णः । " चतुर्थाः पञ्चमेषु श्रयध्वम् " (आ. III. 11. 2) । " चतुर्थेषु श्रयध्वम् " (आ. III. 11. 2)। समाने इति किम् ? " चतुर्धा वा एताः " (VII. 2. 10) ॥

(मू) मथ्यमानो रथ्यस्वारः पृथ्वी राथन्तरोऽपि च[1] ॥ ५७ ॥

मथ्यमानः, स्वरितयुक्तः 'रथ्य' इति शब्दः, पृथ्वी, राथन्तरः, एते शब्दाः द्वितीयसहिताः । यथा— " अग्नये मथ्यमानाय " (VI. 3. 5) । " रायस्यामरथ्यो विवस्वतः " (ब्रा. II. 8. 5) । स्वार इति किम् ? " तेन मेरध्यदिशोऽभ्ययम् " (I. 8. 16) । " भ्रातृव्येभ्यो रध्यामः " (VI. 2. 2)। अत्र चतुर्थवर्णः । " पृश्नि पृथ्वी बहुला न उर्वी " (आ. X. 2, I. 1. 14)। राथन्तरो वा ऐन्द्रवायवः " (VII. 2. 8)। अपिशब्दात् " उपोत्थाय प्रजाम् " (VII. 5. 15)। इत्यादिषु तवर्गद्वितीयवर्णः ॥

---

1 'पिहि' ख. ग.

—भ—

इतः परं 'प'वर्गचतुर्थान्याह—

(मू) फल फेन फणत् फर्व्य शफेभ्योऽन्यो भ उच्यते ।

फल, फेन, फणत्, फर्व्य, शफ एषु द्वितीयवर्णः, एभ्यः अन्यः 'भः' उच्यते भकारः उच्यत इत्यर्थः । यथा— " पुष्पेभ्यः स्वाहा फलेभ्यः स्वाहा " (VII. 3. 19) । " याः फलिनीः " (IV. 2. 6) । अकारान्तगृहीतत्वात् । इदमप्युदाहरणम्—" फल्गुनी नक्षत्रम् " । " अपां फेनेन शिर उदवर्तयत् " (ब्रा. I. 7. 1) । " अन्वापनी फणत् " (I. 7. 8) । " प्रफर्व्यं च पीवरीम् " (IV. 2. 5) । " अश्वशफेन " (ब्रा. III. 9. 11) । " कूर्मान् शफैरच्छलाभिः " (V. 7. 13) । इति च; अकारान्तगृहीतत्वात् । एतेभ्योऽतिरिक्तवर्णः चतुर्थवर्णः । तदेवं दर्शयति—

(मू) वैशंभल्या च शीभादौ पवर्गे च चतुर्थगः[1] ॥ ५८ ॥

यथा— " या सरस्वती वैशंभल्या " (ब्रा. II. 5. 8) । " ताः शीभं समवल्गत " (V. 6. 1) । आदिशब्दात् । " अभीपातो वृष्ट्या " (III. 1. 11) । " आभिः स्पृधः " (ब्रा. II. 8. 3) । " अमवाँ इभेन " (I. 2. 14) । " उभये वा एते " (ब्रा. I. 4. 1) । " त्रैष्टुभेन छन्दसा[2] " (I. 1. 9) । " शरभमारण्यम् " (IV. 2. 10) । इत्यादौ आदिशब्दस्य प्रयोजनं द्रष्टव्यम् ॥

---

१ 'र्थकः' क. ग. इतोऽनन्तरं 'भूयांसो' इत्यादि दृश्यते ग. २ 'सा" । "ऋभुर्येभिर्वृषपर्वा विहायाः " । " एभिर्नो अर्कैः " । " नमः ककुत्राय " । " शक्तीवन्तो गभीराः " । " गभस्तयः " । " वितत सञ्जभार " । " ताभिरेवैनम् " । " दुन्दुभीन् " । "नभसस्पते" । " सुतमा बभूवुः " । " प्रयाभिर्यासि " । " शरभमाण्यम् " । " अन्नं रभसं विदानम् " । " वातादारभे " । " नर्मायरेभम् " । " एकादशिनीमालभेरन् " । " शुभस्पती इदमहम् " । " अस्तभ्नाद्यामृषभः " । " सुसभेयः " । " अहभून ऋषिः " । " विभक्तिं करोति " । इत्यादि । (मू) अवाङिति ख.

—ङ—

अनुनासिकान्याह—

(मू) अवाङिति[1] ङकारान्तं[2] नाभिमूर्ध्वं[3] च[4] सर्वदा ।

नाभिमूर्ध्वं 'नाभि'मित्येवंपरं 'अवाङ्' इति पदं सर्वदा पदकालेऽपि ङकारान्तं भवति । यथा— " मामेऽवाङ् नाभिमति "—" मा । मे । अवाङ् । नाभिम् । अति" । (III. 2. 5) । अत्र[5] किम् ? "वाञ्च आसन्" । " वाक् । मे । आसन् " । (V. 5. 9) ॥

—ञ—

(मू) याच्ञैव[6] च ञकारान्तमुपञ्जु[7] च तथैव च ॥ ५९ ॥

याच्ञा, उपञ्जु, एतौ ञकारान्तौ । यथा[8]— याच्ञैवास्यैषोप " (I. 5. 7) । " उपञ्जु बाधो नमसा " (ब्रा. III. 6. 10) । अनयोः यकारान्तत्वाभावार्थमयमारम्भः[9] ॥

— ज्ञ – ग्न —

(मू) कस्मा उप[10] य रा जाच्च ने नवर्णात्परौ च ये ।

तत्पूर्वौ[11] तपरौ स्यातां जञावन्यौ[12] गनौ स्मृतौ ॥ ६० ॥

कस्मै, उप, य, रा, ज, इत्येतस्मात्परौ जकारञकारौ स्तः । यथा— " स कस्मा अज्ञि " (ब्रा. II. 2. 9) । " उपञ्जु बाधः" (ब्रा. III. 6. 10) । " यज्ञियं तेन त्वादधे " (I. 2. 12) । " सर्पराज्ञी ते यदेव " (VII. 3. 1) " जज्ञि बीजम् " (VII. 5. 20) । " वरुणो अजिज्ञिपत् " (II. 1. 11) । " गावो हि जज्ञिरे " । अकारान्तत्वादिति ध्येयम् । " संज्ञानं ह्येतत् " (आ. III. 12) ने नकारपरे ये यकारे परे च सति अनवर्णात्परौ अवर्णादन्यवर्णपूर्वौ

---

१ 'वागिति' ख. २ 'न्तना' ख. ३ 'र्ध्वं तु' ख. ४ 'न्तं च भ' क. ५ 'एवम्पर इति किम् ?' ख. ६ 'ञ्चेति च' ख. ७ 'पञ्ञु च' ख. ८ 'अनयोः ञकारान्तः स्यात् । यथा–'ख ९ 'न्ताभाव इत्ययमार' ख. १० 'स्मा ओप' ख. ११ 'तत्पूर्वत' ख. १२ 'न्यौ नगौ स्मृ' ख.

जज्ञौ जकारञकारौ स्तः । यथा— " विज्ञानं यज्ञं तनुते" (आ. VIII. 5. 2) । " बलविज्ञाय स्थविरः " (IV. 6. 4) । " तद्विज्ञाय " (आ. IX. 1) । " प्रज्ञाय ते " (VI. 3. 4) । 'अनवर्णादिति किम् ?' " अग्निना वै होत्रा " " अग्नयेऽनीकवते " । " अग्नये स्वाहा " (VII. 1. 20) । " अग्निना विश्वाषाट् " (IV. 5. 8) । इत्यादि । तकारपूर्वौ तकारपरौ च जकार-ञकारौ स्तः । " असितज्ञवे स्वाहा " (VII. 3. 17) । " इमेऽज्ञत यदग्रे" (VI. 5. 6) । एभ्यः अन्यौ गनौ गकारनकारौ स्मृतौ । अत्र किम् ? " अग्निश्च मे " (IV. 7. 5) । " जमदग्निः " (II. 2. 12) इत्यादि ॥

अनुनासिकशब्दाः

इतःपरं अनुनासिकवर्णसहितशब्दा उच्यन्ते ।

(मू) भूयाँस उनन्तशब्दोच्चशँस्तासूर्ध्वाँहोऽतँसयत् ।
उन्नवँशं स्त्रीषसादं सावन्यो मुखोच्चकः ॥ ६१ ॥
आताँसीच्छँसिने शँसन्नासिक्यो दुषदँ सदः ।

यथा— " तस्माद्भूयाँसः " (VII. 1. 1) । " उतशँस्तासु विप्रः " (IV. 6. 8) । ऊर्ध्वादपि उपरि चेत् 'अँह' इत्यनुस्वारागमः स्यात् । " अँह इन्द्रमेवाँहोमुचँ " (II. 2. 7) । " गभे मुष्टिमतँसयत् " (ब्रा. III. 9. 7) । " उद्वँशमिव " (I. 6. 12) । " प्राचीनवँशं " (VI. 1. 1) । " स्त्रीषँ-सादम् " (II. 5. 1) । " उत्तरेऽसाँवेव प्रति " (V. 3. 1) । " अन्वाताँ-सीत्त्वयि " (IV. 7. 13) । " ब्राह्मणाच्छँसिने " (I. 8. 18) । " अभिन्य-शँसन् " (VI. 6. 11) । " स्वादुषँसदः " (IV. 6. 6) । इत्यादिषु नित्यानुस्वारः । तत्सर्वग्रहणं किं न स्यात् ? उच्यते । एवं चेदतिव्याप्तिः स्यात् । किन्तु उभयत्र तु लवर्णान्विते संदेहे नातत्कार्यभाजमुपादानमित्यादि विज्ञेयम् ।

---

१ 'र्णात्पराविति' ख. २ 'ह्ग' । " आग्नेयं पशुमालभते" इत्यादि । ख. ३ पूर्वपरौ किम्' ? ख ४ एतदारभ्य 'रुन्धे' पर्यन्तं नास्ति ख. 'भूयांसोऽनन्तोच्चशंस्तामूर्ध्वे होत्राप्यतं सयत्' ग. ५. 'वंशस्त्रिषं सा(द्र ? ह)मं सामन्यो' ग. ६ 'क्योऽत्र दृषं सदः । अर्वाङिति ङकारान्त नाभिमूर्ध्वं तु सर्वदा । याच्त्रेति च ञकारान्त उपज्ञु च तथैव च । स कस्मा [illegible] नेव वर्णात्परौ च ये । नपूर्वौ तपरौ स्यातां जज्ञावन्यौ गनौ स्मृतौ । शब्दैक्ये' ग.

अत्र किम्? "तेजस्वी भूयासं यत्ते" (III. 5. 3)। "विशस्ता द्वा यन्तारा" (IV. 6. 9)। "अहस्तस्मिन्नैन्द्रवायवः" (VII. 2. 8)। "अतसं न शुष्कम्" (I. 1. 14)। "ब्रह्मवर्चस्येव भवति। वशं वा एषः" (II. 1. 7)। "निषसाद धृतव्रतः (I 8. 16, ब्रा. I. 7. 10)। "असावेहीत्येवमेवैनाः" (II. 4. 9)। "असावादित्यः" (II. 1. 8)। एषु नानुस्वारः॥

(मू) शब्दैक्ये रषपूर्वो[1] णो व्यवेतो[2] स्पृषतेः क्वचित्॥ ६२॥

यथा— "पूर्णा पश्चात्" (III. 5. 1)। "तरति तूर्णिः" (II. 5. 9)। "सुवर्णं घर्मम्" (आ. III. 11)। "स्वयमातृण्णाम्" (V. 2. 8)। "कृष्णः" (V. 5. 24)। व्यवहितोऽपि— "दूरोहणं छन्दः" (IV. 3. 12)। "चैत्रियायणश्चितिम्" (V 3. 8)। "भ्रातृव्येण" (II. 4. 2)। "पौरुषेयेण दैव्येन" (IV. 7. 5)। इत्यादिषु अखण्डपदे णकारः। अत्र किम्? "वृत्रतूर्नो यज्ञम्" (ब्रा. II. 8. 3)। "स्वर्नरो ज्योतिषीमान्विभासः" (आ. I. 7. 1)। "नखनिर्भिन्नम्" (I. 3. 9)। एषु नकारः॥

(मू) चर्मण् चर्षण् वृषण् शीर्षण् ब्रह्मण्णक्षण्णवग्रहे।
वाणश्शतार्णवश्चापि[3] मेण्यादौ प्राकृतश्च णः॥ ६३॥

यथा— "चर्मण्वते स्वाहा" (VII. 5. 12)। "चर्षणीधृतः श्रवः" (III. 4. 11)। "अपां वृषण्वान्" (II. 1. 11)। "शीर्षण्वान्मेध्यो भवति" (VII. 5. 25)। "ब्रह्मण्वन्तो देवाः" (VI. 4. 10)। "अक्षण्वते स्वाहा" (VII. 5. 12)। एषु णकारः अवग्रहे विज्ञेयः। अवग्रहे इति किम्? "चर्मन्नाधि ग्रावभिः" (VI. 2. 11)। "संसमिद्युवसे वृषन्" (II. 6. 11, IV. 4. 4)। "शीर्षन्दधाति" (VI. 2. 1)। "ब्रह्मन्प्रस्थास्यामः" (II 6. 9)। "अक्षन्नमीमदन्त" (I. 8. 5)। "वाणः शततन्तुः" (VII. 5. 9)। "प्रियङ्गवश्च मेऽणवश्च मे"

---

१ 'रेफपू' ग. २ 'तोऽप्यृष' ग. ३ 'णवश्च ह्येणिधा प्राक् पदे च णः।' ग.

(IV. 7. 4) । " वनस्पतीनामेण्यह्वे " (V. 5. 15) । "एवास्मै प्रहिणोति" (II. 2. 6) । " येऽणिष्ठाः " (II. 5. 5) । " निजल्गुलीति धाणिका " (VII. 4. 19) । इत्यादौ पदकालेऽपि णकारः । अत्र किम् ? । " अभिषण्णो यस्मात् " (II. 4. 2) । " निषण्णाय स्वाहा " (VII. 1. 19) । " अधिषवणमसि " (I. 1. 5) । " अभिषुणुयात् " " अभिषूयमाणस्य " इत्यादौ संहितायामेव णकारः न तु पदकाले । " अभिषूयमाणस्येत्यमि सूयमानस्य " । इत्यादि ॥

(मू) बस्तपूर्वपरो वृष्णि वृष्णा वृष्णश्च वृष्णियम्[1] ।

दूरादपि बस्तशब्दः पूर्वः परो वा वृष्णशब्दे णकारः । यथा— " बस्तो वयो विवलं छन्दो वृष्णिर्वयः " (IV. 3. 5) । " तस्मै वृष्णिं प्रत्यस्यत् " (V. 7. 10) । " तस्मै बस्तम् " (V. 7. 10) । गावस्तेनाजा वृष्णिनावीः " (VII. 3. 14) । "युधो नर इषुहस्तेन वृष्णा" (IV. 6. 4) । " वृष्णो अश्वस्य संदानमसि " (II. 8. 7) । चकारेण वृष्णशब्दोऽप्युच्यते । " वृष्णे चोदस्व सुष्टुतिम् " (II. 6. 11) । " विश्वतः सोमवृष्णियम् " (III. 2. 5.) । अत्र ' ण ' इति किम् ? । " सृजावृष्टिं दिवः " (II. 4. 8) । " आपो वै वृष्टिः " (आ. I. 26) । इत्यादौ षकारात् परत्वे न टकारः ॥

(मू) रुन्धे हुकः[2] पूर्वाद्यज्ञो विष्णुः कृष्णः क्रमोदितौ[3] ॥ ६४ ॥

यथा[4]—" अवरुन्धे यज्ञो देवेभ्यो निलायत । विष्णू रूपम्[5] " (VI. 2. 4) " प्रजाग्राहुकः स्यात् " (VI, 4. 1) । " यज्ञो देवेभ्यो निलायत । कृष्णो रूपं कृत्वा " (ब्रा. III. 2. 5) । अनयोः किम् ? " तेनापः प्रोक्षिताः । अग्निर्देवेभ्यो निलायत कृष्णो रूपं कृत्वा " (ब्रा. I. 1. 3) । " आपो देवीः

---

१ ' वृष्णयः । ' ग. २ ' काः क्षितामाने वि ' ख. ' हुका अधोयज्ञो ' ग. ३ ' क्रमादिमौ । उद्धन्तीति च सावित्रमाखुरस्यः क्रमाद् भवेत् ' ॥ ख. ' क्रमादिमौ । अन्तो ' ग. ४ रुन्धे, हुकाः, क्षिताः, माने, एवम्पूर्वः क्रमात् विष्णुः, इमौ, स्याताम् । उद्धन्ति, सावित्रम्, आखुः, अश्व, क्रमाद् भवेत् । यथा–' ख. ५ "रूपं कृत्वा", " तेनापः प्रोक्षिताः । अग्निर्देवेभ्यो निलायत कृष्णो रूपं कृत्वा । उद्धन्तीत्यनुवाके यथा—" अग्निर्देवेभ्यो निलायत आखूरूपं कृत्वा । अश्वोरूपं कृत्वा । सावित्रमष्टाकपालम् " । प्रातमिज्ञनुवाके यथा—" प्रजापतिर्देवेभ्योऽनिलायत । अश्वो रूपं कृत्वा " । (मू) अन्तो ' ख.

(ब्रा. III. 3. 6) इत्यनुवाके । " उद्धन्ति " (ब्रा. I. 1. 3) इत्यत्र " अग्निर्देवेभ्यो निलायत । आखू रूपं कृत्वा " (ब्रा. I. 1. 3) । " सावित्रम् " (ब्रा. III. 8. 12) —इत्यनुवाके " प्रजापतिः + + । अश्वो रूपं कृत्वा " (ब्रा. III. 8. 12) ॥

— रुन्धते – दधते —

(मू) अन्तोऽनन्त्यं न[1] वै इन्द्रस्तस्याप्रति न मध्यगम्[2] ।
ताप्र्यं च रुन्धते त्वेषु दधते स्यात्परत्र तु ॥ ६५ ॥
एकैकस्त्रिवृदाग्नेयं विश्वा युञ्जन्ति चाग्नये ।
त्वं ह्यप वै न देवोर्ध्वे इन्द्रश्चत् पुर आदितः ॥ ६६ ॥

उक्तानुवाकक्रमात् " अन्तो वा " (ब्रा. II. 2. 6) इत्यस्मिन्ननुवाके अन्त्यं विना । " न वैतानि " (ब्रा. I. 2. 2) । " इन्द्रो वृत्रमहन् तस्य " (VI. 5. 9) । " अप्रतिष्ठाम् " (ब्रा. I. 2. 5) इत्यस्मिन्ननुवाके न मध्यगम् । " ताप्र्यम् " (ब्रा. I. 3. 7) ।—एषु रुन्धते इति बहुवचनं स्यात् । अन्तो वा इत्यत्र यथा—" अन्नमेवावरुन्धते मनसा प्रस्तौति " (ब्रा. II. 2. 6) । अनन्त्यमिति किम् ? " गुह्यं ब्रह्मावरुन्धे । तदेव प्रकाशम् " (ब्रा. II. 2. 6) । न वैतानीत्यत्र यथा—" मिथुनमेव तैर्यजमाना अवरुन्धते । बृहत्पृष्ठं भवति " । " देवता एवावरुन्धते । ये वा इतः " (ब्रा. I. 2. 2) । इन्द्रो वृत्रमहन् तस्येत्यत्र यथा—" तमेवावरुन्धत उत्तरवेद्याम् " (VI. 5. 9) । तस्येति किम् ? इन्द्रो वलस्य बिलमित्यत्र " लक्ष्मियैव पशूनवरुन्धे" (II. 1. 5)—इत्येकवचनम् । अप्रतिष्ठां वा इत्यत्र यथा— " देवता एवावरुन्धते । द्यावापृथिव्यां धेनुमालभन्ते " (ब्रा. I. 2. 5) । " मासैरवरुन्धते " (ब्रा. I. 2. 5) " यदेते गव्याः । " (ब्रा. I. 2. 5) । न मध्यग इति किम् ? " वायुरेवैभ्यो यथायतनाद्देवता अवरुन्धे " । ताप्र्यमित्यत्र यथा— " दिग्भ्य एवास्मा अन्नाद्यमवरुन्धते । ईश्वरो वा एषः " (ब्रा. I. 3. 7) । एष्वनुवाकेषु " रुन्धते " इति बहुवचनम् । एकैकः, त्रिवृत्, आग्नेयम्, विश्वा, युञ्जन्ति च, अग्नये, अप वै,

१ ' नवाइ ' ख. ' अन्तो नान्त्यं नवाइ ' ग. २ ' मध्यमम् ' ग.

न देवः, ऊर्ध्वः एष्वनुवाकेषु “ इन्द्रः ” “ श्रत् ” “ पुरः ”—एवं पूर्वः दधते इति बहुवचनम् । देवा इति परे न स्यात् । यथा— “ तत्रेन्द्रो दधते ” (II. 2. 12) । “ श्रदेभ्यो मनुष्या दधते ” (VII. 4. 1) । “ पुर एनं दधते ” (II. 1. 2) । “ एकैको वा ” (ब्रा. I. 4. 6) इत्यत्र यथा— “ आयुरेवात्मन् दधते । अथो पाप्मानमेव विजहतो यन्ति ” (ब्रा. I. 4. 6) । त्रिवृद्बर्हिर्भवती-त्यनुवाके यथा — “ अथो आत्मन्नेव रेतो दधते ” (ब्रा. I. 6. 3) । आग्नेय-मष्टाकपालं निर्वपति इत्यनुवाके यथा — “ सवित्रापि रुन्धते + + ब्राह्मणा यज्ञानादधते ” (ब्रा. I. 8. 4) । विश्वा इत्यनुवाके यथा — “ तेज एवात्मन् दधते ” (आ. V. 8) । युञ्जन्तीत्यनुवाके यथा “ प्रजायामेवान्नाद्यं दधते ” (ब्रा. III. 9. 4) । अग्नये इत्यनुवाके यथा— “ प्राणमेवात्मन्दधते ” (ब्रा. I. 6. 9) । त्वं ह्यग्ने प्रथम इत्यनुवाके यथा —“ विश्वेत्सवामादधते । त्वोतः ” (ब्रा. III. 6. 10) । “ प्राणापानावेवात्मन्दधते ” (ब्रा. III. 9. 7) । अप वा एतस्मात्प्राणाः क्रामन्तीत्यत्र यथा— “ प्राणानेवात्मन्दधते । नैभ्यः प्राणाः ” (ब्रा. III. 9. 6) । “ अप ++ प्राणाः ” (ब्रा. III. 9. 6) । “ अप ++ श्रीः ” (ब्रा. III. 9. 7) । इत्यनुवाकयोः समानम् । देवाः[1] परे न स्यात् । यथा — “ प्रजामेव पशूनात्मन्धत्ते । देवा वा अश्वमेधे पवमाने ” (ब्रा. III. 9. 6) । इत्यत्र व्यवहितोऽपि । “ पुर एनं दधते ” । अत्र किम्? “तेज एवात्मन्धत्ते अथो यदेतम् (I. 5. 8) । तत्रेदिन्द्रो दधते पृत्सु तुर्याम् (II. 2. 12) । श्रद्ध वा अस्मै मनुष्या दधते ” (ब्रा. III. 1. 4) ॥

(मू) नवान्ये दधते विद्वाँसः साध्याः[2] षड्तवो वै ।
पृथिव्यै जाजायन्तेन्य एष्वतिष्ठन्त इत्यपि ॥ ६७ ॥

“ साध्याः षड्रात्रम् ” (VII. 2. 1), “ ऋतवो वै ” (VII. 2. 6), इत्यारभ्य “ चर्मेव ” (VII. 5. 10) । “ पृथिव्यै ” (VII. 5. 11) । इति पर्यन्तेषु अनुवाकेषु न वा एष इत्यनुवाकं विना ‘ रुन्धते’ ‘ दधते ’, ‘ विद्वांसः ’, जापूर्वोऽन्यत्र ‘ जायन्ते ’, ‘ प्रतितिष्ठन्ति ’, इत्येते शब्दाः बहुवच-

१ ‘ न देवोर्ध्व इति किम् ? “ प्रजा ” ख. २ ‘ ध्याः ऋतव आपृथि । जापूर्वोऽस्येषु जायन्ते रुन्धते तिष्ठन्ते वर्त्तन्त इत्यपि ॥ ’ ख. ‘ अन्येन वै विद्वांसः साध्याः षड्तवा पृथिवी । जापूर्वान्ये च एष्वेव तिष्ठन्त्यावर्त्तन्त इत्यपि ’ ग.

नानि भवन्ति । यथा — " लोकं यन्ति । त्रिवृदग्निष्टोमो भवति । तेज एवाव-रुन्धते " (VII. 2. 1) । " अथो + + तेज एवात्मन्दधते " (VII. 4. 3) । " प्रजामवरुन्धते प्रजाम् " (VII. 2. 6) । " अन्नाद्यमवरुन्धते । याश्चतस्रः " (VII. 3. 5) ॥ " अवरुन्धते पद्दो निघ्नन्ति " (VII. 5. 10) । " वीर्यं मध्यतो दधते " (VII. 3. 9) । " अथो प्रैव तेन जायन्ते । एकाविंशं भद्रम् " (VII. 5. 8.) । " तेन जायन्त एकविंशो भवति" (VII. 4. 3) । " तेन जायन्ते पृष्ठ्यः " " भ्रातृव्येणावर्तन्ते (VII. 4. 5) । ते संवत्सर एव प्रतितिष्ठन्ति " (VII. 4. 3) । " प्रतितिष्ठन्त्यथो पञ्चाक्षरा " (VII. 4. 5) । " रुन्धते सत्रं वै " (VII. 3. 8) " त्रीण्याश्विनानि भवन्ति " (VII. 4. 5) । " दिक्ष्वेव प्रतितिष्ठन्त्यसत्रम् " (VII. 4. 6) । " लोके प्रतितिष्ठन्ति " (VII. 4. 1) । " ऋतुष्वेव संवत्सरे प्रतितिष्ठन्ति गौश्च " (VII. 5. 1) । " इन्द्रिये प्रतितिष्ठन्ति आजिं धावन्ति " (VII. 5. 9) । अपिशब्दादत्र सिद्धम् । पदमेतेषु बहुवचनं स्यात् । " एतेऽध्यपथेन यन्ति " (VII. 2. 8) । " शर्म नह्यन्ते नार्त्यै " (III. 1. 7) । " यजमानं सृजन्त एतां ह वै " (VII. 5. 4) । " य एवं विद्वांसः षड्रात्रम् " (VII. 2. 1) । " य एवं विद्वांस एकादशरात्रम् " (VII. 2. 6) । " य एवं विद्वांसस्त्रयोदशरात्रम् " (VII. 3. 3) । " य एवं विद्वांसस्त्रयस्त्रिंशदहम् " (VII. 4. 5) । " य एवं विद्वांसः संवत्सरमुपयन्ति " (VII. 5. 1) । जापूर्व इति किम् ? " द्व्यनीका प्रजा जायते " (VII. 4. 5) । ' नवान्ये ' (VII. 2. 10) । इति किम् ? " य एवं विद्वान्द्वादशाहेन यजते " (VII. 2. 10) । " मलं जायत एक एव " (VII. 2. 10) । ' ऋतव ' आ ' पृथिव्य 'न्तःपातित्वात् बहुवचने प्राप्ते तदपवादोऽयम् । एष्विति किम् ? " उभयस्यावरुध्यै । त्रिवृदग्निष्टोमो भवति " (VII. 2. 2) । " तेज एवात्मन्धत्ते " (VII. 2. 3) इत्यादि ॥

(मू.) कुसुरुबिन्दो[1]ऽप्रतिष्ठां[2] च उत्क्रा प्रजापतिर्नव ।
आयुर्वा अन्त[3] आदित्यं प्रजाग्निं तं प्र संततिः ॥ ६८ ॥

१ ' बिन्द्वाप्र ' ख. ' कुसुर्वस्य प्रति ' ग. २ ' प्रतिष्ठोतत्काम प्र ' ख. ३ ' न्तआ ' ख. ग.

धिष्ण्याद्द्वितीयं[1] च साकं देवस्य स्फ्यं तु[2] बार्हं च ।
ब्रह्म[3] द्वितीयतृतीये[4] पुरुषं प्रतिपूरुषम् ॥ ६९ ॥
देवा मिथो[5] देवस्याहं च्यवन्ते चैषु तद्विधिः ।

कुसुरुविन्दः, अप्रतिष्ठाम् , उत्क्राम, प्रजापतिर्नव, आयुर्वा, अन्तः, आदित्यम्, प्रजा+अग्निं + + तम्+प्र, संततिः, धिष्णिया द्वितीयम्, साकम्, देवस्य स्फ्यम्, बार्हस्पत्यम्, ब्रह्मन् तृतीयम्, पुरुषम्, प्रतिपूरुषम्, देवा मिथः, देवस्याहम्, च्यवन्ते, एष्वनुवाकेषु तद्विधिः च इति सांनिध्यात् प्रतितिष्ठन्ति, वर्तन्ते, लोकाच्च्यवन्ते, इति एते शब्दा नकारवन्तः स्युः । एतदनुवाकक्रमेण अनुनासिकवर्णसहितपदान्युदाहरिष्यामः । कुसुरुबिन्द इत्यनुवाके यथा—"अनयोरेव प्रतितिष्ठन्ति यत्प्रत्यक्षम्" (VII. 2. 2) । अप्रतिष्ठामित्यनुवाके यथा—"एव प्रतितिष्ठन्ति । वायव्यं वत्समालभन्ते" (VII. 2. 2) । उत्क्रामेत्यनुवाके यथा—"तदोषधयः प्रतितिष्ठन्त्योषधीः (V. 1. 3) । प्रजापतिर्नवरात्रमित्यनुवाके यथा—"प्रतितिष्ठन्ति ज्ञात्रं प्रजानाम्" (VII. 2. 4) । आयुर्वा इत्यनुवाके यथा—"प्रजाः प्रतितिष्ठन्ति । मांसेन" (VI. 5. 2) । अन्तो वा इत्यनुवाके यथा—"अस्यामेव प्रतितिष्ठन्ति । चतुर्होतॄन्" (ब्रा. II. 2. 6) । आदित्यं चरुमित्यनुवाके यथा—"अस्यामेव प्रतितिष्ठन्ति वैश्वानरम्" (VI. 2. 6) । प्रजापतिरग्निमसृजत तं प्रजा इत्यनुवाके यथा—"अह्ना प्रतितिष्ठन्ति । यत्सायम्" (ब्रा. II. 1. 2) । संततिरित्यनुवाके यथा—"अस्यामेव प्रतितिष्ठन्ति । अन्योऽन्यो गृह्येते" "एतेऽस्माल्लोकाच्च्यवन्ते । ये वैश्वकर्मणं गृह्णते" । "अस्यामन्येन प्रतितिष्ठन्ति । ता वा पराधांत्" (ब्रा. I. 2. 3) । धिष्णिया द्वितीयमित्यत्र यथा—"तस्मादस्थान्याः प्रजाः प्रतितिष्ठन्ति । अथो खल्वाहुः" (ब्रा. III. 3. 8) । द्वितीयमिति किम्? "दिक्ष्वेव प्रतितिष्ठन्ति । बर्हिषदं करोति" (ब्रा. III. 3. 8) । साकं जानामित्यत्र यथा—"याः प्रतितिष्ठन्ति । संवत्सरे ताः प्रतितिष्ठन्ति" (आ. I. 3) । देवस्य स्फ्यमित्यत्र यथा—"चतुरङ्गुले ह्योषधयः प्रतितिष्ठन्ति" (ब्रा. III. 2. 9) । बार्हस्पत्यामित्यत्र यथा—"अन्नं प्रयच्छन्ति" (II. 1. 6) ।

---

१ 'धिष्णिया' ख. ग. २ 'स्फ्यंतथाहुना' स. 'च.रुर्ह' ग. ३ 'ह्मन् द्वि' स. ४ 'यं पुं' ख. ५ 'मिथं दे' स.

ब्रह्मन् प्रचरिष्याम इत्यत्र द्वितीयं तृतीयमिति यथा—" ऋतुष्वेव प्रतितिष्ठन्ति । यो वै घर्मस्य दिक्ष्वेव प्रतितिष्ठन्ति । ऊर्ध्वं धून्वन्ति " (आ. V. 4) । द्वितीय-तृतीयमिति किम्? " अस्यामेव प्रतितिष्ठत्यनुन्मादाय " (आ. V. 4) । पुरुषमात्रेणेन्यत्र यथा— "कृष्टे ह्योषधयः प्रतितिष्ठन्ति" (V. 2. 5) । "दक्षिणा पर्यावर्तन्ते । + + तस्मात्पराञ्चः" (V. 2. 5) । प्रतिपूरुषमित्यत्र यथा—"अस्यामेव प्रतितिष्ठन्ति (ब्रा. I. 6. 10) । यन्निर्ब्रूयात्" (?) । " एतेस्माल्लोकाच्च्यवन्ते । ये त्र्यम्बकैः " (ब्रा. I. 6. 10) । देवासुरा+ +मिथ इत्यत्र यथा—" आस्मिँल्लोके प्रतितिष्ठन्ति । देवासुराः " (VI. 2. 2) । "एतेऽस्माल्लोकाच्च्यवन्ते । ये सोमम्" (VI. 2. 2) । देवस्याहं सवितुरित्यत्र यथा—" प्रवा एतेऽस्माल्लोका च्च्यवन्ते । य आजिं धावन्ति " (ब्रा. I. 3. 6) ॥

(मू) वाग्वा[1] इन्द्रस्त्रिवृद्बर्हिर्नः प्रतिष्ठापयन्ति च ॥ ७० ॥

वाग्वै, इन्द्रः, त्रिवृद्बर्हिः, एष्वनुवाकेषु प्रतिष्ठापयन्तीति नकारवन्तः शब्दाः । यथा—" यजमाने प्रतिष्ठापयन्ति स्वाहा यज्ञम् " (VI. 1. 4) । इन्द्रो वृत्रमहन् तस्येत्यत्र यथा—" पशुष्वेव पशून्प्रतिष्ठापयन्ति " (VI. 5. 9) । गृहान्वा अनु । (VI. 5. 10) । त्रिवृद्बर्हिर्भवतीत्यत्र यथा—" यजमान एव पशून्प्रतिष्ठापयन्ति " (ब्रा. I. 6. 3) । प्रजापतिः सविता (ब्रा. I. 6. 4) । एषु नकारः । अत्र[2] किम्? " पशून्प्रतिष्ठापयन्ति स्वाहाकृतीभ्यः प्रेष्येत्याह " (VI. 3.9) ॥

(मू) विवा[3] एता वप्रतिष्ठां तार्प्यं तृतीयेतुर्ययोः[4] ।
संततिर्यस्य युञ्जन्ति तार्प्येणासुर्यमन्तगम्[5] ॥ ७१ ॥
प्रजापतिः[6] शुक्रमादियत्पशुः समर्धयन्ति नः ।

विवा एतौ (V. 2. 4); अप्रतिष्ठां (ब्रा. I. 2. 5) । तार्प्यं (ब्रा. I. 3.7) यस्य (ब्रा. I. 4. 5) युञ्जन्ति (ब्रा. III. 9. 4) तार्प्येण (ब्रा. III. 9. 20)

---

१ ' वाग्वाइ ' ख. २ ' एष्विति किम् ! ' ख. ३ ' अप्रतिष्ठां विवा एतौ ता ' ख. ग. ४ ' तीयचतुर्थयोः । ' क. ५ ' णासूर्यमन्तिकम् ' ख. ' णासूर्यमन्तिगम् ' ग. ६ ' पतेश्शुक्रमादिर्यत्पश्वादूर्ध्वोर्धयन्ति नः ' ग.

असुर्यम् (ब्रा. I. 4. 7) संततिः (ब्रा. I. 2. 3)– इति एष्वनुवाकेषु 'समर्धयन्ति' इत्यत्र नकारः । यथा—" पशुभिः समर्धयन्ति " (V. 2. 5) । " पुरुषमात्रेण " (V. 2. 5) । " अहरेव रूपेण समर्धयन्ति " (ब्रा. I. 2. 3) । तार्प्यमित्यत्र यथा— " अन्नाद्येनैवैनं समर्धयन्ति । ऊषे + + + समर्धयन्ति । पुरस्तात् " (ब्रा. I. 3. 7) । तार्प्यं तृतीयचतुर्थयोः इति किम् ? " यज्ञेनैवैनँ समर्धयति । दर्भमयम् " (ब्रा. I. 3. 7) । " सर्वाभिरेवैनं देवताभिः समर्धयति । अथो आक्रमणमेव " (ब्रा. I. 3 7) । [1]अनयोः नकाराभावः । संततिरित्यत्र यथा—" अहरेव रूपेण समर्धयन्ति । अथो अह्न एवैषः " (ब्रा. I. 2. 5) । यस्य प्रातःसवन इत्यत्र यथा— " कामेन समर्धयन्ति । गौरिवीतम् " (ब्रा. I. 4. 5) । " स्वयैवैनं देवतया समर्धयन्ति । भूरिति महिषी " (ब्रा. III. 9. 4) । तार्प्येणाश्वमित्यत्र यथा—" यज्ञेनैवैनं समर्धयन्ति । सामेन साम्ना " (ब्रा. III. 9. 20) असुर्यमित्यत्र यथा— " प्रिययैवैनं तनुवा समर्धयन्ति । यस्या क्रीतम् " (ब्रा. I. 4. 7) । अन्तगमिति किम् ? " तनुवा समर्धयन्ति । गार्हपत्यं मन्थति " (ब्रा. I. 4. 7) । प्रजापतिः शुक्रमित्यत्र यथा–" पयसान्नाद्येन समर्धयन्ति " । " एष ह त्वेव साक्षात् (आ. V. 10) । आदिः इति किम् ? " तेजसैव तेजः समर्धयति । उत्तरवेद्याम् " (आ. V.10) । ' विवा एनमेतदर्धयति यद्वारुणँ सन्तम् " (VI. 1. 11) ॥

— न – ङ —

(मू) [1]सान्यूर्ध्वं त्र्यहा भवन्ति न प्रत्यङ् पृष्ठ्ये[2] आपृथि ॥ ७२ ॥

सा विराडित्यारभ्य अहा भवन्तीत्यत्राकारनकारौ स्याताम् । यथा— " उत्तिष्ठन्ति । ज्योतिर्गौरायुरिति त्र्यहा भवन्ति " (VII. 3. 9) । इमानेव लोकानभ्यारोहन्ति । अभिपूर्वं त्र्यहा भवन्त्यभिपूर्वमेव । ग्रामणीयं प्राप्नुवन्ति । षडाहा भवन्ति (VII. 4. 5) । 'पृष्ठ्ये' किम् ? यथा—" पृष्ठ्यः षडहो भवति " (VII. 2. 6) । इत्यादि " प्रत्यङ् त्र्यहो भवति " (VII. 3. 5) । इत्यत्र ङकारः ।

---

१ ' अहा भवन्ति साप्यूर्ध्वनप्र ' ख. ग. २ ' आदितः । ' ख. ग.

आलभन्त

(मू) आद्या वैन्द्रमुक्षाऽऽग्नेयीं तयास्मिन्नप्रथत्परे ।
पूर्वो मेधा यालभन्त ह्यादन्तोऽस्त्रा[1] भवेच्च नः ॥ ७३ ॥

ऐन्द्रमुक्षाणम्, आग्नेयीम्, इमौ प्रथमौ चेदालभन्तेति नकारस्तकारसहितः । " ते देवा वैष्णावारुणीं वशामालभन्त । ऐन्द्रमुक्षाणम् " (II. 1. 4) । " स्यात् तस्मा एता मह्वा आलभन्ताग्नेयीम् " (II. 1. 2) । आद्या इति किम् ? " वशामालभेतैन्द्रमुक्षाणं वरुणेन (II. 1. 4) । तस्मा एतामल्हा आलभेताग्नेयीम् " (II. 1. 2) । तयैवास्मिन्, अप्रथत, एवम्परः पूर्व, मेधाय, एवम्पूर्वो वा आलभन्तेति स्यात् । यथा– " दशर्षभामालभन्त तयैवास्मिन् " (II. 1. 4) । " कामायालभन्त ततो वा अप्रथत " (II. 1. 2) । " पूर्वमालभन्त " (III. 3. 1) । " मेधायालभन्त नह्यन्यत् " (VI. 3. 5) । अत्र किम् ? " दशर्षभामालभेतामुमेव । कामायालभेतादित्यानेव । आलभेत य एनयोरनुलोमं च" । आदन्तः आकारान्तः अस्त्रा इत्यत्र नकारः स्यात्, यथा—" तान्यस्त्रा पशुभ्यो निरवादयन्त " (ब्रा. III. 2. 5) । " अस्त्रा रक्षः सं " (ब्रा. III. 6. 6) । " अस्त्रैव रक्षांसि निरवदयते " (VI. 3. 9) इत्यत्र नकारः । आकारान्त[2] इति किम् ? " स एवास्मा इन्द्रियम् " इत्यादि मकारः[3] ॥

भविष्यन्ति

(मू) ते भविष्यन्ति देवासुस्तेभ्यः षड्द्वा परश्च च्छन् ।

देवासुराः, तेभ्यः, अनयोः ते भविष्यन्तीत्यत्र बहुवचनं स्यात् । देवासुरास्तेषामित्यत्र यथा–"त इदं भविष्यन्तीति तां व्यह्वयन्त " (II. 4. 3) । तेभ्य उत्तरवेदिरित्यत्र यथा–" त इदं भविष्यन्तीति तामुपामन्त्रयन्त " (VI. 2. 7) । अत्र नकारः । अनयोः इति किम् ? " स इदं भविष्यतीति ते उपामन्त्रयन्त " (III. 1. 3) । ते इति किम् ? " इदमु नो भविष्यति यदि नो जेष्यन्तीति " (I. 5. 1) । षड्, द्वा, एवम्परः छनिति नकारवान् । यथा— " प्रायच्छन्तं

---

१ ' ह्यायन्नोस्माभवेच्च नः ' ग. २ ' आदन्त ' ख. ३ ' रसहितः ' ख.

षडहानि " (V. 5. 2) । " प्रायच्छन्तं द्वादशाहानि " (V. 5. 2) । एवंपर इति किम् ? " तं वसुभ्यः प्रायच्छत्तं त्रीणि " (V. 5. 2) । अत्र तकारः ॥

गच्छन्ति

(मू) इन्द्रोऽगच्छदगच्छन्त्यसौ[1] देवानां नेन्द्रियं तु छन् ॥ ७४ ॥

इन्द्रोऽगच्छत्, अनयोरादौ अगच्छदिति तकारः । पश्चाद् गच्छन्तीति नकारवान् । यथा--" व्यावृतमगच्छद्य एवं विद्वांसः " (VII. 3. 6) । अत्र ' अगच्छत् ' इति तकारः । गच्छन्त्यत्र नकारान्तः । " भ्रातृव्येण गच्छन्ति ज्योतिर्गौः " (VII. 3. 6) । असौ, देवानाम्, अनयोरनुवाकयोर्गच्छन्तीति नकारवान् । असावित्यत्र यथा--" रुचमेव गच्छन्त्यथो " (VII. 3. 10) । देवानां वा अन्तमित्यत्र यथा-- " प्रेमाणमेवास्य गच्छन्ति " (VII. 5. 8) । " साम्राज्यमेव गच्छन्ति प्रेङ्खम् " (VII. 5. 9) । न, इन्द्रियं तु, च्छन् इत्यनुवाके पूर्वविधिर्न स्यात् । किंतु वैपरीत्यमित्यर्थः । आदौ गच्छन्निति नकारवान् पश्चाद् गच्छतीति न नकारः । " देवा वा इन्द्रियम् " (VI. 6. 8) । इत्यनुवाके ' गच्छन्ति ' इति न स्यात् । यथा--"भ्रातृव्येण गच्छतीमे लोकाः " (VI. 6. 8) । " ततो वै तेऽन्याभिर्देवताभिर्व्यावृतमगच्छन्यस्यैवम् " (VI. 6. 8) । अत्र न नकारः । " यथा वै मनुष्याः " (VII. 4. 2) । इत्यादिषु " अगच्छन् ", " गच्छन्ति ", इति बहवः सन्ति । संशयाभावाद् [2]ग्रहणं न स्यात् ।

एवैतान्

(मू) देवस्य[3] रश, सावित्रं मेध्यानेवैना उच्यते ।
देवानाग्नउ पूर्वं तु समीच्येनाविरन्तरम् ॥ ७५ ॥

सावित्रम्, देवस्य + + रशनाम्, अनयोरनुवाकयोर्मेध्यानेवैनानेतौ नकारौ स्तः । "सावित्रं जुहोति कर्मणः" इत्यत्र यथा-" अग्न उदधे " (V. 5. 9) । "मेध्यानेवैनान्करोति । सावित्रम्" (I. 3. 5) । " देवा वै नर्चि " (II. 5.7) ।

---

१ ' गच्छन्तुगच्छन्त्यसौ ' ग. २ ' तद्ग्र ' ख. ३ ' मेध्यानेवैनांश्च सावित्रं देवस्य रशनामिति । ' ख. ' मेध्यानेवान्न उ ' ग.

" वायुर्वा त्वा " (ब्रा. I. 3. 5) । देवस्य + + रशनामित्यत्र (आ. V. 7) यथा—- " मेध्यानेवैनान् करोति । विष्वग्वृतो लो " । अनयोरिति किम् ? " वाचयति मेध्यामेवैनां करोति ॥ " देवानाम्, अग्नउ, इत्यत्र पूर्वः समीची, एनान् इति नकारान्तः । देवा वै नार्चि न इत्यत्र यथा—" तत एवैनान्प्रयुङ्क्ते हिंकरोति " (II. 5. 7) ॥ अग्न उदध इत्यत्र यथा–" भागधेयेनैवैनाञ्छमयति " (V. 5. 9) । समीची नामासीत्यत्र च —" भागधेयेनैवैनाञ्छमयति नार्तिमार्छत्यध्वर्युं न यजमानः " । अग्ने (V. 5. 9) । समीची (V. 5. 10) । इत्यनयोः समानम् । किं च । " भागधेयेनैवैनान्प्रीणात्यथो " (V. 5. 10) । ' अग्न–उ–पूर्व ' इति किम् ? " भागधेयेनैवैनं शमयति । तस्य त्वै " (V. 5. 2) । अत्र नकारो न । किं तु मकारः । अत्र किम् ? "शतरुद्रीयं जुहोति । भागधेयेनैवैनं शमयति " (V. 4. 3) । ' इन्द्रो वृत्रमहन् ' (ब्रा. III. 2. 5) इत्यत्र यथा— " पुनात्येवैनान् । अन्तरिक्षादिव वै " (ब्रा. III. 2. 5) । " पुनात्येवैनान् सकृत् सकृत् " (II. 6. 9) । "पुनात्येवैनान्त्रिस्त्रिः" (VI. 3. 7) । भागधेयेनैवैनान्समर्धयति । अग्निं स्विष्टकृतम् (ब्रा. I. 6. 6) । ध्रुवानेवैनान्कुरुते (I. 6. 10) । इत्यादिषु [1]संदेहाभावाद् ग्रहणं न स्यात् ।

— न – निरवपन् —

(मू) स्यात्ते तास्[2]तान्यथोनत्वं बहुश्रुति दधत्यपि ।

ते । ताः । तानि । एवं पूर्वं दूरतोऽपि पदं नकारवद्भवति । बहुवच[3]न-

---

१ ' सन्दिग्धाभा ' ख. २ ' न्यमाधानत्यं बहुवाक् तु दध ' ख. ' बहुपातद ' ग. ३ ' बहुवाक् तु बहुवचनपूर्ववर्तत्वात्; अपि च ते ताः गृह्यन्ते ऐन्द्राः इत्यादिबहुवचनपूर्वे दधतीति बहुवचनं स्यात् । यथा–– " ता एवास्मिन् ब्रह्मवर्चसं दधाति । ब्रह्मवर्चस्येव भवति । गर्भिणयो भवतीन्द्रियं वै गर्भ इन्द्रियमेवास्मिम् दधाति । ता इन्द्रियं वीर्यं यजमाने दधात्याग्नावैष्णवम् । ता एवास्मिन्निन्द्रियं वीर्यं दधति । यदिन्द्राय । त एनं भिषज्यन्ति । ब्रह्मणो हस्तमन्वारभ्य पर्याहुरेकधैव यजमान आयुर्दधति यदेवतस्य । आयुष्मन्तस्त एवास्मिन्नायुर्द धति सर्वमायुरेति । पुष्टिपतयस्त एवास्मिन् पुष्टिं दधति । क्षीरे भवन्ति रुचमेवास्मिन् दधाति । गृह्यन्ते नव वै पुरुषे प्राणाः प्राणानेव यजमानेषु दधाति । यत्पराचीनानि । एकधैव यजमाने वीर्यं दधाति निवेशनः । सर्व ऐन्द्रो भवन्ति । एकधैव यजमान इन्द्रियं दधाति । सप्तदश प्राजापत्या ग्रहा गृह्यन्ते । बहवो भवन्ति । अपचितिमेवास्मिन् दधाति । अत्र किम् ? नाभिर्दशमी प्राणानेव यजमाने दधाति । अथो दशाक्षरा इत्यादि विज्ञेयम् । ' ख.

श्रुति चेत् दूरतोऽपि 'दधति' इति बहुवचने भवति। यथा— "ते देवा अग्नयेऽनीकवते पुरोडाशमष्टाकपालं निरवपन्" (ब्रा. I. 6. 6)। "ते देवा एतामिष्टिमपश्यन्। + + + +। संस्थाप्यानु निरवपन्" (II. 5. 4)। इत्यादि त्रीणि। "ततो 'देवाः प्रजापतिमुपसमेत्योचुः" (ब्रा. I. 5. 9)। "तं यज्ञक्रतुभिरन्वैच्छन्" (ब्रा. I. 5. 9)। इन्यादि चतुः॥ "दीक्षणीयं निरवपन्" ब्रा. I. 5. 9)। "तानि निरवपन्"। "तैरेवैषाम्"(ब्रा. I. 5. 9)। इत्यादिषु नकारान्वितः॥

(मू) संवत्सरो द्वि साध्यर्तव आदित्याद्वे यथाऽजान्॥ ७६॥

संवत्सरो वै द्वितीयम्, साध्याः, ऋतवः, आदित्या द्वे, यथा, अजान्, एषु एतमित्यादि बहुवचनानि स्युः। संवत्सरो वा इदमित्यत्र यथा—"ऋतवः सृष्टा न व्यावर्तन्त त एतं पञ्चरात्रमपश्यन्" (VII. 1. 10)। द्वितीयमिति किम्? "सोऽकामयतर्तून् सृजेयेति स एतं पञ्चरात्रमपश्यत्" (VII. 1. 10)। साध्या वै देवाः (VII. 2. 1)। इत्यत्र यथा—"तमाहरन् तेनायजन्त ततो वै ते सुवर्गं लोकमायन्। य एवं विद्वांसः षड्रात्रमासते" (VII. 2. 1)। ऋतवो वा इत्यत्र यथा— "तेऽकामयन्त प्रजां सृजेमहि। त एतमेकादशरात्रम्" (VII. 2. 6)। आदित्या (VII. 3. 4)। इत्यत्र यथा– "त एतं चतुर्दशरात्रमपश्यन्, तमाहरन्, तेनायजन्त"। आदित्या + + सुवर्गम् (VII. 4. 6) इत्यत्र यथा—"त एतं षट्त्रिंशद्रात्रमपश्यन् तमाहरन् तेनायजन्त"। यथा वै (VII. 4. 2)। इत्यत्र यथा—" त एतं चतुर्विंशतिरात्रमपश्यन्। तमाहरन्। तेनायजन्त" (VII. 4. 2)। अजान् ह वा (आ. II. 9)। इत्यत्र यथा— "त एतं ब्रह्मयज्ञमपश्यन्। तमाहरन्। तेनायजन्त"। एषु किम्? "स प्रजापतिमुपाधावत्। तस्मा एतमेकविंशतिरात्रं प्रायच्छत्। तमाहरत्। तेनायजत" (VII. 3. 10)। इत्यादिष्वेकवचनानि॥

— इयाव – अयाम—

(मू) सुवरयाम[१] चादित्याः प्रजापत्याङ्गिरोऽपि चेत्।

सुवः, अयाम च, आदित्याः, प्रजापत्य, अङ्गिरसः, अयामेत्यत्र अकारादि-

१ 'सुवरं याम चादित्याः प्रजा सत्रिमङ्गिरियाव चेत्'। ख. 'प्रजामाङ्गिरवेति चेत्' ग.

मकारान्तम् । यथा— " सुवर्गं वा एते " (VII. 4. 9) । इत्यनुवाके— " लोकमयामेति " (VII. 4. 9) । " ब्रह्मवादिनो वदन्त्यतिरात्रः " । अनयोः इयामेति इकारादिमकारान्तम् । " आदित्या अकामयन्त " (VII. 4. 6) । " प्रजापतिरकामयत प्रजायेयेति । + + + । " स त्रिवृतम् " (ब्रा. II 2. 3) । इत्यत्र 'आदित्याश्चाङ्गिरसश्च ' + + + + + लोकमियाम वयम्—' अनयोः स्वर्गं लोकमियामेति क्रमात् अकारेकारौ ॥ ' प्रजापत्याङ्गिर ' इति किम् ? " अङ्गिरसो वै + + स्वर्गं लोकमियावेति " (VII. 1. 4) ॥

— हिरण्मय – हिरण्यय —

(मू) भूत्वा पुरुष दामापि द्यावा शकुनि संश्रितम् ॥ ७७ ॥

तेन ब्रह्मान्तरेणो[1]र्ध्वो हिरण्मयोऽत्र संस्मृतः ।

भूत्वा, पुरुष, दाम, द्यावा, शकुनि, संश्रितम्, तेन, ब्रह्म, अन्तरेण, एवं परः हिरण्मयशब्दो मका[2]रान्वितः । " स ह हंसो हिरण्मयो भूत्वा " (ब्रा. III. 10. 9) । " हिरण्मयं पुरुषम् उप " (V. 2. 7) । " हिरण्मयं दाम दक्षिणा " (II. 4. 13) । " एष मृत्योर्हिरण्मयम् । ... ... । द्यावा पृथिव्योर्हिरण्मयं सँश्रितम् " (आ. X. 1) । " हिरण्मयः शकुनिः " (ब्रा. III. 12. 9) । " शतोद्यामँ हिरण्मयम् । तेन ब्रह्म " (ब्रा. I. 4. 8) । " पुरँ हिरण्मयीं ब्रह्म " (आ. I. 27) । " अमृतो हिरण्मयः अन्तरेण ता[3]लुके " (आ. VII. 6) । एवंपर इति किम् ? " रूपमिन्द्रे हिरण्ययम् " (ब्रा. II 6. 11) " इन्द्रो वज्री हिरण्ययः " (ब्रा. I. 5. 8) । इत्यादि यकारवान् ॥

— समन – सवन —

(मू) पारा[4]वगत्य बहूनामिवोर्ध्वः समनेऽपि मः ॥ ७८ ॥

'[5]पार', 'अवगत्य', ' बहूनाम्', 'इव', एवंपरः " समने " शब्दे मकारः।

---

१ ' न्तरे कोशः परो हिरण्मयोऽत्र मः । ' ख. ' रेकाशः ' ग. २ ' मकारः ' ख. ३ ' लुके ' । " तस्यां हिरण्मभः कोशः " । एदम्प ' ख. ४ ' परागत्ययोषोर्ध्वः समानान् बाहूनां च मः ' ख. ' पारसमा बहूनावग्योषोर्ध्वस्समनापि मः ' ग. ५ ' अपरा, अवगत्ययोषा, समानान्, बहूनाम् एवंपरः समानेति मकारवान् । यथा—' ख.

यथा—" समने पारयन्ती " (IV. 6. 6) । " समनावगत्य " (IV. 6. 6) । " समने बहूनाम् " (आ. IV. 20) । समनेव योषा " (IV. 6. 6) । 'समन' शब्दे अत्र मकारः । एवंपर इति किम् ? " अभिसवना पाहि " (I. 4. 10) । सवने सवनेऽभि " (VI. 6. 11, VI. 4. 11) इत्यादिर्वकारः ॥

— एवैनाम्–(वै त्रिश्च) —

(मू) वारुणोऽन्ते द्विरेवैनां इमेऽवन्ति च सप्तभिः ।

" वारुणो वा[1] अग्निः " (V. 1. 6) । " इमे वै सहास्ताम् " (III. 4. 3) । " सप्तभिर्धूपयति " (V. 1. 7) । एष्वनुवाकेषु 'एनाम्' इत्यत्र मकारः । वारुणो वा अग्निरित्यनुवाके यथा— " वीर्येणैवैनां करोति " (V. 1. 6) । इत्यादिषु दीर्घात्परो मकारः । इमे वै सहेत्यनुवाके यथा– "जीवन्तीभेवैनाँ सुवर्गं लोकं गमयति (III. 4. 3) । 'सप्तभिरि'त्यनुवाके यथा— " वीर्येणैवैनां पचति । + + + द्विः पचन्तु[3] (V. 1. 7) ॥

(मू) यजुषाग्नेः[4] पुनः सृष्टीश्चैनां ब्रह्मा तु दीर्घतः[5] ॥ ७९ ॥

यजुषा, अग्नेः, पुनः, सृष्टीः, ब्रह्मा, एवंपरः " एनाम् " इति मकारः । यजुषा वा एषेत्यनुवाके यथा– " तेनैवैनां पुनः प्रयुङ्क्ते " (V. 5. 3) । अत्र दीर्घात्परो मकारः । पुनः परमिति किम् ? " तेनैवैनं युनक्ति " । " य उ चैनमेवं वेद सृष्टीरुपदधाति " (V. 3. 4) । सृष्टीः परमिति किम् ? " य उ चैना एवं वेदाति छन्दसम " (V. 3. 4) ब्रह्म वै चतुर्होतार इत्यस्मिन्ननुवाके[6] यथा— योह वै चतुर्होतृणां चतुर्होतृत्वं वेद " (ब्रा. III. 12. 5) । इत्यादि

---

१ 'सप्तभिर्वारुणान्ते द्विरिमे भूर्तीं परं न चेत् ।' ख. 'वारुणान्ते द्विरेवैनामिमे वै तत्र सप्तभिः' ग. २ 'के भूतिमिति पदं परं न चेद्यथा-' ख. ३ 'न्तु " । भूर्तिं परं न चेदिति किम् ? " स एवैनं भूर्तिं गमयति " ।' ख. ४ 'जुषैनां पुनः' ख. ग. ५ 'दीर्घतः । देवस्य त्वा(ग्नि)मित्यस्मिन्नेनान्दीर्घमकारवान् । 'दीवे।' ग. ६ 'वाके वाचस्पतिर्होतेत्यादिदीर्घपञ्चकम् । होतृणामिति ऋकारवान् । यथा— " वाचस्पतिर्होता दश होतृणाम् " इत्यादि 'महाहविर्होता सप्त होतृथाम् " इत्यन्तम् । तुश ' ख.

तुशब्दे च ग्रहनिवर्तकः । 'ब्रह्मवादिनो वदन्ति' । 'किं चतुर्होतॄणां चतुर्होतृत्व-मिति' (ब्रा. II. 3. 1) । इत्यादि ॥

— प्रथमजामृतस्य —

(मू) पीवोन्नां प्रथमं चैव हरिं प्रथमजां च मः ।

"पीवोन्नां" (ब्रा. II. 8. 1) । हरिं "हरन्तम्" (आ. III. 15) । इत्येतयोः अनुवाकयोः प्रथमम्, प्रथमजाम्, इति मः मकारः । यथा– "प्रजापतिं प्रथमं यज्ञियानाम्" (ब्रा. II. 8. 1) । प्रथमम् इति किम्? "प्रजापतिः प्रथमजा ऋतस्य" (ब्रा. II. 8. 1) । हरिं हरन्तमित्यनुवाके यथा– मृत्युं यजे प्रथमजामृतस्य" (आ. III. 15) । अनयोः इति किम्? "वागक्षरं प्रथमजा ऋतस्य" (ब्रा. II. 8. 8) । इत्यादि ॥

— वृद्धामिन्द्रः —

(मू) अग्नये नासो, धात्रादि प्रजां वृद्धां च सर्वतः ॥ ८० ॥

अग्नये (II. 2. 4) । नासोमयाजी (II. 5. 5) । धात्रे (ब्रा. I. 7. 2) । एष्वनुवाकेषु प्रजाम्, वृद्धाम्, इति मकारान्तौ स्तः । यथा—"प्रजां प्रजनयति" + + + । वृद्धामिन्द्रः प्रयच्छत्यग्नये रसवते" (II. 2. 4) । "प्रजां प्रजनयति । वृद्धामिन्द्रः प्रयच्छति यज्ञः" (II. 5. 5) । "वृद्धामिन्द्रः प्रयच्छति । बभ्रुर्दक्षिणा" (ब्रा. I. 7. 2) । 'तस्यादि' इति किम्? "वृद्धामिन्द्रः प्रयच्छति । पौष्णश्चरुर्भवति" (ब्रा. I. 7. 2) । इत्यादि ॥

— स्यामिति – स्यादिति —

(मू) यामिति मुनिकाण्डे चाप्यर्धुकं स्याद्विसर्जयेत् ।

---

१ "तु शब्दो वा ग्रहपदसिवर्तकः । "एतद्वै चतुर्होतॄणां चतुर्होतृत्वम् किं" ख. २ इतोऽनन्तरम्, (मू) देवस्य त्वाग्निमित्यस्मिन्नेनां दीर्घं मकारवान् । देवस्याग्निमित्यनुवाके यथा—"एभ्य एवैनां लोकेभ्यः प्रोक्षति । अस्यामेवैनां मिनोत्यथो स्वारुहमेवैनां करोति । एनां मिनोति ब्रह्मवनिं त्वा" । अत्र किम्? "पृथिव्या इत्याहे"त्यत्र यथा—"एभ्य एवैनं लोकेभ्यः प्रोक्षति" इत्यधिकं दृश्यते । ख. ३ 'येन्नासो' ग. ४ 'द्वां समःस्मृतः' ग. ५ 'ह्यर्धुकस्यात्तु वर्जयेत । ख. 'मिति स्यात्सप्तमे काण्डे नक्षेष्टिन्तु तथैव च । यः पूर्वश्च तथा योगे अर्धुकन्तु विसर्जयेत् ॥ निवृश्चत' ग.

यापूर्वो मकारसहितः इति शब्दः स्यात् सप्तमकाण्डे । “यः कामयेत सर्वमायुरियामित्यग्निम्” (II. 2. 3)। “यो वा कामयेतसर्वमायुरियामिति तस्मा एताम्” । “यः कामयेत शीर्षण्वानमुष्मिन्लोके स्यामिति” (V. 4. 11)। “पशुमान्स्यामिति । स एतं पञ्चरात्रम्” (VII. I. 10)। “स्यामिति । स एतँ सप्तरात्रमाहरत्” (VII. 2. 2)। “प्रजापतिरकामयतान्नादः स्यामिति । स एतँ” (VII. 3. 8)। ‘अर्धुकम्’[1] इति किम्? “यः कामयेतास्मिन्मे लोकेऽर्धुकं स्यादिति” (VI. 2. 3)। यः इति विसर्गेण किम्? “यं कामयेत सर्वमायुरियादिति । प्रत्रः” (II. 5. 8)। “यं कामयेत पशुमान्थ्स्यादिति । परिमित्या” (V. 2. 6)। “यदि कामयेत वर्षुकः पर्जन्यः स्यादिति” (VI. 4. 5)। “यं कामयेत अन्नादः स्यादिति । तस्मा एतम्” (II. 2. 4) “यां कामयेत दुहितरं प्रिया स्यादिति” (ब्रा. I. 5. 2)। इत्यादि दकारसहितः।

— यकारः —

(मू) ऐत्वं हित्वा ष्यतोर्ध्वश्चेत् अङ्मध्ये य एकतः ॥ ८१ ॥

ष्यतकारः एकतः अखण्डपदे परश्चेत् अकारेकारयोर्मध्ये यकारः उक्तः । तत्र[2] ऐकारः स्फुरितश्चोक्तः तं विसृज्य । यथा— “शयिष्यते स्वाहा” (VII. 1. 19)। “होतानाप्तस्यापयिताऽथाहुः” (VII. 1. 5)। ‘ष्यत’ इति किम्? । ‘समनैष्ट’ । (ब्रा. II. 4. 8)। “पुरा ब्राह्मणा अभैषुः” (I. 5. 7)। ‘एकपदे’ इति किम्? “अनुसंभरै[3]तम्” (ब्रा. I. 4. 4)॥

(मू) निवृश्चत वृश्चतश्चै[4] अन्यो वृश्च्यत तेपरः ।

“नीचैर्देवा निवृश्चत” (ब्रा. III. 7. 6)। “वृश्चतश्च” (ब्रा. III. 10)। आभ्यामितरो “वृश्च्य” शब्दः । त, ते, परो यकारवान्भवति सांनिध्यात् । यथा—“नयेदैभ्यो वृश्च्येत” (III. 2. 8)। “आ देवताभ्ये वृश्च्येत । देवम् । + + + । वृश्च्यते देवीरापः ।” (VI. 1. 4)। “आ-

१ ‘अर्धुस्या तु वर्जयेदिति किम्?’ ख. २ ‘अत्र ऐकारः स्फुरितश्चेत्तमैकारं विसृज्य’ ख. ३ “रैतन्”, ऐकारस्फुरित इति किम्! “इतइतः । पवयं मथित आज्ये”॥’ ख. ४ ‘श्च योऽन्यो वृश्चत’ ख. ‘न्यो वृश्च्यते’ ग.

वृश्च्यते वा एतत्" (III. 3. 8) । "तस्या आवृश्च्येते प्राजापत्यम्" (III. 5. 9) । 'ते' 'त'-परः इति किम्? तस्मा एवैनमावृश्चति । (II. 1. 5) । उत्करेति प्रवृश्चति । (ब्रा. III. 2. 10) "वृश्चेयदक्षसङ्गम" (VI. 3. 3.) । आभ्यामितरदिति किम्? अनयोस्त इति अकारान्त(तरत) कारपरत्वात् यकारे प्राप्ते तन्निषेधार्थमाभ्यामन्यदित्युक्तम् ॥

— ऋत्वियः —

(मू) योनिः[1]पुण्यो हवै योनिं तस्माद्गर्भो यजै[2] महै ॥ ८२ ॥
महो य एषं,स्य हिस्थ पूर्व ऋत्विय एव यः

योनिः, पुण्यः, हवै, योनिम्, तस्मात्, गर्भः, यजै, महै, महः, यः, एषः, स्यहिस्थ एवं पूर्व "ऋत्विय" इत्यत्र यकारो विज्ञेयः । यथा—"अयं ते योनिर्ऋत्वियः" (I. 5. 5) (IV. 2. 4) (ब्रा. I. 2. 1) (ब्रा. II. 5. 8) । "ता अब्रुवन्वरं वृणामहा ऋत्वियात्" (II. 5. 1) । "तस्मादृत्वियात्स्त्रियाः" (II. 5. 1) । "अयं वो गर्भ ऋत्वियः" (IV. 1. 4) । "यज्ञं यथा यजै" । "ऋत्वियवतीस्थः" (ब्रा. I. 2. 1) । "एष ब्रह्मा य ऋत्वियः" (ब्रा. III. 7. 9) । "यज्ञस्य हि स्थ ऋत्वियौ" (ब्रा. III. 7. 8) । एवंपूर्व इति किम्? । "य एव ऋत्विजो वृताः स्युः" (ब्रा. I. 4. 7) । "एते वाव त ऋत्विजः" (आ. V. 4) इत्यादिषु जकारः ॥

— यविष्ठ्य —

(मू) यदग्ने तु यविष्ठ्यात्र [3]सकारोर्ध्वो न होतयुक् ॥ ८३ ॥

यदग्ने यानि अस्मिन्ननुवाके यविष्ठ्य इति यकारवान् । सकारपरश्च होत इति पदेनायुतश्चेत् । यथा—"तज्जुषस्व यविष्ठ्य यदत्ति" (IV. 1. 10) । सकारपरो यथा, "त्वँ ह यद्यविष्ठ्य सहसः" (II. 6. 11) । "बृहच्छोचा-यविष्ठ्य । समिध्यमानः" (ब्रा. I. 2. 1) । अत्र किम्? "सूर्म्या यविष्ठ तां शश्वन्तः" (IV. 6. 5) । इत्यादौ न यकारः । नहोत युगिति किम्?

---

१ 'वहे' क. 'वहे यो' ग. २ 'यजा जहे' ग. 'ष एतुस्थः पू' ख. 'ष एतस्थः' ग.
३ 'सशोर्ध्वश्च न' ग.

" होतर् " इत्येतद्युक्तो ' यविष्ठय ' शब्दे प्राप्ते सत्यपि न भवति यकारान्तः । " होतर्यविष्ठ सुक्रतो दमूना " (I. 2. 14) ॥

— मर्त्यास —

(मू) उषसं चामृतं पूर्वे मर्त्यासोऽत्र य उच्यते ।[1]

उषसं च, अमृतम् एवंपूर्वः मर्त्यासः इति यकारवान् यथा— " व्युच्छन्तीमुषसं मर्त्यासः " (I. 4. 33) । " अजीजनन्नमृतं मर्त्यासः " (ब्रा. I. 2. 1) । एवंपूर्व इति किम्? " देवं मर्तास ईडते " (ब्रा. II 4. 1) । नात्र यकारः ॥

(मू) आकारान्तोरयिष्ठा च अस्तभ्नाद्द्यांदसंयुतम् ॥ ८४ ॥

आकारान्तश्चेद् यकारवान् । यथा—जिज्ञासक्रृता ऋतजारयिष्ठा श्रद्धा । (आ. X. 79) । रयिष्ठामग्निं मधुमन्तम् (आ. VI. 12) । आकारान्त इति किम्? " त्वं रयिष्ठमनुनेषि पन्थाम् " । अस्तभ्नात् एवंपूर्वः द्यामिति पदकाले दकारेण संयुतः । " अस्तभ्नात् । द्याम् । ऋषभः " । एवंपूर्व इति किम्? तस्मात् । याम् । समाम् । इत्यादिपदकाले दकारो मा भूत् ॥

— (वि)राज्ये (व) —

(मू) विराज्येप्रत्यसद्देवा संवत्सर्तुविवै परः ।

असत्, देवाः, संवत्स, ऋतु, विवै, एवं परः ' विराज्ये[2] वान्नाद्ये प्रतितिष्ठति ' इति यैकारसहितः । " विराज्येवान्नाद्ये प्रतितिष्ठत्यसदिव वै " (V. 4. 6) । " विराज्येवान्नाद्ये प्रतितिष्ठति देवा वै " (III. 3. 5) । " विराज्येवान्नाद्ये प्रतितिष्ठति संवत्सरो वै " (V. 6. 10) । विराज्येवान्नाद्ये प्रतितिष्ठत्युतुभिः (VII. 5. 15) । " विराज्येवान्नाद्ये प्रतितिष्ठाति विवा एतौ " (V. 2. 3) । अत्र[3] किम्? " विराजैवान्नाद्यमवरुन्धे । समिधो यजति " (II. 6. 1) इत्यादि ॥

---

१ ' षसश्चा ' ग. २ ' विराज्य ' इति सप्तम्येकवचनं भवेदित्यर्थः । इकारान्ते स्वरपरे सति संहितायामिवर्णोकारौ यवकाराविति यणादेशे प्राप्ते जकारयकारसहितो भवतीति हृद्यम् । ३ ' एवम्परं इति किम्? ' ख.

(मू) मर्तेष्वयोग्निरूर्ध्वे तु पूर्वश्चाद्युच्चमिङ्ग्यगम् ॥ ८५ ॥
अन्तोदात्त सुवर्गश्च लोकशब्दपरेऽपि वा ।

अग्निरित्येतत्परे सति मर्तेषु इत्यत्र यकाराभावः । यथा—“ मर्तेष्वग्निरमृतो नि ” (IV. 2.2) । ‘ एवं परे ’ इति किम् ? “ देव आमर्त्येष्वा ” (I. 1. 14) । इत्यादि यकारवान् । ‘ पूर्व ’ इति पदम् आद्युदात्तम् । इङ्ग्यस्थं वा न यकारवत् । यथा—“ पूर्वमेवोदितम् ” (V. 1. 4) । “ पूर्वेष्वहःसु ” (III. 3. 6) । “ अभिपूर्वं त्र्यहा भवन्ति ” (VII. 3. 9) । “ अथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतून् ” (VII. 4. 10) । अत्र किम् ? यथा—“ प्रपूर्व्यं मनसा वन्दमानः ” (आ. III. 15) । “ नैनं जहात्यहःसु पूर्व्येषु (आ. III. 14) । अत्र यकारः । “ सुवर्ग ” इत्यत्र गकार उदात्तः चेत् यकाराभाव इति चशब्दो ज्ञापयति । लोकशब्दपरो वेति केचित् । यथा— “ वै सुवर्गो लोकः ” (II. 5. 11) । “ सुवर्गं लोकं यन्ति ” (VII. 2. 11) । “ अन्नाद्येन सुवर्गेण लोकेन ” (आ. VII. 3) । गकार उदात्त इति किम् ? यथा—“ सुवर्ग्यो वै पञ्चहोता ” (ब्रा. II. 2. 8) । “ असुवर्ग्यमस्य तत्सुवर्ग्योऽग्निः ” (V. 2. 10) । “ सुवर्ग्यमेवाकस्त्र्यविः (V. 2. 10) । अत्र यकारः ॥

— र —

(मू) वीर्यस्य नस्य चानात्यै राध्नुवन्त्यप्यरेफता ॥ ८६ ॥

वीर्यस्य, नस्य च, एवंपूर्वः “ अनात्यै ” इति रेफरहितः । “ राध्नुवन्ति ” इति शब्दे “ ध्नु ” इत्यत्र रेफरहितः । यथा—“ इन्द्रियस्य वीर्यस्यानात्यै ” (ब्रा. I. 7. 9) । “ नमो मात्रे । यजमानस्य चानात्यै शंत्वाय ” (ब्रा. III. 3. 10) । “ तदनु सर्वे राध्नुवन्ति ” (VII. 4 8) । “ सुवर्गं तु लोकं नापराध्नोति ” (ब्रा. III. 9. 2) । इति ‘ अपि ’शब्दाद्रेफो न स्यादिति द्रष्टव्यम् । अत्र किम् ? यथा—“ सदः प्रसर्पत्यात्मनाऽनार्त्यै ” (III. 2. 4) । “ त आर्घ्नुवन्ते सुवर्गम् ” (I. 5. 4) । अत्र रेफः ॥

---

१ ‘ पूर्वे चाद्यु ’ ग. २ ‘ गम् । अन्तोदात्तसुवर्गश्च लोकशब्दः परोपि च । वीर्यस्य ’ ग.
३ ‘ अग्निरूर्ध्वं इति किम् ! ’ ख. ४ ‘ एषु यकारः ’ ख. ५ ‘ ध्नुमध्येऽप्य ’ ख. ग.

— अनुनासिकः —

(मू) युक्तोत्तमाच्च[1] पूर्वं तु शब्दैक्ये नाऽनुनासिकः ।

समानपदे संयोगोत्तमपरे पूर्वत्र अनुनासिकवर्णो न स्यात् । यथा— " न ह्यन्यदालम्भ्यम् " (ब्रा. II. 1. 6; VI. 3. 5) । " तस्मात्ताम्रा आपः " (VI. 4. 2) । इत्यादौ पदकाले अनुनासिकाभावात् । एकपद इति किम् ? " यो वै नोऽयम्म्रियते " (II. 4. 1) । अत्रानुनासिकः । युक्तोत्तमा इति किम् ? " प्रजावतीरनमीवाः " (I. 1. 1) ॥

अनुदन्त—अनुदत

(मू) मनोजयदु यत्पञ्च त्रयस्त्रिंशत् परोऽनुदत्[2] ॥ ८७ ॥

मनोज, यदु, यत्पञ्च, त्रयस्त्रिंशत् , एवंपरः " अनुदत " इति केवलतकारः । यथा—" अनुदत मनोजवाः " (VI. 2. 7) । लोकेभ्योऽसुरान्प्राणुदत यदुपसदः " (VI. 2. 3) । " दिग्भ्यो रक्षांसि प्राणुदत । यत्पञ्चावत्तीयम् " (ब्रा. I. 7. 1) । " लोकेभ्योऽसुरान्प्राणुदत त्रयस्त्रिंशेन " अत्र किम् ? " लोकेभ्योऽसुरान्प्राणुदन्त । तत्प्रयाजानाम् " (II. 6. 1) । " तांस्ताभिः प्राणुदन्त याः प्रतीचीः " (VI. 4. 10) । इत्यादौ नकारसहितस्तकारः ।

— र —

(मू) आद्युदात्ते तथेङ्ग्यस्थे द्वित्वं वात्र[3] ग्रहे गरौ ।

आद्युदात्ते ' ग्रह 'शब्दे इङ्ग्यस्थे च गकाररेफौ स्तः । यत्र ग्रहशब्दे द्वित्वं तत्रापि तथा । " ग्रहान्वा अनु " (VI. 5. 10) । " अपां ग्रहान्गृह्णाति " (V. 6. 2) । " पृषतीनां ग्रहम् " (III. 2. 6.) । " पृषतीनां ग्रहोऽसि " (III. 2. 6) । इङ्ग्यस्थे यथा—" तदौद्ग्रहणस्यौद्ग्रहणत्वम् । ऋचा " (VI. 1. 2) । " तद्ग्रहाणां ग्रहत्वम् " (ब्रा. I. 1. 4) । " सांग्रहणी भवति " (II. 3. 9) । तत्र आद्युदात्तत्वाभावेऽपि गकाररेफौ । द्वित्वे यथा—

---

१ ' माश्च ' ख. ग. २ ' शत् पूर्वतोदत,' ख. ' पञ्चावत्रयस्त्रिंशचादत ' ग. ३ ' त्वे चात्र ' ख. ' त्वे वात्र ' ग.

मामापोऽसतां च प्रतिग्रहँ स्वाहा " (आ. X. 30) । " आदित्यं ग्रहं गवा । आदित्यग्रहः " (VI. 5. 10) । " जीवग्रहो वा एषः " (VI. 6. 9) । " प्राणा वै प्राणग्रहाः " (III. 5. 10.) । " सोमग्रहांश्च सुराग्रहांश्च गृह्णाति " (ब्रा. I. 3. 3) । " ऋतुग्रहान् " (VI. 5. 10) । अत्र गकाररेफौ ॥

— ग्रहीष्यते-गृहपतिः —

(मू) तव्याःष्योर्ध्वेऽप्यृकारान्ते न मेधपतिसोत्तरे ॥ ८८ ॥[1]

तव्याः, ष्य, एवंपरे ग्रहशब्दे च ऋकारान्ते ग्रहशब्दे च गकाररेफौ स्तः । यथा—" सर्वपृष्ठे ग्रहीतव्याः " (VI. 6. 8) । " उद्ग्रहीष्यते स्वाहा " (VII. 5. 11) । " सह संग्रहीत्रा रथवाहने " (ब्रा. I. 7. 9) । ग्रहशब्दस्य अकारान्तगृहीतत्वं विज्ञेयम् । अत्र यद्यपि ऋकारान्तत्वं तव्यपरत्वं ष्यपरत्वं च व्यर्थम्; द्वित्व-इङ्ग्यस्थाभ्यामेव रेफप्राप्तिसंभवात् । तथाऽपि बालबोधनार्थमिति विज्ञेयम् । " न मेधपति सोत्तरे " इति । ' मेध ' ' पति ' ' स ' एवं परे सति न गकाररेफौ स्तः । यथा—" गृहमेधास आगत " (IV. 3. 13) । आद्युदात्तत्वेन प्राप्तिः " सुगृहपतिरहम् " (I. 5. 6, I. 6. 6) । " सगृहः सपशुः " (III. 5. 4) । अत्र ' पति ' ' स ' इत्यनयोः परनिमित्तयोरपि मन्दधियां प्रत्ययार्थमिति सार्थक्यं द्रष्टव्यम् । सर्वत्र द्वित्वादिप्राप्त्यसंभवादेव निषेधसंभवात् । ननु ' सुगृहपतिरहम् ' ' सगृहः सपशुः ' इत्यादौ इङ्ग्यस्थत्वेन रेफप्राप्तौ सत्यां तन्निषेधकतया तयोः सार्थक्यमिति चेत् । न । इङ्ग्यस्थविधिः द्वित्वप्राप्त्यभावस्थलेऽपि सार्वत्रिको न भवति । अपि तु प्रायिक इति द्रष्टव्यम् । अन्यथा " उद्गृहीताय ", " उद्गृह्णते स्वाहा " (VII. 5. 11) । इत्यादौ रेफप्राप्तिः स्यात् । तस्मात्— " सुगृहपतिरहम् " (I. 5. 6) । " सगृहः सपशुः " (III. 5. 4) । " अग्नये गृहपतये " (I. 8. 10), " यत्पत्नी गृहमेधीयस्याश्नीयात् " (ब्रा. I. 6. 7) । इत्यत्र प्राप्त्यभावादेव रेफाभावः इति स्वीकर्तव्यम् । तथा च तयोः परनिमित्तयोः बालबोधनार्थत्वेन सार्थक्यमिति दिक् ॥

---

१ ' र्ध्वेप्यका ' ग.

(मू) एवैनं[1] च पतिं साक्षात्ताभिरन्तं मुखं तथा ।
ऋतेन मुखतः पूर्वो र स्याद्[2]रभते[3]ऽन्वपि ॥ ८९ ॥

एव[4], एनम्, पतिम्, साक्षात्, ताभिः, अन्तम्, मुखम्, ऋतेन, मुखतः– एवंपूर्वः 'आरभते' इत्यत्र 'र' स्यात् । 'आरभन्त' इति बहुवचनमपि द्रष्टव्यमुपलक्षणतया । यथा— "प्रजापतिमेवारभते" (VII. 4. 3) । "तत एवैनमारभते यद्धस्तेन" (II. 6. 9) । "यज्ञं चारभतेऽग्निरवमः" (V. 5. 1) । "यज्ञमेव प्रजापतिमारभते । प्रवो वाजाः" (II. 5. 7) । "तामेव साक्षादारभते ऋघ्नोत्याभ्याम्" (III. 5. 1) । "यज्ञं ताभिरारभते । यास्तृतीयाः" (VII. 2. 10) । "अन्तादेवान्तमारभते न ततः" (VII. 2. 7) । "यज्ञमुखमारभते । सप्त ते अग्ने" (V. 7. 4) । "सत्येनैवैनमृतेनारभते" (VI. 3. 6) । "यज्ञमेव प्रजापतिं मुखत आरभते" (ब्रा. III. 3. 7) । अत्र चशब्दात् । "तमेवान्वारभते । स एनं" (III. 1. 1) । "वपाश्रपणीं पुनरन्वारभते" (VI. 3. 9) । "पुच्छमन्वारभन्ते" (III. 8. 22) । इति बहुवचनम् । "यत्पशुस्तं यदन्वारभेत" (III. 1. 5) । "तन्नेवान्वारब्धं नेवानन्वारब्धम्" (VI. 3. 8) । इति च द्रष्टव्यम् । अत्र किम् ? "ताभ्यामेवैनं प्रति प्रोच्यालभते" (III. 1. 5.) । "तूपरमालभते । तेजोऽग्नेः" (V. 5. 1) अत्र लकारः ॥

(मू) अगौः पूर्वे तु यज्ञं चान्वात्मानं वत्सरं तथा ।
यज्ञेनोर्ध्वो गृहीत्वा स्वात्तो[5]र्ध्व आरभ्य रेफ[6]गः[7] ॥ ९० ॥

'अगौः पूर्वे' इति पूर्ववचननिषेधः । 'गौः' इत्येवंपूर्वे सति 'आलभत' इति रेफाभावः । यथा—"यज्ञो वै गौः । यज्ञमेवालभते" (ब्रा. III. 9. 8) । अत्र एवपूर्वत्वेन प्राप्तिः । यज्ञं चेत्यादिना 'आरभ्ये'त्यत्र रेफो विधीयते । तथा हि—यज्ञम्, अनु, आत्मानम्, वत्सरम्, एवंपूर्वः; यज्ञेन, ऊर्ध्वः, गृहीत्वा, स्वात्त, एवंपरश्च 'आरभ्ये'त्यत्र रेफः । यथा— "यज्ञमारभ्य वाचं विसृजते त्रिः" (VI. 4. 11) । "यज्ञमेवारभ्य प्रतनुते" (III. 5. 1) । "देव-

---

१ 'यज्ञं चैनं' ख. २ 'दर' ख. ३ 'तेऽत्र च', 'ते त्वपि' ख., 'तेऽत्र हि' ग. ४ 'यज्ञम् च, एनम्', ख. ५ 'रंत्वधः' ख. 'रंचरः' क. ६ 'स्वात्वोर्ध्व' ख. 'स्वाक्तेर्ध्व' ग. ७ 'रेफयुक् ख. 'रेफकः' क. 'रेभतः' ग.

ता एवान्वारभ्य उत्" (VI. I. 11)। "अन्वारभ्यः पशू३र्नान्वारभ्या३ इति" (VI. 3. 8)। "आत्मानमारभ्य चरति" (VI. 1. 11)। "संवत्सरमारभ्य दीक्षन्ते" (VII. 4. 8)। "यो वै श्रद्धामनारभ्य यज्ञेन" (I. 6. 8)। "समारभ्योर्ध्वो अध्वरः" (I. 1. 12)। "पशूनेवारभ्य गृहीत्वोपवसति" (VI. 4. 2)। "य आमेधायारभ्यते स्वात्तम्" (VI. 3. 6)। अत्र[1] रेफः किम्? "पशुमालभ्य पुरोडाशम्" (VI. 3. 10)। "तेजस एष आलभ्यते" (V. 5. 1)। चकारः श्लोकपूरणार्थः ॥

(मू) नरन् रभेत्वनारब्धोऽस्य प्रक्ष्यः प्रवतापि च।
पशुमादित्रयं प्रक्षो देवा होत्रा च रोऽसमः ॥ ९१ ॥

रन् इत्यनेनासंयुतं नरन्। तद् आरभ इति पदं रेफवत्। यथा— "देवहविः पाशेनारभे धर्ष"। (I. 3. 8)। "वातादारभे" (I. 2. 2)। नरन्निति किम्? "यदतिरिक्तामेकादशिनीमालभेरन्" (ब्रा. I. 2. 5)। अनारब्ध इति पदस्यास्येति परश्चेत्। "अनारब्धोऽस्य यज्ञः स्यात्" (VI. 4. 2)। अस्येति किम्? "नेवालब्धमग्नेः" (VI. 3. 5)। प्रक्ष्यः, प्रवत, एतौ च रेफयुक्तौ। यथा— "प्राणमत्यप्रक्ष्यः" (ब्रा. III. 10. 9)। "अतिह्यप्रवत य एवम्" (VII. 1. 1)। अत्र किम्? "सहोवाच प्लक्षो दैयाम्पातिः" (ब्रा. III. 10. 9)। "पशुमालभ्य पुरोडाशम्" (VI. 3. 10)। अस्मिन्ननुवाके आदौ त्रीणि रेफयुक्तानि। "स प्रक्षोऽभवत्। तत्प्रक्षस्य प्रक्षत्वम्"। आदित्रयमिति किम्? "यत्प्लक्षशाखा"। "देवा वै चतुर्होतृभिः" (ब्रा. II. 2. 8)। इत्यनुवाके असमः अयुगः होत्रा इति रेफवान्। "षड्ढोत्रा प्रायणीयमासादयति। चतुर्होत्राऽऽतिथ्यम्" ॥

(मू) अतप्यतपरः सोमश्चाद्याः पञ्च रुण्यतरः।

अतप्यत एवंपरः सोम इत्यादि पञ्च होत्रेति रेफवान्। यथा—"दश होत्रातप्यत। सप्तहोत्रैव सुवर्गम्" (ब्रा. II. 2. 8)। इति च। "सोमश्चतुर्होत्रा। अग्निः पञ्चहोत्रा। धाता षड्ढोत्रा। इन्द्रः सप्तहोत्रा। प्रजापतिर्दशहोत्रा" (ब्रा. II. 2. 8)। अस्मिन् प्रश्ने करुण्यतरः इति रेफान्तश्चशब्दो ज्ञापयति। अस्मिन् प्रश्न इति प्रकरणाल्लभ्यते। "अपरपक्षात् करुण्यतरः। प्रजापतिर्वै दश-

---

१ 'प्र किम्' ख.

होत्रा" (ब्रा. II. 2. 3)। अत्र किम्? "तस्मान्मृत्खनः करुण्यतमः" (आ. V. 2)॥

(मू) सूर्यादित्यपयोधाता दूरादपि च सौर्यरः॥ ९२॥
एक मैत्र जुहोत्यूर्ध्वो नाङ्ग्ध्यूर्ध्वो जरितार च।

सूर्यः, आदित्यः, पयः, धाता, इति दूरादपि देशान्तरेऽपि सौर्य इति रेफवान्। एक, मैत्र, जुहोति, एवंपरश्च। यथा— "पश्यन्ति सूर्यस्येति। सौर्यं चरुमग्नये भ्राजस्वते" (II. 3. 8)। "सौर्यं बलक्षम्"। (ब्रा. III. 8. 23)। "सौर्यं पयः" (VII. 5. 21, ब्रा. III. 9. 17)। "आदित्यः सौर्यं चरुं निरवपन्। तेनैवास्मिन्" (II. 3. 2)। "तेनाभितः सौर्यम्" (II. 3. 8)। आदित्यम् "सौर्यमेककपालमनुनिर्वपेदमुम्" (II. 3. 12)। "सौर्या जुहोति चक्षुः" (V. 5. 3)। अत्र किम्? "सौम्यो राजन्योऽभितः। सौम्यमाग्नेयौ" न, अङ्ग्धि, एवंपरः जरितार इति रेफवान्। यथा— "जरितारो नभूना"। (IV. 6. 2)। "जरितारमङ्ग्धि" (ब्रा. II. 5. 8)। एषु रेफः। अत्र किम्? "सा वा अपश्यञ्जनितारमग्रे" (IV. 2. 10)। "पिता जानितौषधीनाम्" (IV. 6. 2)॥

— ल —

(मू) नासिक्यलत्वमध्ये वोऽन्यंल्लीनासंल्लियाय च॥ ९३॥

न्यंल्लीना, असंल्लियाय अनयोर्नासिक्यलकारयोर्मध्ये वकारः वकारागमः स्यात्। यथा— "प्रहान्यं ल्लीनाति" (ब्रा. III. 2. 9)। "यज्ञस्य धृत्या असंल्लियाय" (ब्रा. I. 5. 5)। अनयोर्नासिक्यात् परो वकारः लकारपरे सति। अत्र[1] किम्? "इरां लूतामवारुन्ध" (VII. 5. 9)। "अयुङ्गायुङ्गान्मुष्टीं लुनोतु" (ब्रा. III. 2. 2)। इत्यादौ सानुनासिकलकारः॥

—व—

(मू) दीर्घ प्रजावतीर्वश्च नक्षैकावं[2] ग्रहावहै।

प्रजावतीरिति दीर्घविसर्जनीयान्तश्चेद्वकारसहितो नित्यविसर्गश्चेत्। यथा—

---

१ 'अनयोः किम्?' ख. २ 'कावम' क.

" प्रजावतीरनमीवाः " (I. 1. 1) । " पिन्वमानाः प्रजावतीरिन्द्र " (VII. 4. 17) । " प्रजावतीः पुरुरूपाः " (ब्रा. II 8. 8) । " प्रजावतीः सूयवसम् " (ब्रा. II. 8. 8) । " प्रजावतीर्यशसो विश्वरूपाः[1] " (ब्रा. III. 7. 4.) । एषु विसर्गः दीर्घसहितः । 'प्रजावती'रित्यत्र वकारः । अत्र किम् ? " प्रजापतिर्मह्यम् " (VII. 4. 17) । " ब्रह्माग्निद्रप्रजापती " (ब्रा. II. 8. 7) । इत्यादौ पकारः । अत्रेन्द्रश्च प्रजापतिश्चेन्द्रप्रजापती इति द्वन्द्वसमासः । द्विवचने कृते दीर्घः प्राप्तः, तन्नित्यदीर्घः । नक्षत्र, एक, आवं, ग्रह, एतदादिपरम् वरं वृणावहै इति सवकारः । यथा— " ते अब्रूतां वरं वृणावहै । नक्षत्रविहिता " (II. 5. 2) । " ता अब्रूतां वरं वृणावहा एक एव" (VI. 4. 8) । " वृणावहा आवम् । ते " (II. 5. 2) । इति द्विः । " वरं वृणावहै ग्रह एव नौ " (VI. 4. 9) । अत्र किम् ? " ता अब्रुवन् । वरं वृणामहै समावच्छः " (II. 3. 5) । इत्यादौ मकारः । बहुवचनत्वात् ॥

(मू) त्रिसप्तग्राम्याः पशवो वरुध्यथैकात्रिवृत्परः ॥ ९४ ॥

यथा—" सप्तग्राम्याः पशवः सप्तारण्याः सप्तछन्दाँस्युभयस्यावरुध्यै " " वरुध्यसि " (VI. 1. 8) । " अवरुध्यै । अथैताः " (II. 4. 6) । " अवरुध्या एकादश प्रयाजान् " (V. 3. 7) । " अवरुध्यै त्रिवृत् " (VII. 2. 2) । एषु त्रयः सप्तशब्दाः । पशवः सवकारः[3] ।

---

१ 'रूपाः' नित्यदीर्घः किम् ? तस्मै नमः प्रजावतीरुद्रः " अत्रानित्यत्वादीर्घाः । अत्र ' ख. २ 'ति वकारसहितः । द्विवचनात् ते ' ख. ३ 'सपकारः ।

(मू) हव्यायविष्ट पशवो वरुध्यथैका त्रिवृत्परः ।

हव्यः परः यः परो वा हव्यम्पूर्वो वा यविष्ठ इति वकारान्वितः । यथा—" यविष्ठो हव्यवाहनः । चित्रभानुः । नानदद्भिर्यविष्ठः । यः पावकः । हव्यवाह यविष्ठ याते अद्य । " एवम्पर इति किम् ? " यजिष्ठः सप्रयजता " । वरुवी, अथा, एकत्रिवृत् एवम्परः पशव इति पकारवकारवान् । यथा—" सप्त ग्राम्याः पशवः । रुध्या एकादश प्रयाजान् रुध्यै । त्रिवृदग्निष्टोमो भवति " । एवम्पर इति किम् ? " सप्त ग्राम्या ओषधयः सप्तारण्याः । "रुध्या अन्नस्यान्नस्य"

(मू) वीरान्विततमापूर्वः शविष्ठेति वकारवान् ।

वरितमा शविष्ठेति वकारः परिकीर्त्तितः स्पष्टं व्याख्यानम् । उदाहरणं यथा—" वरितमा शविष्ठा विष्णू वरुणा " वरितमेति किम् ? " देवानां देवतमाशचिष्ठा " ॥ (मू) स्वे भवे ' ख,

(मू) स्वे भवेद्यतने धेये स्तोमे योनावृतौपरः।
स्वया देवतयेत्यत्र ह्यैकारान्तः प्रकीर्तितः[1] ॥ ९५ ॥

यतने, धेये, स्तोमे, योनौ, ऋतौ, एवंपरः स्वे इति सकारद्वित्ववकार ऐकारान्वितो भवेत्। यथा— " अग्निं गृह्णाति स्व एवायतने " (I. 6. 7)। " यजेति स्व एवैभ्यो भागधेये " (II. 2. 11)। " राजन्यः स्वएवैनं स्तोमे"। " स्व एवैनं योनौ प्रतिष्ठापयति " (ब्रा. I. 1. 11)। " स्व एवैन-मृतावाधाय " (ब्रा. I. 1. 2)। एवं देवतया परः 'स्वयै' इत्यैकारान्तः। यथा—" स्वयैवैनं देवतयाऽभिषिञ्चति " (ब्रा. I. 7. 8)। एवंपर इति किम्? " स एवैनममुष्मिँल्लोके कामः " (ब्रा. II. 2. 5) ॥

— ष —

(मू) कषचाषजषाशब्दाः चषाल[2]माषवाचकः।
षाट् चानव[3]र्णपूर्वः षण् नदकोर्ध्वो यथा मषम्[4] ॥ ९६ ॥

कष, चाष, जष, एते शब्दाः चषालः माषवाचकः, षाट् अनवर्णपूर्वश्च, एषु षकारः। यथा—" निकषमाणाय स्वाहा " (VII. 1. 19)। " चषालं ये " (IV. 6. 8)। " चा षस्तु " । " अपां नप्त्रे जषः " शब्दा इति किम्? " ओकासि स्वे " (ब्रा. II. 4. 6)। " नाम वचसा करामहे " (I. 7. 7)। " तेजसा सूर्यस्य "। " अमेध्या वै माषाः " (V. 1. 8.)। " कल्माषी भवति " (V. 1. 1)। इति च[5]शब्दात्। वाचक इति किम्? " द्वादश मासाः " (V. 6. 7)। " ऋताषाट् " (III. 4. 7)। " वषट्ते विष्णो " (II. 2. 12)। समानपदे अनवर्णपूर्वषकारा इमे। विशेषेण किम्? " आत्मसु " " भन्दनासु कोतनासु " (III. 3. 3)। इतः परं 'अन' वर्णपूर्वषकारोदाहरणानि। यथा—" आशिषम् " (ब्रा. III. 3. 10)। " कुषीतक आती वाहसः " (V. 5. 13)। " रेशीषु मेषीषु " (III. 3. 3)। " ऋतुष्वेव " (VI. 6. 3)। " चतृषु चतृषु मासेषु " (ब्रा. I. 5. 6)। " अग्ने संवेषिषो रयिम् " (II. 6. 11)।

---

१ 'त्र यकारः परिकीर्त्तितः' ग. २ 'चषालो मा' ख. 'षाल मा' ग. ३ 'वर्ण पू' ख. 'र्णपूर्वे षः' ग. ४ 'मषट्' ख. ग. ५ 'च शब्दग्रहणात्' ख.

" प्रोषिष्यते स्वाहा " (VII. 5. 11) । " गोष्वश्वेषु " (ब्रा. II. 4. 4) । " प्रार्थमौषसम् " (ब्रा. II. 1. 2) । इत्यादयः प्राकृताः षकारा विज्ञेयाः[1] । बर्हिषदे वट् । (IV. 6. 1) । पदि षिताम् (IV. 7. 15) । इत्यादि वैकृतषकारः । ' द ' ' क ' एवंपरे षकारो न स्यात् । यथा— " यत्कुसीदम् " (III. 3. 6) । " संकुसुकः " (आ. II. 4) । " नृषदं त्वा द्रुषदम् " (I. 7. 12) । " यानि दृषदः " (III. 2. 6) । इत्यादाववग्रहपूर्वादनित्यषकारैः[2] । " यथा वै मनुष्याः " (VII. 4. 2) । इत्यनुवाके " प्रत्यङ् षडहः " (VII. 4. 2) । यथाम इति किम् ? " प्रत्यङ् त्र्यहः " (VII. 3. 9) ॥

— स —

(मू) सख्या श्रेष्ठः पदे स स्यादिध्यसेऽत्रै[3] स उच्यते ।

सख्याः, श्रेष्ठः, पदे, एवंपूर्वः ' इध्यसे ' इति सकारान्तः । यथा— " सखा सख्या समिध्यसे " (I. 4. 46) । " ऋषिः श्रेष्ठः समिध्यसे " (ब्रा. III. 6. 7) । " इडस्पदे समिध्यसे " (II. 6. 11) । अत्र[4] किम् ? " अग्निनाऽग्निः समिध्यते कविः " (I. 4. 46) । इत्यादि तकारान्तः । अग्न इत्यकारान्तगृहीतत्वात् । " अग्नीध " (II. 6. 9) इत्यत्र यथा—" एवैनान्सकृत् सकृत् " (II. 6. 9) । " अग्ने तव +++ बर्हिषदे वट्, पदि षिताम्, इत्यादौ वैकृताः । अग्ने तवेत्यत्र यथा— " वैश्वानरस्य सूक्तं सूक्तेन " (V. 2. 6) । "त्वमग्ने बृहत्" इत्यत्र (III. 4. 11) । यथा—"सानसिम् । सत्यं चित्रश्रवस्तमम्" (III. 4. 11) । एते संयुक्ताः । अत्र किम् ? " एवैनान् त्रिस्त्रिः संमार्ष्टि । द्वादश संपद्यन्ते । द्वादश वैश्वानरस्य रूपं रूपेण । द्युम्नं चित्रश्रवस्तमम् " ॥

(मू) योऽसौ, चतुःससर्वेषां; यद्यश्वा[प] समर्धयत् ॥ ९७ ॥

" योऽसौ " (आ. I. 14) इत्यत्र यथा—"योऽसौ तपन्नुदेति । स सर्वेषां भूतानाम् " (आ. I. 14) ॥ इत्यनुवाके आदौ चतुः स सर्वेषां इति सकारो-

---

१ ' धिष्णिया वा एते इत्यत्र यथा—" सकृत् सकृत्संमृडीत्याह " । द, क ' ख. २ ' षकारः । पद्काले न स्यात् । तत्साहचर्यात् । यानि दृषद इत्यत्रापि सकार एव । यथा—मषट् । यथा वै ' ख. ३ ' सेऽग्न त्व धिष्णि च ' ख. ' पदे न स्यादिध्यसे यत्वमेव च ' ग. ४ ' एवम्पूर्व इति किम् ? ' ख.

ऽधिकः[1]। चतुरिति किम्? "अमूनि नक्षत्राणि सर्वेषां भूतानाम्" (आ. I. 14)। "यद्यश्वम्" (ब्रा. III. 9. 17) इत्यत्र "रेतसैवैनँ स समर्ध-यति" (ब्रा. III. 9. 17)। "अप + + श्रीः" (ब्रा. III. 9. 14) इत्यत्र "इष्टापूर्तेनैवैनँ स समर्धयति" (ब्रा. III. 9. 14)। इत्यनुवाकयोः[2] अधिकसकारः। अनयोः इति किम्? "यज्ञेनैवैनं समर्धयति। दर्भमयम्" (ब्रा. I. 3. 7)॥

— विसर्गः —

(मू) वीते[3] एव च ते[4]; ग्नीतौ अमीसामेव[5] सेत्यपि[6]।

वीपूर्वः ते एव, इति स्यात्। यथा—"द्यावापृथिवी एव स्वेन भागधेये-नोपधावति। ते एवैनं प्रतिष्ठां गमयतः" (II. 1. 4)। "अग्निं चैव विष्णुं च स्वेन भागधेयेनोपधावति। तावेवास्मै यज्ञं प्रयच्छतः" (II. 2. 9)। "इन्द्राग्नी एव स्वेन भागधेयेनोपधावति। तावेवास्मिन् ब्रह्मवर्चसं धत्तः" (II. 3. 3)। "आश्विनावेव स्वेन भागधेयेनोपधावति। तावेवास्मिन् पुष्टिं धत्तः" (II. 1. 9)। "इन्द्राग्नी एव स्वेन + + धावति। तावेवास्मै प्रजां प्रसाध-यतः" (II. 2. 1)। एष्वन्ते तः इति विसर्गान्तः। "स्वामेव देवतां स्वेन + + धावति। सैवैनं कामेन समर्धयति" (II. 3. 3)। "सरस्वतीमेव स्वेन + + धावति। सैवास्मिन् वाचं दधाति" (II. 1. 2)। अनयोः स्त्रीलिङ्गत्वात्। "वायुमेवस्वेन + + धावति'। स एवैनम्" (III. 4. 3)। 'प्रजापतिमेव स्वेन + + धावति। स एवास्मै प्रजां प्र' (II. 1. 1)। एवंपूर्व इति किम्? "मरुत एव स्वेन + + धावति। त एवास्मा अन्नं प्रयच्छन्ति" (II. 1. 6)। "विश्वानेव देवान्स्वेन + + धावति। त एवास्मै स जातान्प्रयच्छान्ति" (II. 3. 9)॥

(मू) सत्रं केनवैपर्यन्तं एकसंख्याद्ययात्रयुक्[7] ॥ ९८ ॥

सत्रमासत अस्मिन्ननुवाके + वैपर्यन्तं केनेति ककारः स्यात्। तदूर्ध्वं तेनेति तकारः। यथा— "यद्दशाहोतारः सत्रमासत" (ब्रा. II. 3. 5)।

---

१ 'धिकारः।' ख. २ 'योः स समर्धयतीति सकाराधिकारः' ख. ३ 'विते' ख. ग. ४ 'च वेग्नी' ख. ग. ५ 'आमींसा' ख. 'मीं स्वामे' ग. ६ 'सत्यपि।' ख. ग. ७ 'न्तं य एकसंख्ययामयुक्'। ख. 'न्तं य एकसङ्ख्ययास्ययुक्' ग.

" केन ते ग्रहपतिः + + । केन प्रजाः " (ब्रा. II. 3. 5) । अत्र ककारः । ' वैपर्यन्तम् ' इति किम्? " अर्यम्णावैते गृहपतिनाऽऽध्नुवन् । तेन सुवरायन् । तेनेमान् लोकान् " (ब्रा. II. 3. 5) । अत्र तकारः । " यः कामयेत वहोर्भूयान्स्यामिति । स दशहोतारं प्रयुञ्जीत " (ब्रा. II. 2. 11) । अत्रैकसंख्या विज्ञेया । ' यः पूर्वम् ' इति किम्? " सोऽकामयत । + + । दशहोतुश्च चतुर्होतारं निरमिमीत " (ब्रा. II. 2. 11) । इति संख्याद्वयादि विज्ञेयम् ॥

— उपाधत्त – उपादधत —

(मू) छन्दोः देवा सुरास्तेन पूर्वं वृष्टिसनीः[1] पशुः ।
यथाधत्त तृतीयान्ता[2] यथावै मान्त वान्त च ॥ ९९ ॥

" छन्दांस्युप " (V. 3. 8) । " देवासुराः संयत्ता आसन्तेन " (V. 4. 1) । " वृष्टिसनीरुप " (V. 3. 10) । " पशुर्वै " (V. 2. 10) । एष्वनुवाकेषु ' ता उपाधत्त ' इत्यत्र ' अधत्त ' इत्यक्षरत्रयम् ॥ यथा— " ता उपाधत्त । ताभिर्वै सयशः " (V. 3. 10) । " ता उपाधत्त । ततो वा इमाम् " (V. 2. 10) । " ता उपाधत्त ताभिर्वै सतनुवम् " (V. 4. 1) । ' पूर्वम् ' इति किम्? " ता उपादधत ताभिर्वै ते यज्ञम् " (V. 4. 1) । " ता उपाधत्त ता दिशः " (V. 7. 5) । तेषु ' अधत्त ' इत्यक्षरत्रयम्— " यथावै पुत्रः " (V. 7. 5) । इत्यत्र तृतीयान्ता इति । मकारान्तः अधत्त यथा— " तामुपाधत्त । तदीयमभवत् " (V. 7. 5) इत्यादि । अत्र किम्? " ता उपादधत । ताभिर्वै ते दिशः " (V. 3. 2) । इति ' अदधतता ' इति अक्षरचतुष्टयम् ॥

— नो भ्रातृव्यस्य वृङ्क्ते – आत्मन् —

(मू) यत्पत्न्यादीन्द्र[3] इष्टर्गो यजुषा छन्द इत्यपि ।
नो भ्रातृव्यस्य वृङ्क्ते स्यादात्मन् यज्ञस्य सं[4] पच ॥१००॥

---

१ ' सनिः प ' ख. २ ' तीये ताः यथा वैरुती येताः ' ॥ ख. ' यथाधत्त तृतीय्येत यथा वैत्र्यन्यधत्तताम् ' । ग. ३ ' दिन्द्रः ' ख. ग. ४ ' सम्पचेत् ' ख. ग.

यजुषा, छन्द, यज्ञस्य, संपशुः, एषु यजमानो भ्रातृव्यस्य वृङ्क्ते इति स्यात् । यत्पत्नी गृहमेधीयस्य इत्यत्र यथा— "यत्पत्नी" (ब्रा. I. 6. 7)। "इन्द्रः" (VI. 5. 1)। "इष्टर्गः" (III. 1. 7)। "अथो इन्द्रियमेव तद्वीर्यं यजमानो भ्रातृव्यस्य वृङ्क्ते । इन्द्रो वृत्रं हत्वा । पराम्" (ब्रा. I. 6. 7)। आदि इति किम्? "कर्मणा यजमानोऽवरुन्धे" (ब्रा. I. 6. 7)। इन्द्रो वृत्रायेत्यत्र यथा—"यजमानो भ्रातृव्यस्य वृङ्क्ते । इन्द्राय त्वा" (VI. 5. 1)। इष्टर्गो वा इत्यत्र यथा— "भ्रातृव्यस्य वृङ्क्ते । यस्य भूयाँसः (III. 1. 7)। यजुषा वा इत्यत्र यथा— "भ्रातृव्यस्य वृङ्क्ते । हिरण्यं मूर्ध्नि भवति" (V. 5. 3)। छन्दश्चितमित्यत्र यथा— "भ्रातृव्यस्य वृङ्क्ते । होतुः" (V. 4. 11)। एषु किम्? "यजमान आत्मन्धत्ते । पञ्च" (आ. II. 18)। इत्यादि । 'संपश्यामि' (I. 5. 8), 'यज्ञस्य शिरः' (VI. 4. 9)। अनयोः आत्मन्निति स्यात् । यथा— "पशूनेवात्मन्रमयत इह" (I. 5. 8)। "प्राणानेवात्मन् धित्वा पशून्" (VI 4. 9)। क्रमात् । अत्रे किम्? "पशूनेवास्मै रमयति देवस्य त्वा" (VI. 3. 6)। "प्राणानेवात्मन्धित्वा संयद्भिः" (V. 2. 10)॥

— आत्मन् —

(मू) देवासुराब्रुवन्नादौ तथा दधत कीर्तितम् ।

देवासुरा, अब्रुवन्, अस्मिन्नादौ, दधत इति स्यात् । यथा—"इन्द्रियमेव तेनात्मन्नदधत त्रयस्त्रिंशत्कपालम्" (II. 4. 2)। आदाविति किम्? "आत्मन्धत्ते" (II. 4. 2)। इति परपक्षः सर्वत्र । अत्र किम्? 'असावित्यात्मन्धत्ते आत्मन्नधत्त' (II. 1. 4)। इत्यक्षरत्रयम् ॥

— कुरुते —

(मू) सर्वा वयो वै ज्योतिष्मः कुरुते देवकद्रविण् ॥ १०१ ॥

सर्वाभ्यो वै देवताभ्यः (V. 3. 9) वयो वै, (V. 7. 9) अनयोः ज्योति-

---

१ 'अनयोः किम्?' ख. २ 'तः । सर्वादय विबैताभिः कुरुते देवकद्रविणा । तस्मात्स्पृहा' ग.

ष्मतः कुरुत इति स्यात्। यथा— " इमानेवैताभिर्लोकाञ्ज्योतिष्मतः कुरुते । " अथो प्राणानेवैताः (V. 3. 9) कुरुते । अथो य एताभिः " (V. 7. 6) देवासुराः कनीयांस इत्यत्र द्रविणावत इति स्यात्। यथा— " एवैताभिर्लोकान् द्रविणावतः कुरुते " (V. 3. 11) एषु किम्? " एवैताभिर्यजमान इमान् " ॥

— पतिः पशून् —

(मू) तेऽस्मात् सृष्टाश्च नर्क्षैनान् पशून्परः[1] पतिः पशून् ।

यथा— " प्रजापतिः पशूनसृजत । तेऽस्मात्सृष्टाः पराञ्च आयन् " (ब्रा. II. 7. 14) । ॥ " तानग्निष्टोमेन " (ब्रा. II. 7. 14) । " ते नक्षत्रन्नक्षत्रमुपातिष्ठन्त " (ब्रा. I. 5. 2) । ते सृष्टा अहोरात्रे प्राविशन् (I. 5. 1) तस्मादेवैनान्सृजते (II. 4. 12) । एवंपरः " प्रजापतिः पशून् " इति भवति ॥

(मू) यावैतन्मेदपूर्वेद्युर्यज्ञं च मनसातनु ॥ १०२ ॥

यावन्तः, एतत, मेदसा, पूर्वेद्युः, एष्वनुवाकेषु यज्ञमसृजतेति स्यात्। यावन्त इत्यत्र यथा—"प्रजापतिर्यज्ञमसृजत । सोऽस्मात्सृष्टः । पराङैत्" (VI.1.2) एतद्ब्राह्मणानीत्यत्र यथा— " प्रजापतिर्यज्ञमसृजत । तं सृष्टम् । स एताः " (V. 1. 10) । मेदसेत्यत्र यथा—" प्रजापतिर्यज्ञमसृजत । स आज्यम् " (VI. 3. 11) । पूर्वेद्युरित्यत्र यथा— " प्रजापतिर्यज्ञमसृजत । तस्योखे अस्रंसेताम् " (ब्रा. III. 2. 3) एषु किम्? " प्रजापतिः प्रजा असृजत " । 'मनसा' । एवंपरो यज्ञमतनुतेति स्यात् । " यो वै श्रद्धाम् " (I. 6. 8) इत्यत्र यथा– "प्रजापतिर्यज्ञमतनुत । मनसैव तत् " (I. 6. 8) ॥

— अग्निमसृजत —

(मू) तं सृप्र सोऽबिभेत्सोऽस्मात् सोऽश्वोऽग्निमसृजापि च ।

तंसृ, तंप्र, सोऽबिभेत्, सोऽस्मात्, सोऽश्वः, एवंपरोऽग्निमसृजतेति स्यात् । यथा— " प्रजापतिरग्निमसृजत । तं सृष्टं रक्षांसि (V. 1. 10) । तं प्रजा अन्वसृज्यन्त " (ब्रा. I. 1. 2) । " अग्निमसृजत । सोऽबिभेत् । प्र मा धक्ष्यतीति"

१ ' पशूनूर्ध्वः पतिः ग

(ब्रा. I. 1. 3, I. 1. 5) । अग्निमसृजत सोऽस्मात् " (V. 5. 8, V. 7. 10) । " अग्निमसृजत । सोऽश्वो वारः " (ब्रा. I. 1. 8)[1] ॥

— अचिनुत – अचिकीषत —

(मू) यशसर्तुक्षुरचिनुत[2] पृथिव्यग्न्यचिकीषत ॥ १०३ ॥

यशसा, ऋतु, क्षुर, एवंपरोऽग्निमाचिनुतेति स्यात् । यथा— " प्रजापतिरग्निमचिनुत । स यशसा " । " प्रजापतिरग्निमचिनुत स क्षुरपविः " (V. 6. 6) । " अग्निमचिनुतर्तुभिः " (V. 6. 10) । पृथिवीपरोऽग्निमचिकीषतेति स्यात् । यथा— " प्रजापतिरग्निमचिकीषत । तं पृथिवी " (V. 5. 2) ॥

(मू) अनुजावरं परं चेन्द्रं राजानं सोममेव च ।
सा सृष्टाश्वविराजं च सोऽग्निं च पुरुषं तथा ॥ १०४ ॥
स इन्द्रं तत्परो देवा सुरानिति च कीर्तितम् ।
सोऽस्मात्तं सृष्टमित्यस्मिन्नश्वमेधं परे तथा ॥ १०५ ॥
अग्निहोत्रं परे यज्ञान् देवान्ते पाप्मना परः ।

अनुजावरं परं चेदिन्द्रमसृजतेति स्यात् । यथा— " प्रजापतिरिन्द्रमसृजतानुजावरम् " । राजानमिति परे सोमं स्यात् । " प्रजापतिः सोमं राजानमसृजत " । सा सृष्टाश्वपरे विराजमिति स्यात् । " प्रजापतिर्विराजमसृजत ।

---

१ इतोऽनन्तरम्,

(मू) इमे वा एत उद्धन्ति द्वितीयं च न ह स्म वै ।
प्रजाग्निं तं प्रजाविष्णुमुखाग्निमसृजत्तथा ॥

इमेवा एते, उद्धन्ति, द्वितीयं च, नहस्मवै, प्रजाग्निं तं प्रजा, विष्णुमुखाः, अग्निमसृजत्तथा, एष्वनुवाकेषु अग्निमसृजतेति स्यात् । इमे वा एते लोका इत्यत्र यथा— " प्रजापतिरग्निमसृजत । सोऽश्वो वारो भूत्वा " । उद्धन्तीत्यत्र यथा— " प्रजापतिरग्निमसृजत । सोऽबिभेत्प्रभा धक्ष्यतीति " । द्वितीयमिति किम् ? " प्रजापतिः प्रजा असृजत । तासामन्नमुपाक्षयित" नहस्म वा इत्यत्र यथा— " अग्निमसृजत तं सृष्टं रक्षांसि " । प्रजाग्निं तं प्रजा इत्यत्र यथा- " प्रजापतिरग्निमसृजत तं प्रजा अन्वसृज्यन्त " । विष्णुमुखा इत्यत्र यथा— " अग्निमसृजत सोऽस्मात्सृष्टः " । एषु किम् ? प्रजापतिः प्रजा असृजत । तास्सृष्टाः इन्द्राग्नी " । इत्यधिकं ख. २ ' यशसाचिनुतर्तुक्षुरपृ ' ग.

सा सृष्टाश्वमेधं प्राविशत् "। सोऽग्निः परे पुरुषमिति स्यात्। "प्रजापतिः पुरुषमसृजत। सोऽग्निरब्रवीत् "। 'स इन्द्रं तत्' एवंपरो देवासुरानिति स्यात्। "प्रजापतिर्देवासुरानसृजत। स इन्द्रमपि नासृजत "। "प्रजापतिर्देवासुरानसृजत। तदनु यज्ञोऽसृज्यत "। सोऽस्मात्तं सृष्टमेवंपरोऽश्वमेधमिति स्यात्। "प्रजापतिरश्वमेधमसृजत। सोऽस्मात्सृष्टोऽपाक्रामत् "। "तं यज्ञक्रतुभिः। अश्वमेधमसृजत। तं सृष्टं किंचनोदयच्छत्। अश्वमेधमसृजत। तं सृष्टं रक्षांसि "। अग्निहोत्रंपरे यज्ञानिति स्यात्। "प्रजापतिर्यज्ञानसृजताग्निहोत्रं च "। ते पाप्मनापरो देवानिति स्यात्। "प्रजापतिर्देवानसृजत ते पाप्मना संदिता अजायन्त "। अत्र किम्? "प्रजापतिः प्रजा असृजत ता अस्मात् सृष्टाः " ॥

— प्राण व्यान - अपान —

(मू) विश्वकर्मात ऊर्ध्वं तु व्यानं मध्यं परोंऽशुना ॥ १०६ ॥

" विश्वकर्मा दिशाम् " (V. 5. 5)। इत्यारम्य व्यानं मध्यं स्यात्। यथा— " लोकेष्वधि प्रजायते। प्राणाय व्यानायापानाय वाचे त्वा चक्षुषे " (V. 5. 5)। " प्राणाय स्वाहा व्यानाय स्वाहापानाय स्वाहा " (आ. IV. 5)। " प्राणधृगसि। प्राणं मे दृँह। व्यानधृगसि व्यानं मे दृँहापानधृगस्यपानं मे (VII. 5. 19)। एषु व्यानशब्दमध्यम्। विश्वकर्मात ऊर्ध्वमिति किम्?। " प्राणायापानाय व्यानाय। तं जहि प्राणाय त्वापानाय त्वा व्यानाय त्वा अंशुना त इत्यत्र यथा—"प्रजाभ्यस्त्वा प्राणाय त्वा व्यानाय त्वा प्रजास्त्वः" ॥

(मू) न कस्त्वा वाक्यवद् ग्रन्थे न स्वाहो[१]वैकवाक्यके।

कस्त्वा युनक्तीत्यनुवाके व्यानं मध्यं न स्यात्। किं त्वपानमध्यमेव। यथा— " प्राणाय त्वाऽपानाय त्वा व्यानाय त्वा व्युष्ट्यै त्वा एवम् "। " श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि। श्रद्धायामपाने निविष्टोऽमृतं जुहोमि " (आ. V. 69)। इत्यादि अपानद्वितीयम्। स्वाहाकारे एकवाक्ये व्यानमध्यमे इति प्रतिप्रसवः। यथा— " प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा " (आ. IV. 5) ॥

---

१ 'क्यतः' ख. ग.

(मू) [१]प्रजा त्रिवृद् वसीयान् स्यात् पूर्वं तु स्वयमुत्तरा ॥ १०७॥

प्रजा, त्रिवृत्, वसीयान्, पूर्वं तु, स्वयम्, उत्तरा, एष्वनुवाकेषु वसीयानिति पूर्वं स्यात्। यथा—" प्रजापतिरकामयत प्रजायेयेति। स तपः + +। स त्रिवृतम् " (ब्रा. II. 2. 3)। इत्यनुवाके यथा– " यं कामयेत वसीयान्स्यादिति। तं पूर्वपक्षे याजयेत् " (ब्रा. II. 2. 3)। स्वयमातृण्णामुपदधातीत्यत्र यथा—" यं कामयेत वसीयान्स्यादित्युत्तरलक्ष्माणम् " (V. 2. 8)। उत्तरावतीमित्यत्र यथा— " यं कामयेत वसीयान्स्यादिति। कनीयांस्तस्य " (ब्रा. II. 1. 4) 'पूर्वपक्ष'मिति किम्? " यं कामयेत पापीयान्स्यादिति। तमपरपक्षे " (ब्रा. II. 2. 3)। " पापीयान्स्यादित्यधरलक्ष्माणम् " (V. 2. 8)। त्रयस्तस्य द्वितीयः पक्षः। अत्र किम्? " यो वा अयथादेवतं यज्ञम् " (III. 1. 6)। " सावित्राणि जुहोति " (V. 1. 1)। इत्यादौ पापीयान् पूर्वद्वयम्। उत्तरद्वयम् वसीयान् ॥

(मू) [२]प्रदशहोतारं तेन द्वादशासुरपूर्वकम्।

द्वादश, प्रदशहोतारं ते, अनयोरसुरशब्दः पूर्वः पूर्वः स्यात्। यथा— " प्रत्यङ्ङबाधत सोऽसुरानसृजत " (ब्रा. II. 2. 4)। " साऽशृणोत्। असुरा अग्निमादधत इति त आहवनीयम् " (ब्रा. I. 1. 4)। पूर्वमिति किम्? " स प्राङबाधत। स देवानसृजत " (ब्रा. II. 2. 4)। "पराभवति"। " साऽशृणोत्। देवा अग्निम् " (ब्रा. I. 1. 4)। अत्र किम्? " उत्तरावतीं देवा अजुहवुः। ततो देवा अभवन् " (ब्रा. II. 1. 4)॥

— अमु - इम —

(मू) [३]प्रान्याऽमुंपूर्वमम्भांसि सविता द्वयमध्यगम् ॥ १०८॥

प्रान्यान्यारभ्याम्भांसिपर्यन्तं पूर्वममुमिति स्यात्। परमिममिति स्यात्। प्रान्यानीत्यत्र यथा— " पराचीनानि प्रयुज्यन्तेऽमुमेव तैः (VI. 5. 11)। " भवत्यमुमेव तैर्लोकम् " इति भवति। " प्राङ् द्रवति सोमग्रहैः। अमुमेव तैर्लोकम् " (ब्रा. I. 3. 3)। अत्रापि " यानि दारुमयाणि पात्राणि भवन्ति।

---

१ ' प्रजा त्रिवृद्वसीयान्तं पूर्वं च स्वयमुत्तराम् ' ग. २ ' द्वादशप्रदशहोतारं तेनचासुर ' ख. ग. ३ ' ता मध्यगद्वयम् ' ख. ' प्रान्यामपूर्वमम्भांसि सविता मध्यमुद्वयम् ' ग.

अमुमेव तैर्लोकम् " (ब्रा. I. 4. 1) । " यानि देवराजानाँ सामानि । तैरमुष्मिंल्लोक ऋध्नोति " (ब्रा. I. 8. 8) । इत्यादि अमुशब्दपूर्वं 'अम्भांसि'-पर्यन्तं विज्ञेयम् । 'तत: परम्' इति किम्? " वात्सप्रेणोपतिष्ठत इममेव तेन " (V. 2. 1) । " सहस्रसंमितो वा अयं लोकः । इममेव " (V. 6. 8) । तत्पूर्वं किम्? " अयं वै लोकोऽम्भांसि । इमं तया लोकमभिजयति । सविता भूत्वा प्रथमेऽहन् प्रवृज्यते " अस्मिन् मध्यगद्वयम् । " तस्मादितः पराङमूँल्लोकांस्तपन्नेति । तस्मादमुतोऽर्वाङिमाँल्लोकांस्तपन्नेति । तस्मादमुतोऽर्वाङिमाँल्लोकांस्तपन्नेति " (आ. V. 12) । इति — अत्रापि द्वयमध्मगम् । अमुशब्दपूर्वं स्यात् । " तस्मादितः पराङमूँल्लोकांस्तपन् । यदुपरिष्टात्तस्मादमुतोऽर्वागिमान् " । मध्यगद्वयमिति किम्? " मित्रो भूत्वा त्रिवृत इमांल्लोकानेति । इमांल्लोकांस्तपन्नेति । य एवं वेद " ॥

(मू) अग्निद्वितीयतृतीये देवाश्चैवं परद्वयम् ।

अग्निहोत्रं जुहोति (I. 5. 9) अस्मिन् द्वितीयतृतीये, देवा वै यज्ञे (III. 3. 6) , अस्मिन्ननुवाके (द्विः, त्रिः, नव, दश एते) अमुशब्दाः । शेष इममिति शब्दः । यथा—" अमुं लोकमैत्, सोऽमुं लोकम् " (I. 5. 9) । द्वितीयतृतीय इति किम्? " आदित्यो वा अस्माल्लोकात् । पुनरिमं लोकमभ्यध्यायत् " इत्यादयः सर्वे इमशब्दाः । देवा वा इत्यत्र यथा—" तेन यं तृतीयममुमेव तेन । उत्तरेष्वहःस्वमुतोऽर्वाञ्चः । अमुतोऽर्वाञ्चो गृह्यन्ते । तस्मादमुतोऽर्वाञ्चः" । द्वित्रिनवदशा इति किम्? "यं प्रथमं गृह्णातीममेव । इमान् लोकान् । पुनरिमं लोकम् । इतः पराञ्चो गृह्यन्ते । तस्मादितः पराञ्चः । इमे लोका यत् । इमे लोकास्तस्मादयातयामेनालोकान् " ॥

(मू) यावती प्रथमे तुर्ये यदेकेनादिगत्रयम् ॥ १०९ ॥

यावती (V. 2. 3) त्यत्र ' यदमुष्या + + तदमुष्याम्—' इत्याद्यन्तयोः

---

१ 'तत्पर, ख. २ ' तीयदेवाद्वित्रिनवादश ' ख. ३ ' यदेकेनादित्रितुरीययावत्यादि चतुर्थयोः । ' ख. ' यावत्यादिचतुर्थे यदेकेनादिगत्रयम् ' ग.

यदेकेनेत्यत्र[1] " देवा अमुष्मिँल्लोक आर्ध्नुवन् + + । अमुष्मिल्लोके ऋध्नुयामिति + + । अमुष्मिंल्लोके ऋध्नोति[2] " (V. 5. 1) इति आदित्रयम् ॥

(मू) भूमिरादिद्वयं चास्मिंश्चामुष्मिँश्चेति सर्वतः ।

भूमि भूम्नेत्याहेत्यस्मिन्ननुवाके आदावमुशब्दद्वयं स्यात् । यथा—" अमुष्मिँल्लोकमायन् " । " तेऽमुष्मिँल्लोके " (I. 5. 4) । सर्वत्रापि । आदिद्वयमिति किम् ? " अस्मिंश्चामुष्मिंश्च " इत्यन्ते ॥

(मू) अन्त्यं तु ज्योतिरापो वा इमे वा एत एव च ॥ ११० ॥
प्रजापती रक्षांस्येव प्रजापतिर्नवैषु च ।

ज्योतिः, आपो वै, इमे वा एते, प्रजापती रक्षांसि, प्रजापतिर्नव, एषु पञ्चस्वनुवाकेषु अन्त एव अमुशब्दः । स्पष्टोऽर्थः ॥

(मू) आदौ नयति वित्तान्ववाणुशःशोयुनक्त्यमन् ॥ १११ ॥
दर्भास्यास्माद्विशानीममब्राह्मण इति त्वतः ।

नयति, वित्ता, अन्वव, अणुशः श, युनक्ति, अमन्, दर्भ, अस्य, अस्मात्, विशानि, इमम्, एते शब्दाः आदावेव भवन्ति । यथा— " अम्बे अम्बाल्यम्बिके न मा नयति + + । + + अश्वकः " (VII. 4. 19) । " सुभगे काम्पीलवासिनि " (VII. 4. 19) । " इत्याह " (ब्रा. III. 9. 6) वित्ता ह्येनान् " (VI. 2. 7) । " रसेनानक्ति । आन्तमन्ववस्रावयति " (VI. 2. 10) । " अणुशश्च महशश्च । सर्वे " (आ. I. 2) । " कस्त्वा

---

१ ' यदेकेन संस्थापयति । अस्मिन्नादित्रिः तुरीयः । यावती वै पृथिवी अस्मिन्ननुवाके आदिचतुर्थयोः एते अमुशब्दाः । यथा—' ख. २ ' ध्नोति ' । आदित्रितुरीया इति किम् ? " चरुणास्मिन् यः कामयेत । कामयेतास्मिंल्लोक ऋध्नुयामिति । कार्योऽस्मिन्नेव " । यावतीत्यत्र यथा—" यदमुष्या यज्ञियमासीत् । तदमुष्यामदधात् " । आदिचतुर्थयोरिति किम् ? " तदस्यामदधात् । यदस्या यज्ञियमासीत् " । ' ख. ३ " ज्योतिष्टोमं प्रथममित्यत्र यथा–" आयुष्टोमं तृतीयमुपयन्त्यमुष्मिन् " । आपो वा इदमित्यत्र यथा—" तेऽमुंल्लोकमजन् तच्चाददुः " । इमे वा एते इत्यत्र यथा—" बार्हतो वा असौ लोकः । अमुष्मिन्नेवैनं लोके । प्रजापतिरश्वमेधमसृजत " । तं सृष्टं रक्षांस्यसिघांसन्नित्यत्र यथा— " दाभ्यां स्वाहेत्याह । अमुष्मिन्नेव लोके प्रतितिष्ठति " प्रजापतिः प्रजा असृजत । ताः सृष्टाः क्षुधन्यायन् " स एतं नवरात्रमित्यत्र यथा—" त्रिरात्रेणामुं लोकम् " । ख.

युनक्ति स त्वा" (I. 5. 3)। इति[1] इकारान्तः। "ता अस्मात्सृष्टा अपाक्रामन्" (ब्रा. II. 2. 1)। "तं मनसाऽनुद्रुत्य दर्भस्तम्बे जुहुयात्। ततो वै सप्रजाः + +। ता अस्मादपाक्रामन्" (ब्रा. II. 2. 1)। "तानि ग्रहेण (ब्रा. II. 2. 2)। यां कामयेत (ब्रा. I. 5. 1)। तेनापशीर्ष्णा यज्ञेन यजमानाः। + +। न सुवर्गम्" (आ. V. 1)। अपरिगृहीत एवास्य विषूचीनं रेतः" (V. 2. 6)। "प्रविशानीति यन्मां प्राविशेः"। "त इमं यज्ञमवन्तु[2]" (II. 4 8)। अब्राह्मणवाक्ये यदि पूर्वपक्षे एवेति शब्दः। यथा— "ब्रह्म चान्नं चेति। त एता विंशतिं रात्रीः" (VII. 3. 9)। "चन्द्रमसः सायुज्यं सलोकतामाप्नुयामिति" (ब्रा. III. 1. 6) अत्र किम्? "दिव इति इमानेव लोकान्" (I, 7. 6)। "बर्हिषदं करोतीति। चतुर्धा करोति" (ब्रा. III. 3. 8)। पूर्वपक्षे अत इति अकारसहितः[3]। "यं कामयेत पशुः स्यादिति" (ब्रा. III. 2. 1)। इत्यादिः अपशुः स्यादित्यपर्णाम् (ब्रा. III. 2. 1)॥

— द्वितीयपक्षे–शब्दाः —

(मू) द्विरुद्वयस्यपस्याश्च सदृशत्रयमध्यगः॥ ११२॥

"उत्सन्नयज्ञ" (V. 3. 1) इत्यत्र[4] द्विवारम् "वयस्या अपस्याश्च" द्विवारं इति तु शब्दार्थः। सदृशत्रयमध्ये अकारवान्। यथा—"दैवीं संसदमगच्छन्" (VII. 4. 2) "स मित्रधेयमेषु लोकेष्वभ्यजयत्" इत्यादि विज्ञेयम्॥

(मू) [5]द्वितीय ससृवांसोऽवधत्तामुत्तमं जुहुयात्।
वेत्वाहाऽहंत्रिस्ते नन्दा आह्वयता च दिश्यवि॥ ११३॥

---

१ 'इकारान्तोऽयम्' ख. २ 'वन्तु"। "तेनापशीर्ष्णा यज्ञेन यजमानाः। नाशिषो वाऽरुन्धत। न सुवर्गं लोकमभ्यजयम्"। अयं पूर्वपक्षः। अथोत्तरपक्षः–"न मा यन्नति कश्चन। इयं यका" इत्यादि "माता च ते" इत्यन्नं तिक्तान् ह्येनावत्। यजमानमेव तेजसानक्त्यान्तमेव यजमानं तेजसानक्ति। अणुभिश्च महद्भिश्च। सत्वा युनक्तु विष्णुस्त्वा युनक्तु। दर्भस्तम्बे जुहुयात्। परिगृहीत एवास्मै समीचीनं रेतः सिञ्चति। त इदं क्षेत्रमाविशन्तु"।' इत्यधिकम् ख. ३ 'त इति शब्दः स्यात्। यथा–' ख. ४ 'इत्यनुवाके आद्यन्तयोः वयस्या इत्यस्याकाराभाव इति शब्दार्थः। शेषः पूर्वपक्षे अकाराभावात्' ख. ५ '... ... ... त्रयमध्ये अकारवान्। द्वितीये वर्षकोधत्तां ससृवांसो तमं हयात्। वैत्याहा हन्ति ते नन्दाः ह्वयतामविशत्यपि। उत्तम' ग.

द्वितीये पक्षे इमे शब्दाः । यथा—"वाजँ ससृवाँ सो-वाजं जिगिवाँ सः" (I. 7. 8) । "वाजं त्वा ससृवाँसम्' । वाजं जिगिवाँसम्" (ब्रा. III. 7.6) सोम गायत्रेण छन्दसाऽग्नेः । प्रियं पाथो अपीहि ॥ त्रिः (III. 3. 3) । "तावेतद्यज्ञस्य शिरः प्रत्यधत्तां यत्" (आ. V. I) । आदिरकाराभावार्थः । "अगन्म ज्योतिरुत्तमम्' । ऊर्ध्वाः" (IV. 1. 7) । "षड्ढोतारं मनसाऽनुद्रुत्याहवनीये जुहुयात्" (ब्रा. II. 2. 2) । "तनूनपादग्न आज्यस्य वेतु" (ब्रा. III. 5. 5) । अवरैः परैश्चेत्याह + + अन्वाभजत्यन्तर्यामे" (VI. 4. 6) । "अथर्व पितुं मे गोपायेत्याह" (ब्रा. I. 1. 10) । "आदि पञ्च । 'प्राणानामहमित्यग्निः' । त्रिः (ब्रा. II. 1. 6) । "तैनैवैनद्विन्दति सावित्रः" (II. 3. 2) । "अस्यां वैनां भूतां प्रतिगृह्णाति । न सहस्रम् । य एवम्" (VII. 1. 7) । "अश्वमेधँ संस्थापयति । यदश्वचरितानि जुहोति" (ब्रा. III. 8. 8) । "एवैनं वसुभिः पुरस्ताद्रोचयतु गायत्रेण च्छन्दसा" । समा । (आ. V. 5) । "वाचस्पतिः सोमं पिबति जजनत्" (आ. III. 2) । "ते ये शतं देवानामानन्दाः" (आ. VIII. 2) । "उपमा रथन्तरं सह पृथिव्याह्वयताम्" (ब्रा. III. 5. 8) । "दक्षिणापरस्यां दिश्यविसर्पी नरकः" (आ. I. 19) । "उत्तरापरस्यां दिश्यविषादी नरकः" (आ. I. 19) ॥

(मू) उत्तमए इकारान्ता रेफाश्च वर्णतः क्रमात् ।

अमी[1] एकारान्तपदादयः अपरपक्षे ज्ञातव्याः । यथा—"समारम्भयते भूत्यै सा" (II. 4. 2) । "तैर्यजते तेज एव प्रथमेनावरुन्धे" (VII. 1. 8) । "यामेव प्रथमेनावरुन्धते । प्रजां विन्दन्ते" (II. 5. 1) । "लोकयोर्ऋध्नुवन्ति । अस्मिंश्चामुष्मिंश्च । चतुर्दशरात्रैः" (VII. 3. 4) । "नैनं पापी कीर्तिरागच्छति" (ब्रा. III. 1. 5) । "पणेत" (VI. 1. 10) । "तस्य ते पृथिवी महीमौषधयः रूपमग्निः" (VII. 5. 17) । "दिवे त्वाऽन्तरिक्षाय त्वा" (I. 1. 11, III. 5. 8) । "त्वा शुन्धतां" (I. 3. 6) । "द्वारः । अपाघा

---

[1] 'एकारान्तशब्दः एकारान्तपदं इकारान्तशब्दश्चेति इकारान्तपदं च उत्तमे अपरपक्षे भवति । यथा = ' ख. २ 'त्रः" । आ । तो भवन्ति । अञ्जतेऽभ्यञ्जते । घृणीवान् चेततिमना । अयमग्निः । " इत्यादि । अपि च रेफाश्च शब्दाः इति सरेफशब्दाः णन्त्यपक्षे ' ख.

अनुवित्तयो नाम । तपः " (ब्रा. III. 12. 4) । "अस्युन्मुक्तो वरुणस्य पाशः " (I. 2. 9) । " अग्नेः " (I. 2. 10) । " घृतमुच्चरण्येत् । प्र णो देवी " (I. 8. 22) । " घृणीवाञ्चेतति त्मना । अयम् " (III. 5. 11) । " गार्ह-पत्य उन्नोनेषत् " (आ. II. 6) । " भूः सुदुःस्त्यानो घृतश्च्युतः । येन " " सप्त + + + । ते अस्मै सर्वे घृतमातपन्ति " (आ. I. 7) । " वर्षन् भूतरावृत्स्वाहा । मान्दा वाशाः " (II. 4. 7) । " विश्वा भूतानि प्रतिमोदमानः । तस्य " (ब्रा.III. 1. 2) । " अस्य कृतं भवति ब्रह्मवादिनः " (IV. 4. 9) । " सदःकृतम् । मा " (ब्रा. II. 6. 1) । " उपयामगृहीतः " " त्वँ सरस्वती " (आ. II. 3) । " कृतान्नः पाह्येनसो यत्किंचानृतमूदिम " (आ. II. 3) । " यज्ञमेव तन्म्रदयति सुपारा " (VI. 1. 4) । " रेफाच्च" इति शब्दात्तान्यन्त्यपक्षे पदानि जानीयात् । रेफान्वितानि इत्यर्थः । यथा— " लोकान्यथापूर्वमभि जयति " (IV. 2. 1) । " इत्याह । परोक्षमेवैन-ज्जुहोति " (II. 6. 8) । " आजुह्वानस्य सर्पिषः " (IV. 4. 4) । " परा वा एष प्रजां पशून्वपति " (V. 2. 2) । आलभते वार्त्रघ्न एवास्य " (VI. 1 11) । " उत्तरोऽन्तर्वृत्तान्करोति " (VI. 2. 10) । " प्रत्यङ् होतारमति-सर्पेत् " (VI. 3. 1) । " ते संवत्सरेण योपयित्वा " (VI. 5. 3) । " सहस्रमस्य प्रतिगृहीतं भवति " (VII. 1. 6) । " मनुष्यलोकं प्रत्यवरोहन्तो यन्ति जगतीम् " (VII. 5. 4) । " एषा वै प्रथमा रात्रिः" । " यदुत्तरे (ब्रा. I. 1. 2.) । ते संवत्सरे व्यायच्छन्त " (ब्रा. I. 5. 6) । " ततस्ते पराभवन् । यस्यैवं " (ब्रा. II. 1. 4) । " आश्विनं दुह्यमानम् मैत्रं दुग्धम् । अर्यम्णः " (ब्रा. II. 1. 8) । " यदत्र रिप्तं रसिनः " (ब्रा. II. 6. 3) । " भुवनं च सर्वे तत्सत्यमर्चद्रुप " (ब्रा. III. 12. 3) । " तदवरुन्धे " " तस्यैतद्व्रतम् " (I. 26) । "दधद्रयिं मयि पोषम् " (आ. II. 5) । अत्रादौ रयिमिति किम् ? । " अहेडन्त्छर्म ते स्याम " (आ. II. 5) । " नारा-शंसीः प्रीणाति । दर्भाणां महत् " (आ. II. 11) । " एतस्मिन्नुदरमन्तरम् " (आ. VIII. 2) । " अपीपरो मा रात्र्या अह्नो मा पाहि " (आ.IV. 10) । " यद्रात्रिया पापम् " (आ. X. 25) । किंच वर्णानां क्रमादिति वर्णतः क्रमाद्विति अयं पूर्वोद्भवः, अयमुत्तरोद्भवश्च वर्ण इति ज्ञातव्यः ॥

उत्तमवर्णपदानि

इहोत्तमपक्षे उत्तमवर्णान्वितपदान्युदाहरिष्यामः इति यावत् । यथा— वाजिनं त्वा सपत्नसाहम्" (I. 1. 10) । "देवेभ्यः शुम्भस्वेन्द्रघोषः" (I. 2. 12) । "अकर्देवहूतिं नो अद्य । अक्रन्दत्" (I. 3. 14) । इति "तेषामेता व्याहृतीः" (I. 6. 10) । "प्रियं वां पीथो घृतस्य गुह्या" (I. 8. 22) । "वीरुधो भुवन्निति स प्रजापतिः" (II. 5. 3) । "किंदेवत्यं सांनाय्यमिति" (II. 5. 3) । "आसीद्दैव्यो सुराणां तौ प्रजापतिम्" (II. 5. 11) । "अङ्गिरस्वदाभिरासि" (IV. 1. 1) । "बाहू उपस्तुत्यं महि" (IV. 6. 7) । "वयसा बृहन्तम् । तेन वयम्" (IV. 7. 13) । "वा एतद्यज्ञं सचन्ते यदनः" (V. 2. 2) । "पृथिवीमनु" (V. 5. 7) । "तेषां त्वमस्युत्तमः" (V. 5. 7) । अपां त्वाऽग्ने" (V. 5. 7) । "ब्रह्म सवश्विन्यः" (V. 6. 3) । "अचिनुत क्षत्रेण दक्षिणं पक्षं पशुभिः"(V. 6. 10) । "पार्श्वं यम्यै पाटूरः । पन्थां" (V. 7. 23) । उद्पतत् त्रयोदशाक्षरा" (VI. 1. 6) । "पुनराददीत । तेजः" (VI. 1. 11) । "अतिष्ठमानाः पञ्चधा व्यक्रामन्" (VI. 2. 2) । "नक्तं ददृश्रे छायायै" (VI. 4. 2) । "वेदेनाभिवासयति । तस्मात्" (II. 6. 3) "पयसा श्रीणाति । पशुभिः" (VI. 4. 8) । "ओषधयः पुनराभवन्ति" (VI. 2. 4) । "तान्यनुश्राम्याः" (VI 5. 11) मिनुयात् । सुवर्गकामस्य" (VI. 6. 4) । "स्कन्धेभ्यः स्वाहा" (VII. 3. 16) । "पञ्चाहा भवन्ति । पञ्च वै" (VII. 4. 5) । "त्रीण्याश्विनानि" (VII. 4. 5) । "षष्टिश्च स्तौत्रियास्तावतीः" । (VII. 5. 1)) "यदुत्तरे फल्गुनी । मुखत एव । + वसीयान्" (ब्रा. I. 1. 2) । "पृथिव्याः संविदाने । रोदसी तयोः" (ब्रा.I. 2. 1) । "उत्सृजति" । "चतुरः प्रयाजान्" (VI. 6. 3) । "प्रजात्यै । यदुदिते" । यथा—(ब्रा. II. 1. 2) । "स्यादिति । भूयस्तस्य + + + उत्तरं कनीयः" (ब्रा. II. 1. 4) । "अग्निहोत्र एव तत् सायं प्रातर्वज्रं यजमानः" (ब्रा. II. 1. 5) । "एतस्मिन्वा एष श्रितः" (ब्रा. II 2. 3.) सशीर्षा विपाप्माऽमुष्मिँल्लोके भवति । देवता" (ब्रा. II. 3. 4) । इह मह्यं नियच्छतम्" (ब्रा. II. 4. 4) । "वर्ष्मन् क्षत्रस्य ककुभि श्रयस्व । ततः" (ब्रा.II. 4. 7) । "यथारूपाणि बहुधा वदन्ति पेशांसि देवाः" (ब्रा. II. 5. 1) ।

" याम्यामिदं विश्वमेजत् " (ब्रा. II. 6. 3)। " पौँस्येनेमं स ँसृजाथो वीर्येण" (ब्रा. II. 7. 17)। " इन्द्रं वै " (ब्रा. II. 7. 18)। वृषण ँरयिं दाः " (ब्रा. II 5. 6)। " य इमे "। " आ नो मित्रावरुणा हव्यदातिम्। धृतैः " (ब्रा. II. 8. 6)। " श्रद्धया हूयते हविः। + + । श्रद्धां प्रातर्हवामहे " (ब्रा. II. 8. 8)। " मनसा विब्रवीमि वः " (ब्रा. II. 8. 9)। " मघासु यज्ञँ सुकृतम्। गवाम्। " (ब्रा. III. 1. 1)। " यासामषाढा मधु। + +। ताः तन्नः " (ब्रा. III. 1. 2)। " ता न आपः " (ब्रा. III. 1. 2)॥ "हविरधिपिनष्टि। यज्ञात्। + + द्यावापृथिवी " (ब्रा. III. 2. 6)। "स्यादिति मूलतः संमृज्यात् वृष्टिमेवोत् " (VI. 4. 5)। " ये यज्ञपतिं वर्धान् " (ब्रा. III. 5. 8)। "विश्वमस्याः प्रियमुपहूतम्" (ब्रा. III. 5. 13)। "अग्रभीष्टाम्। अत्रीवृधेतां पुरोडाशेन " (ब्रा. III. 6. 15। " नक्षीकाः + + आजायन्ते " (ब्रा. III. 9. 1)। " साक्षादेव प्रजां पशून्। प्रजापतिः " (ब्रा. III. 9. 2)। " महिमानौ गृह्णीत " (ब्रा. III. 9. 10)। " जुम्बकाय स्वाहेत्यवभृथ उत्तमाहुतिं जुहोति " (ब्रा. III. 9. 15)। " उत्तरवेदिं चिनोति " (ब्रा. III. 9. 21)। " आसादयन्निषादयन् " (ब्रा. III. 10. 1)। " वृष्टिरासि वृश्च मे। + + यक्ष्यमाणः " (ब्रा. III 10. 9)। " विजहान्विश्वा भूतानि संपश्यन् + + । य एवं वेद " (ब्रा. III. 10. 9)। " शेवधिं न धयन्ति। अधीतं " (ब्रा. III. 10. 11)। " हृदयं यजूँषि पत्न्यश्च " (ब्रा. III. 12. 5)। " स सत्यमग्निं चिनुते। तदेतत् " (ब्रा. III. 12. 5)। " प्रयुज्यन्ते। शरद्यत्रोपदृश्यते। अभि " (आ. I. 4)। " तस्मादिहातास्त्रितपाः। तेषाम् " (आ. I. 7)। " मा मा केचित्। + + । निधन्वेवताँ३ इमि " (आ. I. 12)। " सूर्ये शुक्रं समाभृतम् " (आ. I. 22)। " एतस्याग्नेरनभ्यारोहाय " + + " न कूर्मे " (आ. I. 26)। " अङ्गारेषु च ये हुताः। उभयान् " (आ. I. 27)। " अथ तमग्निमिन्धीत। यस्मिन्। तिरोधा भूः स्वाहा " (आ. I. 31)। " अनाधृष्टं देवकृतम् " (आ. II. 3)। " पुनस्ते प्राण आयति " (I. 3. 14)। " क्षत्रं मे जिष्णु यस्याहमस्मि " (आ. II. 5)। " वाचस्पते हृद्विधे नामन् " (आ. III. 5)। " देवि दक्षिणे वैश्वानराय रथम् " (आ. III. 10)। " इन्द्रस्यात्मानं शतधा+

इन्द्रः " (आ. III. 11) । " राजा । रुचितोऽहं मनुष्येषु + + । भूयासम् + + । रुगसि " । (आ. IV. 6 । " प्राणस्य त्वा परस्पायै चक्षुषः " (आ. IV. 11) । " जागतमसि । शफोपयमान् " (आ. V. 7) । " छन्दोभिरेवैनानादत्ते सावित्राम् " । " अपीहि । यमेन " (आ. VI. 3) । " मा त्वा वृक्षौ संबाधेथाम् । + + + । पृथिवीमही " (आ. VI. 7) । " यथा तेषु " । " तथा तेषु तत्र वर्तेथाः " (आ. VII. 11) । एषः । सलोकतामाप्नोत्येतौ वै " (आ.X. 80) ॥

(मू) व्युत्क्रमावस्तत्रान्या यत्सुभगा ददतु प्रियम् ॥ ११४ ॥
घृतभूतकृतावोच्च पृथिवीत्वारदब्रुवन् ।
रात्र्यस्यत्यत्यहश्चन्द्र वा योनिर्नवैष्यथः ॥ ११५ ॥
एतेनोक्तं न्यदाग्नेयः पशवोनो विचारथ ।
प्राणममृत आदित्यः सतनूपसृपानुवि ॥ ११६ ॥
तस्मा एत मवाचस्त्वा सजाता ह्वयाय चातिथिः ।
जुषन्तां पुष्कलेभिश्च स्नातां जीवांश्च तेजसा ॥ ११७ ॥
तेदक्षन्तपुरोडाशं दिशोऽस्माकं च दुष्करम् ।
विष्णोष्टभ्नाच्च दाधर्थ निर्घ्नन्ति यामि चेमि चेत् ॥११८॥
मये हनिधिना चोग्रमन्यास्तिग्मं च मष्मषा ।
पिप्रतोथो अधियीत परिदत्तादमं फला ॥ ११९ ॥
द्विविषाद्यपिधानं च रोहोर्ध्वौ, यजमान अत् ।

व्युत्क्रमो वैपरीत्यम्; पूर्ववर्ण एव उत्तरपदं तिष्ठतीत्ययमारम्भः । यथा— " अस्युन्मुक्तो वरुणस्य " (I. 2. 9) । " अग्नेः " (I. 2. 10) । " घृतमुच्चरण्येत् । प्रणः " (I. 8. 22) । " गार्हपत्य उन्नोनेषत् । + + भूमिः " (आ. II. 6) । "इममेवाग्निँस्तवानि" (I. 5. 9)। "एताभिरेवासादयेत् । यद्वै" (I. 6. 10)। "सवित्र आ सवित्रे द्वादशकपालमपराह्णे" (ब्रा. III. 8. 12) । " तस्य ते ददतु येषाम् । वर्षन् भूतरावृस्त्वाहा " (II. 4. 7) । " विश्वा भूतानि प्रतिमोदमानः " (ब्रा. III. 1. 2) । " सर्वा इद्दिशोऽस्माकम् " (III. 2. 8) । " पाहि धूरसि " (III. 2. 10)। " आपो अपान्नपात् (VI. 4. 3) । " अपां-

नपाः अपान्नपात् " । " सुभगा रराणा । सान आगन्वर्चसा " (III. 5. 1) । " विडश्वत्थो यत्पर्णमयी जुहूः " (III. 5. 7) । " यत्पर्णमयः संभारः । ब्रह्मवर्चसं " (ब्रा. I. 1. 3) । " पुष्टमसि । योनि रग्नेः " (IV. 2. 8) । " ब्रह्म । इत्यधरलक्ष्माणं तस्य असुरः " × × (V. 2. 8) । " कल्माषः । आग्नेयः कृष्णः " (V. 5. 24) । " केन न उपैष्यथेति " (V. 7. 5) । " एष रात्रिया यत्कृष्णम् " । " कृष्णविषाणां प्रास्यति । योनिर्वै " (VI. 1. 3) । " तादृगेव तद्यन्न विचिनुयात् " (VI. 1. 9) । " स तस्माद्ग्राश्यं वारुण्या " (VI. 1. 11) । " गृह्णाति पशवो वै वसतीवरीः " (VI. 4. 2) । " अपोऽह्नः प्रविशति । तस्माचन्द्राः " (VI. 4. 2) । "अस्य कृतं भवति । ब्रह्म" (VI. 4. 9) । "सदःकृतं" । (ब्रा. II. 6. 1) । "शुप । त्वँ सरस्वति" । "कृतान्नः पाह्येनसः । यत्किं च" (आ. II. 3) । " यज्ञस्य सतनुत्वाय देवता वै " । " महिमौषधयः रूपमग्निः " (VII. 5. 17) । " पथो वा एतेऽध्यपथेन यन्ति । येऽन्येनैन्द्रावायवात् " (VII. 2. 8) । "विचहैवास्यैते" (ब्रा. III. 10. 9) । " अब्रुवन्नरात्स्मोत्तिष्ठामाव तम् " (VII. 5. 2) । " अन्यदन्यत्साम भवति " । " देवलोको वै " (VII. 5. 4) । " दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वा स्वधा " (I. 1. 11) । अनुवाकादि " तस्य मे देवस्य " अत्र च प्रकृतमिति शब्दार्थः । " पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा " (I. 3. 6) । " प्राणं त्वाऽमृत आदधामि " (ब्रा. I. 2. 1) । " अवाचोवपादात् । + + + । तं पञ्चाभिः " (ब्रा. I. 2. 4) । " एषा वा अवाच्याहुतिः । तामसुराः " (ब्रा. II. 1. 4) । " यस्याग्निहोत्र्युपसृष्टा तां दुग्ध्वा " (ब्रा. I. 4. 3) । " घृतश्चुतः " (ब्रा. I. 4. 8) । "एनः" सर्वे घृतमातपन्ति " (आ. I. 7) । " सप्त तान्येकादश × × × आदित्यो द्वादशः " (ब्रा. I. 5. 3) । " अनुलोममविग्राहम् । प्राणानेवास्मै " (ब्रा. II. 3. 2) । " यत्किंच । राजसुयमनुत्तरवेदीकम् " (ब्रा. II. 7. 5) । " ये के सप्तहोत्रा अनुविद्वान् " (ब्रा. III. 11. 5)। " प्राची दिक् " (IV. 3. 6) । " तस्मा एतँस्थागरमलंकारं कल्पयित्वा " (ब्रा. II. 3. 10) । " पृतना साह्याय च + + + । इन्द्रत्वा " (ब्रा. II. 5. 6) । " ज्योतिषा त्वा । वैश्वानरेण । + + + । अयं ते " (ब्रा. II. 5. 8) । " ये

सजाताः समनसः जीवाः " (ब्रा. II. 6. 3) । " हविरिदं जुषन्ताम् " (IV. 1. 8) । " यदग्ने विश्वेषामतिथिर्मानुषाणाम् " (ब्रा. II. 7. 12) । " येभिर्वाचं पुष्कलेभिरव्ययत् " (ब्रा. II. 7. 15) । " रायस्पोषं विष्यतु " (IV. 1. 8) । " प्रियं भोजेषु यज्वसु । अस्माकम् " (ब्रा. II. 8. 8) । " प्रियं देवानामप्येतु पाथः " (ब्रा. III. 1. 1) " तन्नो विश्वे अभि । + + । तन्नो नक्षत्रम् " (ब्रा. III. 1. 2) । तिग्मेन नस्तेजसा सँशिशाधि " (ब्रा. III. 5. 12) । " उपहूतम् " (ब्रा. III. 5. 13) । " पचन्पुरोडाशम् । बध्नान्निन्द्राग्निभ्याम् " (ब्रा. III. 6. 15) । " पुनरप्येति देवान् " । " दिवः " (III. 1. 10) । " पुनरप्येति जीवान् । त्रिवृत् " (ब्रा. III. 7. 10) । " अपाघा अनुवित्तयो नाम तपः " (ब्रा. III. 12. 4) । " ते दक्षन्त । दक्षिणां प्रतिगृह्य " (ब्रा. III. 11. 8) । " तनूषु पिप्रतः । प्रजा देवेभ्यः " (ब्रा. III. 7. 14) । " व्यष्टभ्नाद्रोदसी विष्णवे ते । दाधर्थ " (आ. I.8) । " पापान्निर्घ्नन्ति + + + । रोदस्योः " (आ. I. 8) । " यामि मयूररोमभिः । मा मा । ० × । निधन्वेवतां३ इमि । अणुभिश्च " (आ. I. 12) । " दिशि विषादी " । " दिश्यविषादी " (आ. I. 19) । " अरण्येऽधीयीत । (आ. I. 32) । " ऋतस्यर्तेन मामित " (आ. II. 3) । " अप्रतींत्तं मयि येन यमस्य निधिना चरामि " (आ. II. 3) । " उग्रं पश्या च राष्ट्रभृच्च " (आ. II. 4) । " उग्रंपश्ये " (आ. II. 4) । " तेनान्योऽ३स्मत् " (आ. II. 4) । " संवर्चसा " (आ. II. 4) । " वर्चसे कृधि तिग्ममोजः " (आ. II. 5) । " मष्मषाकुरु । सँशितम् " (आ. II. 5)। " उद्वर्चो अथोबलम् " (आ. II. 5) । " आदित्यवर्णं तमसः परस्तात् " (आ. III. 14) । " दशोर्ध्वो भासि सुमनस्यमानः स नः " (आ. III. 6) । " सम्राट् " (आ. IV. 6) । " सशीर्ष्णा यज्ञेन यजमानः " । " अवाशिषो रुन्धे " (आ. V. 1) । अनयोः अत् अकारान्तह्रस्व इत्यर्थः । " द्यावा पृथिवी अमंसाताम् । तम् " (आ. IV. 9) । " अवाशिषोरुन्धत" । + + " अवाशिषो रुन्धे । अभि " (आ. V. 1) । " अथेमेनं परिदत्तात् " (आ. VI. 1) । " आधिरोहयेमम् " (IV. 2. 5) । " अश्मन्वतीः " (आ. VI. 3)। " यथानः सुफला सासि " (आ. VI. 6) । " सवितैतानि " (आ. VI. 6) ।

" अथ तस्य भयं भवति " (आ. VIII. 2) । " अमृतापिधानमसि " (आ. X. 70) । " धर्मान्नातिदुष्करम् " (आ. X. 78) ॥

[(मू) दिशोऽस्माकं स्तवा[1]नि यत् सुभगा [2]धूर्ददत्वपि ।
घृतभूतकृता[3]वोच्चैः पृथिव्यै त्वा[4]रदब्रुवन् ॥
रात्रियास्यत्यहश्चन्द्रा वा योनिर्न उपैष्यथ ।
तस्मा एत[5]मवाचस्त्वा सजाता ह्वाय चातिथिः ॥
एते तस्यान्यदाग्नेयः पशवो [6]न तथा विचि ।
अधरामृत आदित्यसतनूपसृष्टानुवि ॥
जुषन्तां पुष्कलेभ्येजज्जीवानस्मा[7]कं मामित ।
मयेह नि[8]धनोग्रमन्यस्तिग्मेन च मष्मषा ॥
विष्णोऽष्टभ्नाच्च दाधर्थ निर्घ्नन्ति यामि चेमि च ।
ते दक्षन्त पुरोडाशं पिधानमसि दुष्करम् ॥
पि[9]प्रतोऽथोऽप्यधीयीत परिदत्तादिदं फ[10]ला ।
तेजसाऽस्मै च सं[11]यन्तु अविग्राहं च विष्यताम् ॥
परस्तादविषादी च अणुभिर्भासि रोह च ।
आसादये[12]दासवित्रे सशीर्ष्णा ह्याशिषोऽम च ॥

दिशोऽस्माकम्, स्तवानि, यत्, सुभगा, धूः, ददतु, घृत, भूत, कृत, अव, उच्च, पृथिव्यैत्वा, आरत्, अब्रुवन्, रात्रियै, अस्यति, अहः, चन्द्रा, वा, योनिः, न उपैष्यथ, तस्मा एतम्, अवाचः, त्वा, सजाताः, ह्वाय च, अतिथिः, एते, तस्य, अन्यत्, आग्नेयः, पशवः, नविचि, अधर, प्राणममृते, आदित्यः, सतनु, उपसृष्टा, अनु वि, जुषन्ताम्, पुष्कलेभिः, एजत्, जीवान्, अस्माकम्, मामित, मयेह, निधिना, उग्रम्, अन्यः, तिग्मम्, मष्मषा, विष्णो, अष्टभ्नात्, दाधर्थ, निर्घ्नन्ति, यामि च, इमि, ते दक्षन्त, पुरोडाशम्, अपि-

१ 'नयि' ग. २ 'गादूर्धद्' ग. ३ 'तापोश्च' ग. ४ 'त्वरद्' ग. ५ 'तस्म वाचस्तु' ग. ६ 'वो ना विचाधर' ग. ७ 'कमामित' ग. ८ 'निधिनो' ग. ९ 'पिभ्यतो' ग. १० 'फला।' ग. ११ 'यान्तु' ग. १२ 'ये सदावि' ग.

धानमसि, दुष्करम्, पिप्रतः, अथो, अधीयीत, परिदत्तात्, इदम्, फला, तेजसा, अस्मै, संयन्तु, अविग्राहम्, विष्यताम्, परस्तात्, अविषादि, अणुभिः, भासि, रोह, आसादयेत्, आसवित्रे, सशीर्ष्णा, आशिषः, अमन्, पूर्वोत्तरशब्देषु सदृशेषु पूर्वोत्तरवर्णा एवोत्तरशब्देषु तिष्ठन्ति । ते शब्दाः तानि पूर्वोद्भववर्णान्वितपदान्युत्तमपक्षे भवन्तीत्ययमारम्भः । यथा—“ यथा नः सर्वा इद्दिशोऽस्माकं केवलीरसन् ” । “ इममेवाग्निं स्तावनि समास्तुतः ” । “ यत्पर्णमयी जुहूर्भवति । यत्पर्णमयः संभारो भवति ” । “ सहस्रपोषं सुभगा रराणा ” । “ प्राणं मे पाहि धूरसि श्रेष्ठः ” । “ तस्य ते ददतु येषां प्राणः ” । “ सुदुघा हि घृतश्च्युतः । ते अस्मै सर्वे घृतमातपन्ति ” । विद्युद्वर्षन् भूतरावृत्स्वाहा ” । “ विश्वा भूतानि प्रति मोदमानः ” । “ समर्धुकमस्य कृतं भवति ब्रह्मवादिनो वदन्ति । देवहितं सदःकृतम् । कृतान्नः पाह्येनसो यत् किंचानृतमूदिम ” । अस्युन्मुक्तो वरुणस्य पाशः ” । “ घृतमुच्चरण्येत् । प्रणो देवी ” “ गार्हपत्य उन्नो नेषद्दुरिता यानि चकृम ” । “ भूमिर्माता । पृथिव्यै त्वाऽन्तरिक्षायत्वा दिवे त्वा शुन्धतां लोकः ” । “ पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वेत्याह ” । एते अनुवाकादिवाक्ये । “ पोषाय त्वा पृथिव्यै त्वाऽन्तरिक्षाय त्वा दिवे त्वा सते त्वा ” इति सप्तमकाण्डे देवस्य त्वानुवाकस्यान्तिमं वाक्यम् । एतान्युदाहरणानि । अथो प्रत्युदाहरणानि लिख्यन्ते—“दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वाऽपेन्द्र ” इति तृतीयकाण्डे पञ्चमप्रश्ने उपयामगृहीतोऽसीत्यनुवाके “ त्विषिमान् हरस्वितमः । दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेत्याह । एभ्य एवैनं लोकेभ्यः प्रोक्षति । स ते त्वा ” इति प्रथमाश्वमेधे । इदं प्रकृतमिति तुशब्दार्थः । “ पृथिवीमनु व्याहरत्तदोषधयः । ता अब्रुवन्नरात्स्मोत्तिष्ठामावतम् । एष रात्रिया यत् कृष्णं यदेवैनयोः । कृष्णविषाणां प्रास्यति योनिर्वै । अपोऽहः प्रविशति । तस्माच्चन्द्राः । स तस्माद्वाश्यं वारुण्यर्चा । अपां पृष्ठमसि योनिरग्नेः समुद्रमभितः । केन न उपैष्यथेति । तस्मा एतं स्थागरमलंकारम् । अवाचोऽवपादादबिभयुः । एष वा अवाच्याहुतिः । ज्योतिषा त्वा वैश्वानरेणोपतिष्ठते । ये सजाताः संमनसः । जीवा जीवेषु । पृतनासाह्याय च । विश्वेषामतिथिर्मानुषाणाम् । स य एवं विद्वानेते आत्मानं स्पृणुते । वि च हैवास्यैते देवते पाप्मानं घ्नतः । उभे ह्येवैष एते आत्मानं स्पृणुते । पथो वा एतेऽध्यपथेन यन्ति ।

तस्य ह तिस्रो रात्रीरनाश्वान् गृह उवास । अन्यदन्यत्साम भवति । कल्माष आग्नेयः कृष्णोऽजः । पशवो वै वसतीवरीः । तादृगेव तद्यन्न विचिनुयात् । अधरलक्ष्माणं तस्योपदध्यात् । प्राणं त्वाऽमृत आदधामि यत्ते शुक्र । तान्येकादश आदित्यो द्वादशः । यज्ञस्य सततुत्वाय । देवता वै सर्वाः । यस्याग्निहोत्र्युपसृष्टा निषीदति । तां दुग्ध्वा । सप्तहोत्रा अनु विद्वान् । इन्द्रवन्तो हविरिदं जुषन्ताम् । यदग्ने । येभिर्वाचं पुष्कलेभिरव्ययत् । विश्वमेजत्समेति । यदन्तरा पितरं यन्मृतः पुनरप्येति जीवान् । अस्माकमुदितं कृधि । ऋतस्यर्तेन मामित । यत्कुसीदमप्रती त्तन्मयेह येन यमस्य निधिना चरामि । उग्रंपश्या च । राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि । उग्रंपश्ये राष्ट्रभृत् । तेनान्योऽस्मत् समृच्छातै तमस्मै प्रसुवामसि । संवर्चसा । इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण संशिशाधि । तिग्मेन नस्तेजसा व्यष्टभ्नाद्रोदसी विष्णवे ते दाधर्थ । पापान्निर्घ्नन्ति सर्वदा । यामि मयूररोमभिः । निधन्वेव तां इमि । ते दक्षन्त दक्षिणां प्रतिगृह्य । पचन् पुरोडाशम् । बध्नन्निन्द्राग्निभ्यां छागम् । अमृतापिधानमसि । धर्मान्नातिदुष्करं तस्माद् धर्मे । मनस्तनूषु पिप्रतः प्रजावन्तः । देवेभ्यः । उद्वर्चः । अथो बलम् । अरण्येऽधीयीत । अथेमेनं परिदत्तात् पितृभ्यः त इदं क्षेत्रमाविशन्तु । त इदं क्षेत्रमनुविशन्तु । यथा नः सुफलाससि । तिग्मेन नस्तेजसा संशिशाधि । ते अस्मै सर्वे घृतमातपन्ति । अनुलोममविग्राहम् । प्राणानेवास्मै कल्पयति तन्नो विश्वे अभिसंयन्तु देवाः । रायस्पोषं विष्यतां नाभिम् । धियम् । आदित्यवर्णं तमसः परस्तात् । उत्तरपूर्वस्यां दिशि विषादी । उत्तरापरस्यां दिश्यविषादी । अणुभिश्च महद्भिश्च । दशोर्ध्वो भासि सुमनस्यमानः । अधिरोहयेमम् । एताभिरेवासादयेत् । सवित्र आसवित्रे द्वादश कपालम् । तेन सशीर्ष्णा यज्ञेन यजमानः । अवाशिषो रुन्धे । द्यावापृथिवी अमंसाताम् " ।]

— उत्तमपक्षे —

(मू) एवेति ह विसर्गौ च मध्ये चान्तेवयोऽप्युशन् ॥ १२० ॥

देवा इन्द्रिय इदं वा इन्द्रोवृत्रा प्रकेतुना ।

उत्तमपक्ष एव शब्दः च हकारान्वितशब्दश्च विसर्जनीयान्तशब्दश्च इति

शब्दाः भवन्ति । यथा— " ता एव यजमान आत्मन्ननु समारम्भयते " (II. 4. 2) । " सर्वाभ्य एव देवताभ्यः सर्वेभ्यः पृष्ठेभ्यः आत्मानं निष्क्रीणीते " (ब्रा. I. 4. 7) । " एतमेव तच्चतुर्धा विहितं पाप्मानम् । यजमानोपहते " (ब्रा. I. 5. 9) । " मानव्यो हि प्रजामाद्यावा पृथिवी " (V. 1. 5) । " तस्य-हति स्रो रात्रीः । + + गृह उवास " (ब्रा. III. 11. 8) । " बुमन्त समिधीमहि । वयस्वन्तः (I. 5. 5) । यथा वै इत्यनुवाके उप व आयामेति वायोः पक्षतिः सरस्वतो निपक्षतिः (V. 7. 22) । "ये पराच स्त्र्यहानुपयन्ति"(VI. 4. 4)। "एष विशः प्रियः । विशोहि । + + + × ऋषभचर्मे " (ब्रा. II. 7. 2)। इत्यादि । " वयो वा " (V. 7. 6) । इत्याद्यनुवाकेषुमध्ये अन्ते च उक्ता एव हविसर्गाः स्युः । यथा " हेमन्तो मध्यम् । पूर्वपक्षाः " (V. 7. 6)। 'अन्त' इति " यां प्रथमाम् " (ब्रा. III. 11. 10) । ' उशन् ' इत्यनुवाके " तदस्मै नैवाच्छादयत् " (ब्रा. III. 11. 8) । इति पदद्वयम् । " ज्योतिर्धत्ते ज्योतिष्मन्तोऽस्मै " (ब्रा. III. 2. 7) । " धृष्टिरसि " (ब्रा. III. 2. 7)। इत्यन्ते, " व्यतिषक्तो वै ग्रामणीः " (ब्रा. II. 7. 18) । " व्यतिषक्तो वै पुरुषः " (ब्रा. II. 7. 18) । " उक्थ्यमेव प्रायच्छत् । तस्मै तृतीयम् " (VI. 5. 1)। " तन्निर्मीयम् " (VI. 5. 1) । " प्रकेतुना " (आ. VI. 3) इति अनुवाके " प्रियो देवानां परमे सधःस्थे " (आ. VI. 3. 4) " यं ते अग्निं " । (आ. VI. 4) इत्यपि ॥

(मू) या वां च पावमानोऽयं वावतृतीय[1] इत्यपि ॥ १२१ ॥

" या वाम् " (II. 3. 13) । " पावमानः " (ब्रा. II. 4. 8) । अयं वाव तृतीयम् एषु तृतीयेऽन्ते च विसर्गः स्यात् । यथा— " यो वामिन्द्रावरुणावग्नौ द्विपात्सु " (II. 3. 13) । " ऋषिभिः संभृतो रसः । ब्राह्मणेषु " (ब्रा. I. 4. 8) । योऽवरेणादित्यमित्यत्र । " अथ हैषः । यः परेण । अनन्तम् " (ब्रा. XI. 11. 7) ।

(मू) द्वितीये तु प्रदेवं हि देवीः, प्राचीन, चैव चेत् ।
समिद्धो अग्निः संक्रूरं सुवर्दाक्षि[2] च नान्यतः ॥ ॥ १२२॥

---

१ ' पवमानोऽयं वाव तृतीय इत्यपि ' ग. २ ' दाक्षि नचाम्य ' ख.

प्रदेवं (III. 5. 11) । देवीरापः (1. 8. 12) । प्राचीनवँशं करोति (VI. 1. 1) । " समिद्धो अग्निः " (ब्रा. II. 6. 18) । क्रूरम् (V. 4. 1) । सुवर्दाक्षि, (VI. 6. 1) । एष्वनुवाकेषु द्वितीय एव विसर्गः । अन्यत्र न । प्रदेवं देव्याधियेत्यत्र यथा— " धनञ्जयो रणेरणे " (III. 5. 11) । देवीरापो-मधुमतीरित्यत्र यथा— " चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा " (I. 8. 12) । प्राचीनवंशं करोतीत्यत्र यथा— " प्रच्युतो वा एषोऽस्माल्लोकादगतः + + यो दीक्षितः " (VI. 1. 1) । समिद्धो अग्निः समिधा (ब्रा. II. 6. 18) । इति द्वितीयानुवाकः । तदर्थम् " सुषमिद्धो वरेण्यः + + त्र्यविर्गौः " । (ब्रा. II. 6. 18) । इत्यादि ॥ क्रूरमिव वा इत्यत्र यथा— " प्रच्युता वा एष आय-तनात् " (V. 1. 5) । सुवर्गाय यद् दाक्षिणानीत्यत्र यथा— " सत्येनैवेना ऋतेन विभजति " (VI. 6. 1) । इति च ॥

(मू) वैपरीत्यं वषट्कारः परा वैश्वानरोऽग्नये ।
देवस्याहं, च सर्वाणि, वयोघ्नन्ति नवापरः ॥ १२३ ॥
एकादशाग्निष्टोमं च ब्रह्मर्कि चैषवै विभूः ।
वास्तोरिन्द्रं चोपहूतं पूर्वं होताग्निमेवं च ॥ १२४ ॥
प्रजापतेस्त्वयं सत्यं देवसवितर्यज्ञ एव च ।

" वषट्कारः " (II. 1. 7) " वैश्वानरः " (I. 5. 11) । "परावाः" (I. 5. 2) । " अग्नये " (आ. X. 67) । " देवस्याहम् " (I. 7. 8) । " सर्वाणि " (II. 4. 11) । " दिवः " " घ्नन्ति " (VI. 6. 7) । नव (ब्रा. I. 2. 2) । ["पर"] एकादशप्रातः (V. 6. 22) । " अग्निष्टोमं च " (ब्रा. I. 8. 7) " ब्रह्मवादिनो वदन्ति । किम् " (ब्रा. III. 3. 1) । " एष वै विभूः" (ब्रा. III. 9. 19) । " वास्तोः " (III. 4. 10) । "इन्द्रं वः " (I. 6. 12) "उपहूतम् " (ब्रा. III. 5. 8) । " होता+ + ग्निम् " (ब्रा. III. 6. 2) । " सत्यं परम् " (आ. X. 80) । " प्रजापतेः " (II. 3. 5) । 'क्व' (आ. I. 8) । "देवसवितः " " यज्ञः" (III. 2. 7) एष्वनुवाकेषु विसर्गादयः

---

१ ' दिवो घ्नन्ति ' ख. ग. २ ' नवांपरः ' ख. ग. ३ ' मेषु च ' ख. ग. ४ ' सत्यं प्रजापतेर्देवसवितरित्यचेष्टयथ ' ख.

संभवन्ति । 'व्युत्क्रम' इति परानुवाकेषु परवाक्येषु च न संभवन्ति इत्यर्थः । विसर्गादयोऽन्यत्र पूर्वपक्ष एवेत्यर्थः । वषट्कारो वै गायत्री तं बृहस्पतिरित्यत्र यथा–" खलु वै पर्जन्यो वर्षति " (II. 1. 7) । " खलु वै प्रजाः प्रजायन्ते " (II. 1 7) । परावा एष इत्यत्र यथा—" अन्नमक्षन् । पङ्क्त्यौ याज्यानुवाक्ये" (I. 5. 2) । वैश्वानरो न ऊत्येत्यत्र यथा–– " शोशुचान आरोदसी अपृणाः " (I. 5. 11) । अग्नयेत्यत्र " शतधारः सहस्रधारो अक्षितः " (आ. X. 67) । देवस्याहं सवितुरित्यत्र यथा— " सरिष्यन्तो वाजं जेष्यन्तः " (I. 7. 8) । सर्वाणि छन्दांसीत्यत्र यथा— " सर्वेभ्यो हि कामेभ्यः । + + + + । त्रैधातवीयेन " (II. 4. 11) । घ्नन्ति वा एतत्सोममित्यत्र यथा–– " क्षिष्टं युवते वरुणो दुरिष्टम् । क " (VI. 6. 7) । नवैतान्यहानीत्यत्र यथा— " उक्थ्या एव सप्तदशाः परः सामानः कार्याः " (ब्रा. I. 2. 2) । एकादश प्रातर्गव्या इत्यत्र यथा— " छगलः कल्माषः । + + + । ते त्वाष्ट्राः " (V. 6. 22) । अग्निष्टोममग्र आहरतीत्यत्र यथा— " ता एवाप्नोति । प्रजापतिः " (ब्रा. I. 8. 7) । ब्रह्मवादिनो वदन्ति किं चतुर्होतॄणामित्यत्र यथा — "इन्द्र खलु वै श्रेष्ठो देवतानाम् " (ब्रा. III. 3. 1) । " एष वै विभूर्नाम " (ब्रा. III. 9. 19) । वास्तोष्पत इत्यत्र यथा— " एवाप्स्वेष्टकाः कृत्वोपधत्ते " (III. 4. 10) । इन्द्रं वो विश्वतस्परि हवामह इत्यत्र यथा— " रोहयो दिवि । घर्मम् " (I. 6. 12) । उपहूतं रथन्तरमित्यत्र यथा— " उपहूतोऽयं यजमानः । उत्तरस्याम् " (ब्रा. III. 5. 8) । होता यक्षदग्निं समिधेत्यत्र यथा–– " सुवीरो वीरैः । वेत्वाज्यस्य " (ब्रा. III. 6. 2) । सत्यं परं परमित्यत्र यथा– " यज्ञ इति यज्ञो हि देवानां तस्माद्यज्ञे रमन्ते " (आ. X. 80) । प्रजापतेस्त्रयस्त्रिंशदित्यत्र यथा— " यज्जायाभ्योऽविन्दत् । + + + । वृणामहै समावच्छः " (II. 3. 5) । केदमभ्रं निविशत इत्यत्र यथा–– " आपः सूर्ये समाहिताः " (आ. I. 8) । देवसवितरेतदित्यत्र यथा –– " तं यज्ञोदुहे । स इष्ट्वा पापीयान् (III. 2. 7) ॥

— विसर्गः —

(मू) ऋध्यते नीत आह्वुर्यो विश्व तद्धि सुवर्ग च ॥ (१२५) ॥

ऋध्यते, नीतः, आह्वः, एवंपूर्वः य इत्यत्र विसर्जनीयः । सांनिध्या-

द्विसर्गा उच्यन्ते । यथा— "पशुभिर्ऋध्यते"। "यः संवत्सरं प्रयुङ्क्ते" (ब्रा. III. 9. 2)। "एष आनीतः ॥ यश्चातुर्मास्ययाजी" (ब्रा. I. 5. 6)। "एष ईप्सतीत्याहुः। यश्चातुर्मास्यैः + +एष हत्वै" (ब्रा. I. 4. 10)। विश्वकर्मा, तद्धिरण्यम्, सुवर्गाय यद्दाक्षिणानि, एष्वनुवाकेषु च य इति विसर्जनीयः। विश्वकर्मा दिशामित्यत्र यथा— "आवृश्च्यते यः पशुशीर्षाण्युपदधाति" (V. 5. 5)। तद्धिरण्यमित्यत्र यथा— "विक्रीणीते यः सोमक्रयण्या" (VI. 1. 7)। सुवर्गायेत्यत्र यथा— "आर्षेयो यः शुश्रुवान्" (VI. 6. 1)। अत्र किम्? "एकं वा एतद्देवानामहः यत्संवत्सरः (ब्रा. III. 9. 22)। ऋध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति। यच्चातुर्मास्ययाज्यात्मनः" (ब्रा. I. 5. 6)॥

(मू) चैनास्तास्वति छन्दांसि त्वपां नान्त्यं पशुष्वपि॥१२६॥

"छन्दांसि अति" (V. 3. 8)। (अत्र) "अपां" (V. 6. 2)। "पशुः" (V. 2. 10)। "चैना एवं वेदातिच्छन्दसम्" (V. 3. 8)। "चैना एवं वेदान्नम्" (V. 6. 2)। इत्यादि। नान्त्यम् इति किम्? "यउचैनमेवं वेद" (V. 6. 2)। "भूतेष्टकाः" (V. 6. 3)। तासु एवम्परः ऋतव्या उप, छन्दांस्युप, अपां ग्रहान्, पशुर्वै एष्वनुवाकेषु च एना इति विसर्गान्तः स्यात्। यथा— "य उचैना एवं वेद। तास्वन्विष्टि" (ब्रा. III. 12. 4)। "चैना एवं वेददिति प्राणभृतः" (V. 2. 10)। "चैना एवं वेददिति संवत्सरः" (V. 4. 2)॥

(मू) देविका एतएवेति; संपैवैनास्तु माध्रुवा।

देविकानिर्वपेत्, अस्मिन् एता एवेति स्यात्। यथा—"कुह्वावाचं दधात्येता एव निर्वपेदित्यादि" (I. 6. 2)। "संपश्यामि" (I. 5. 8)। इत्यत्र ध्रुवा एवैना अनपगाः इति स्यात्। (I. 5. 8)। अत्र किम्? "मां नो हिंसीत्" (IV. 2. 7)। इत्यत्र ध्रुव इति स्यात्। "तया देवतयाङ्गिरस्वद्ध्रुवाः सीदत"। "आप्यायस्व" (IV. 2. 7)॥

(मू) आत्पूर्व समिधः; श्रोत्रं दाविधृति; र्वसिष्ठ तैः॥१२७॥

एवम्पूर्वः समिध इति स्यात्। "समिध आदधाति वैष्णवाः" (V.

---

१ 'धश्चाद्दो विधृतिर्वसिष्ठ' ख.

6. 9) । " उदेनमुत्तरांनयेति । समिध आदधाति " (V. 4. 6) । " श्रोत्रं मेदाः " (आ. IV. 5) । " विधृतिरुपरिष्टात् " (आ. IV. 5) । वसिष्ठो हतपुत्र इत्यस्मिन्ननुवाके— " अथो प्रैवतैर्जायन्ते । पृष्ठयः " (VII. 4. 7) । इति[1] विसर्गत्वस्थानत्वात् ॥

(मू) त्वं[2] सोन्ते तव मय्येषा त्वं सर्वः च ध्रुवोऽसि ग्रिः ।

" त्वं सोम " (I. 3. 4) । इत्यत्र अनुवाकान्ते तव मयीति स्यात् । यथा— " यातवतनूर्मय्यभूदेषा सात्वयि " (I. 3. 4) । अन्ते इति किम् ? " या मम तनूस्त्वयि । " ध्रुव " (I. 6. 2) । इत्यनुवाके "ध्रुवोऽसि ध्रुवोऽहं " भूयासन्धीरश्चेत्तावसु + + धीरः उग्रः + + (II. 3. 9) । इत्यादि ॥

(मू) यत्स्थले यादृशः शब्दः तादृशः परिकीर्तितः ॥ १२८ ॥

यत्स्थले यादृशः शब्दः वर्तते तत्र तादृशः शब्दो मन्तव्यः । यथा— " मनसैव तद्यज्ञम् । + + + + + । योवैयज्ञं योगे " (I. 6. 8) । " पराङ्वाव यज्ञः " (I. 7. 6) । " यो वै यज्ञं प्रयुज्य " (I. 7. 6) । " यमत्वन्ते " (II. 1. 4) । " यमो वा इदमभूत् " (II. 1. 4) । इत्येकवचनात् । " बिभ्यत । इन्द्रमुप " (VI. 4. 6) । " अमन्यन्त । यमो वै " (II. 1. 4) । " चतुष्पाद्धयश्वः " (II. 3. 12) । " अप्सु योनिर्वा अश्वः " (II. 3. 12, V. 3. 12) । " अङ्गिरस्वत्पचन्तूखे । मित्रै तामुखां पच " (IV. 1. 6) । " त्रिः सादयति । + + + + + । यद्गार्हपत्य उपसादयेत् " (VI. 4. 2) । " यस्यैवमग्निराधीयते " (ब्रा. I. 1. 4) । " यस्य वा अयथादेवतम् " (ब्रा. I. 1. 4) । " संवत्सरोऽष्टादशः । + + + + + + । संवत्सरमेवतैः (ब्रा. III. 9 1) । " कश्चिद्धवै " (ब्रा. III 10. 11) । " कश्चिस्त्वं लोकम् " (ब्रा. III. 10. 11) इत्यादि ॥

(मू) विभक्तिलिङ्गरूपैश्च वर्णा ज्ञेया विचक्षणैः ।
क्रम इंर्ग्यैः च कण्ठोक्ति यजुरोदि पदद्वयम् ॥ १२९ ॥
पैदसांख्यं[3] वैर्णसांख्यमवधानाष्टकं बुधैः ॥

---

१ ' इमे विसर्जनीयान्ता इति मन्तव्याः ख. २ ' त्वं सोऽन्ते तव मर्येषा त्वं ते सर्वध्रुवो ध्रुवः ' ख. ३ ' ग्यं च ' ख. ४ ' दिसमद्ध ' ख. ५ ' वेदसां ' ग. ६ ' सर्वसा ' ग,

यथा–" याञ्चैवास्यै पोष " (I. 5. 7) । स्त्रीलिङ्गात् इदम् । "इन्द्रप्रतिहव्यं गृभाय (I. 6. 12) नपुंसकत्वात्, " भागधेयं प्रेप्सति तस्मै यत् आहुतिं न जुहुयात् । पदध्वर्युं च यजमानं च ध्यायेच्छतरुद्रीयम् " (V. 4. 3) । इत्याद्येकवचनात्, " य एवं चतुर्होतॄणां ऋद्धिम् । + + + । य एषामेवं बन्धुतां वेद " (ब्रा. II. 3. 1) । पुंलिङ्गबहुवचनत्वादिति विज्ञेयम् ॥

(मू) यो जानाति भरद्वाजशिक्षामर्थसमन्विताम् ॥ १३० ॥
स ब्रह्मलोकमाप्नोति गृहमेधी गृहं यथा ॥

॥ इति भारद्वाजशिक्षा सव्याख्या समाप्ता ॥

। हरिः ओम् ।

। शुभमस्तु ।

अखण्डसच्चिदानन्द परमश्रीमहद्गुरुभ्यो नमः ।
विपश्चिद्वृद्ध गिरिज नागेश्वरमनीषिणा ।
भारद्वाजशिक्षाव्याख्या वृद्धाचलनिवासिना ॥

पिंगलवर्षम् । आवणिमासम् । २३ तिचश्रविष्ठा इन्दिदिनत्तिल् यरिपरवनूरुक्कु प्रति नाममान महाराजपुरं वृद्धाचलं शीमैयिलिरुक्कुं वृद्धगिरिशास्त्रियळ् कुमारन् नागेश्वरशास्त्रियळ् यळुदिनतु ॥

॥ शुभमस्तु ॥

---

१ ' ह्रस्थान ' क. २ अखण्डेत्यादिभोगा नास्ति ख. ३ September 6, 1779

Corrections and Additions

Page	Line	For	Read
११	११	तो अस्य	नो अस्य
२१	१६	अम्बे (II. 4	अम्बे (VII. 4
२२	९	उक्षत्तेभ्यः	उक्षत्येभ्यः
२७	१८	स्यं, नः	स्यनः
३१	१	धो [मतु] ।	तेन तु ।
३१	३	ची	चि
३५	७	चर्मे	चर्मो
४८	१९	प्रजाग्रा	प्रजामृगंग्रा
६४	१२	त्वं रयि	त्वं रजि
६४	१२	पन्थाम्”	पन्थाम्” (II
६४	१३	ऋषभः”	ऋषभः” (I. 2. 8) ।
८३	१७	जयत्”	जयत् (ब्रा. III. 1. 5)
८६	२०	स्तौ	स्तो
८९	१२	देवता वै”	देवता वै” (VI. 6. 8) ।
९४	५	द्युमन्त	द्युमन्तः
९४	७	VI	VII
९४	११	‘उशन्’ इत्यनु	इत्यनु
९४	१६	निर्मीय	निर्माय
९४	२३	I	II
९५	२	V. 4. 1	V. 1. 5